
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ





Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 26/07/2014 | **Typing started on** | **H K Srinivasa Rao** |
| 2 | 18/10/2014 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 18/10/2014 | **II Proof Reading** | **H K Srinivasa Rao & M S Venugopal** |
| 4 | 20/10/2014 | **Published** | **H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Vadiraja Gurusarvabhowmaru. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy. With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.

Contact: H K SRINIVAsA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 8095551774, Skype Id: SRKARC6070

Email : **Srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ ಪಿತೃದೇವೋ ಭವ ಆಚಾರ್ಯದೇವೋ ಭವ

**ಗ್ರಂಥ ಋಣ: ಶ್ರೀಲಾತವ್ಯಾತ್ಮಕ ವಾದಿರಾಜಗುರು ಸೇವಾಸಮಿತಿ ಕೋಟೇಶ್ವರ, ದ.ಕ**

**( ಶ್ರೀ ಬಿ.ಪಿ ನಾಗಭೂಷಣರಾವ್ ತುಮಕೂರಿ(ಅನುವಾದಕರು) - 1993.**

SHREE HAYAGREEVA
THE KULADEVATHA OF DAIVAJNYA BRAHMINS

स्वाप्नवृन्दावनाख्यानम् ........ 5
॥ अथ प्रथमाध्यायः ॥1॥ ........ 5
॥अथ द्वितीयोऽध्यायः॥2॥ ........ 18
॥ अथ तृतीयेऽध्यायः॥3॥ ........ 26
॥ अथ चतुर्थोऽध्यायः ॥4॥ ........ 39
॥ अथ पञ्चमोऽध्यायः॥5॥ ........ 50
॥अथ षष्ठोऽध्यायः॥6॥ ........ 60
॥अथ सप्तमोऽध्यायः॥7॥ ........ 73
॥ अथ अष्टमोऽध्यायः॥8॥ ........ 87
॥ अथ नवमोऽध्यायः॥9॥ ........ 99
॥अथ दशमोऽध्यायः॥10॥ ........ 111
॥अथ एकादशोऽद्यायः॥11॥ ........ 130
॥ अथ द्वादशोऽध्यायः ॥12॥ ........ 141
॥ अथ त्रयोदशोऽध्यायः ॥13॥ ........ 154
॥ अथ चतुर्दशोऽध्यायः ॥14॥ ........ 165
॥ अथ पञ्चदशोऽध्यायः ॥15॥ ........ 176
॥ अथ षोडशोऽध्यायः ॥16॥ ........ 189
॥ अथ सप्तदशोऽध्यायः॥17॥ ........ 201
॥अथ अष्टादशोऽध्यायः ॥18॥ ........ 215
॥ एकोनविंशोऽध्यायः ॥19 ॥ ........ 227
॥ अथ विंशोऽध्यायः ॥ 20 ॥ ........ 239
॥ अथ एकविंशोऽध्यायः ॥21॥ ........ 250
॥ अथ द्वाविंशोऽध्यायः ॥22॥ ........ 262

SHREE HAYAGREEVA
THE KULADEVATHA OF DAIVAJNYA BRAHMINS

# स्वाप्नवृन्दावनाख्यानम्

## ॥ अथ प्रथमाध्यायः ॥1॥

हयग्रीवं चिदानन्दविग्रहं सदनुग्रहम्।
दशग्रीवच्छिदं शापान्मणिग्रीव विमोचनम्॥1॥

सुग्रीवाभयदं सम्यगुग्रसेन विभूतिदम्।
उग्रविघ्न हन्तारं भक्ताभयकरग्रहम्॥2॥

स्वनामग्रहणादेव निरस्तग्रहविग्रहम्।
वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्र वन्दितम्॥3॥

शक्रराज्य प्रदातारं चक्रशङ्खधरं हरिम्।
नक्रमोचित हस्तीन्द्रं वक्रबुद्धि विदारणम्॥4॥

शुक्रे वक्रेपि हर्तारं बलिराज्यं महाप्रभुम्।
वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्र वन्दितम्॥5॥

त्रिवक्रानुग्रहं देवं त्रिजगद्वन्द्य विग्रहम्।
त्रिवेदवेद्य विभवं त्रिलोकानामथेश्वरम्॥6॥

त्रिविक्रमं त्रिकालज्ञं त्रिधामानमथाच्युतम्।
त्रिदशानुग्रहं देवं त्रिपुरघ्नभयापहम्॥7॥

वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्र वन्दितम्।
वृन्दावनगतं देवं मन्दाकिन्याः पदं हरिम्॥8॥

| |
|---|
| कन्दाशन मनोगम्यं वृन्दारक समन्वितम्।<br>अमन्दानन्दसन्दोहं मन्दारस्यापहारिणम्॥9॥ |
| वृन्दावनगतं वन्दे ब्रह्मरुद्रेन्द्र वन्दितम्।<br>आत्मस्तोत्रज दोषंतमात्म स्तोत्रं विनाशयेत्॥10॥ |
| इन्द्रोरुद्रः  कुभेरश्च यमो वरुण एव च।<br>अग्निर्निर्ऋतिर्वायुश्च चन्द्र सूर्यादयोग्रहाः॥11॥ |
| देवोपदेवाभूदेव नरदेवाश्च सर्वशः।<br>सकलत्राः  सपुत्राश्च सर्वे सपरिवारकाः॥12॥ |
| गीतवादित्र नृत्यैश्च जयशब्द पुरस्कृतैः।<br>नानोपहारबलिभिर्ब्रह्मघोषोप बृंहितैः॥13॥ |
| उपासते हयग्रीवं वृन्दावनगतं ।<br>त्रयस्त्रिंशाच्चकोटीनां देवास्सन्निहितास्सदा॥14॥ |
| मम वृन्दावने पुण्ये हयग्रीवस्यचाज्ञया।<br>तीर्थानां उत्तमं तीर्थं वनानां उत्तमं वनं॥15॥ |
| क्षेत्राणां उत्तमं क्षेत्रं मम वृन्दावनं द्विज।<br>वनं वृन्दावनं नाम नैमिषं वनमेव च॥16॥ |
| वनं चैत्ररथं नामनन्दनं वनमेव च।<br>वनन्तु खाण्डवं नाम गुहस्य वनमेव च॥17॥ |

| |
|---|
| वनन्तु पद्मकं नाम सोमनन्दिवनं तथा।<br>ब्रह्मारण्यमितिख्यातं यद्वनं वर्तते भुवि॥18॥ |
| आनन्दकाननं चेति यद्वनं वर्तते सदा।<br>एतान्यन्यानि पुण्यानि वर्तन्ते भुविकानि च॥19॥ |
| तानि सर्वाणि वर्तन्ते मम वृन्दावने द्विज।<br>तस्माद्वृन्दावनमिदं सर्वाभीष्टप्रदं सताम्॥20॥ |
| मन्दरोहिमवानद्रिर्माहेन्द्रो गन्धमादनः।<br>विन्ध्याचलोथ मैनाक इन्द्रकीलक एव च॥21॥ |
| सुनाभः पारियात्रश्च वज्रनाभस्तथा गिरिः।<br>श्रीपर्वतः शेषगिरिस्तथाहेमगिरिः स्वयम्॥22॥ |
| गोवर्धनो गोवृषश्च गोमन्तः पर्वतोत्तमः।<br>दीरः सुरनिधिर्मेरुर्गिरिभिः सहितोरमन्॥23॥ |
| विरजो गिरिजा देवी पतेराश्रय भूश्चयः।<br>रमापतिप्रियान् साक्षात् देवांश्च रमयन्मुहुः॥24॥ |
| उमापत्यालयेनापि मम वृन्दावनं गतः।<br>एतेचान्येच बहवः पर्वताः पुण्यवर्धनाः॥25॥ |
| मम वृन्दावने पुण्ये वसन्त्यरिधराज्ञया।<br>तस्मात् वृन्दावनमिदं सर्वाभीष्टप्रदं सताम्॥26॥ |

गङ्गा सरस्वती कृष्णवेणी चैव महानदी।

मलापहा भीमरथी कावेरी कपिला नदी॥27॥

गोमती गोपतेः पुत्री तथा गोदावरी नदी।

मरुद्वृधा असिक्नी च शतद्रश्च महानदी॥28॥

वरदा सरितां श्रेष्ठा सरयूश्च महानदी।

तुङ्गभद्रेति विख्याता स्नातानां भद्रदायिनी॥29॥

एताः पुण्यतमाः नद्यः एतदन्याश्चया द्विज।

पुष्करिण्यश्च याः सर्वाः सर्वाण्यायतनानि च॥30॥

मम वृन्दावने पुण्ये तत्पश्चात्तु सरोवरे।

वसन्ति तीर्थपादस्य हयग्रीवस्य चाज्ञया॥31॥

तस्माद्वृन्दावनमिदं धवळाख्यं सरोवरम्।

स्नानेन दर्शनेनापि सर्वाघौघविनाशनम्॥32॥

एवं निशाम्य मम भृत्यमुखाच्छसर्वम्।

वृन्दावनस्य विभवं सुजनाश्च सर्वे।

श्चेत् द्धालवा वितत भक्तियुता भजन्तु

सर्वेष्टदं सकलपाप विनाशनं तत् ॥33॥

इदं वृन्दावन स्तोत्रं त्रिकाले यः पठेच्छुचिः।

नाकाले तस्य मृत्युः स्यान् मत्प्रसादान्न संशयः॥34॥

| |
|---|
| अश्वत्थ चूत पनसाम्र सुनारिकेळ<br>धात्रीक्षुदण्ड कदळीवनमध्यगा या।<br>वृन्दावनाष्टक पिनाकि हनूमतां च |
| मद्ये स्थितातु धवळेति सुदिव्यनाम्नी॥35॥ |
| गङ्गा सुमङ्गळ तरङ्गवती स्वभक्त<br>पापौघ भङ्ग करणी तरिणी भवाग्देः।<br>सा मानिनी परम पावन पावनी च<br>वृन्दावनस्य मम पश्चिमगा विभाति॥36॥ |
| मुनि मन्त्र समाहूता भीता दिव्य सरोगता।<br>विष्णोस्सुता लोकमाता सततं सुगतिस्सताम्॥37॥ |
| हित्वातु मत्सुतां स्थातुं नचोत्सेहे कदापि हि।<br>इति बुद्ध्यैव विष्णस्तु देवस्तत्तीरगोऽभवत्॥38॥ |
| हित्वामदाश्रया स्थातुं नचोत्सेहे कदापि हि।<br>इति बुद्ध्यैव रुद्रस्तु देवस्तत्तीरगोऽभवत्॥ 39॥ |
| हित्वा मत्स्वामिनं स्थातुं नचोत्सेहे कदापि हि।<br>इति बुद्ध्यैव हनुमान् देवस्तत्तीरगोऽभवत्॥40॥ |
| तस्मात्सरोवरमिदं सर्वाघौघ हरं परम्।<br>इदं तु यो नरः श्रुत्वा गतिं नेष्टां लभेत किम्॥41॥ |

स पिप्पल तरुर्भाति फलं कल्पतरुर्यथा।

वितरुन्नुत्त राशायां मम वृन्दावनस्य हि॥42॥

अश्वत्थ देवसकलेष्टद देवदेव

भूदेव वन्दित पद प्रददात्यभीष्टम्।

वेदैक वेद्य सुजनाब्धि सुपूर्णचन्द्रो

भक्ताभयप्रद सुपुत्रमपुत्रिणां च ॥43॥

किं चित्रं देवदेवस्य भक्ताभीष्ट प्रदातृता।

यस्य किङ्करता यान्ति देवास्सर्वे वरप्रदाः॥44॥

शेषशायिन् मम स्वामिन् देव भूमन्नमोस्तु ते।

वृन्दावन पतेनन्ताऽनन्तजन्माघनाशन॥45॥

## हयग्रीव स्तोत्र

हयग्रीव समग्राङ्ग शुभाग्र्याक्षावलोकन।

जगद्ग्रासावसानेतु जगद्विग्रह ते नमः॥46॥

वन्देऽरविन्द नयनं मदनाभिरामम्

मन्दाकिनीधर मुखैस्त्रिदशैस्सुवन्द्यम्।

वृन्दावने च कृत मन्दिरमप्रमेयम्

मन्दार भूमिजधरं हयशीर्षमाद्यम्॥47॥

| |
|---|
| वृन्दावने मदन मोहन देह भाजम्<br>मन्दार माल्यकृत पूजक वादिराजम्।<br>नन्दादि पार्षद् गणैर्नुत देवराजम्<br>वन्देऽनिशं मम हृदिस्थ हयास्यराजम्॥48॥ |
| हनूमन् भूरिमहिमन् रामनाम्नि सदारमन्।<br>रमारमणधामानि मां समापय ते नमः॥49॥ |
| प्राभञ्जनेऽञ्जनासूनो कञ्जनाभप्रियाग्रणि।<br>कुञ्जरायुत शक्तिं च त्वं जनानां प्रयच्छसि॥50॥ |
| वृन्दावने मदनमर्दन रुद्रहृद्यम्<br>सद्भिः प्रवन्दितपदं मदनाभिरामम्।<br>वृन्दारकेन्द्र मरुदंश समर्दिताङ्गम्<br>रक्षो विदार्य वरदं प्रणमामि रामम्॥51॥ |
| हयग्रीवं हारभास्वद्ग्रीवं भासुरविग्रहम्।<br>सुरारि निग्रहकर सुदर्शन करग्रहम्॥52॥ |
| मुरारि विग्रहधर पौण्ड्रविग्रह निग्रहम्।<br>पुरारि विग्रह कराऽसुर चक्र विनिग्रहम्॥53॥ |
| बलारि पौरुषहर बलिबन्ध विनिग्रहम्।<br>नमामि कमलात्मानं विमलात्मानमच्युतम्॥54॥ |

ब्रह्मात्म कौस्तुभमणिं चिन्मात्रानन्त सद्गुणम्।
तन्मात्र निर्मित गुणं सन्मात्र कृत सद्गुणम्॥ 55॥

अत्यद्भुताकार मूर्तेऽप्रत्ययानन्त सद्गुणा।
दृप्तदानव विध्वंसिन् मर्त्यसिंह नमो नमः॥ 56॥

नरस्तोत्रज दोषं तं नरसिंहस्तुतिः सदा।
नाशयेन्नर जन्मानि चैव मेन न संशयः॥ 57॥

वादिराजाख्ययतिना वागीश करजेन च।
वृन्दावन गतेनैव ब्राह्मणस्वाप्न मूर्तिना॥ 58॥

कृतं स्तोत्रमिदं पुण्यं पठतां सम्पदां पदम्।
वन्देऽरविन्द (नयनां) सदनां वदनराविन्दाम्
वृन्दावनाख्य सदनां मदनस्य चाम्बाम्॥ 59॥

वृन्दावनाख्य सदनानवनां स्वभक्तान्
मन्दाकिनी जनकपाद हयास्य जायाम्॥ 60॥

लक्ष्मीं लक्षण सम्पन्नां लक्ष्मणाग्रजकाङ्क्षिणीम्।
लक्षयामीक्षणं लक्षवित्तदात्रीं कटाक्षतः॥ 61॥

भक्ताभयकरीं नित्यं श्रुत्वा गच्छन्ति सात्विकाः
शरणं करुणापाङ्गी मरणं हर प्राणिनाम्॥ 62॥

लक्ष्मीस्तुतिमिमां नित्यं पठेद्यस्तु विचक्षणः।
लक्षापराधिनमपि  क्षमते नात्र संशयः॥ 63॥

| |
|---|
| नमामि नरकोत्तारं नमामि नरकेसरिम्।<br>नमामि नागशयनं नमामि नगवासिनम्॥64॥ |
| नरके च कतिर्यास्मात्सकाशात् पापिनो भवेत्।<br>हिरण्यकशिपोः सोयं नरकेसरिरुच्यते॥65॥ |
| प्राणिनां प्राणभर्तायोश्शरणं शरणार्थिनाम्।<br>तं प्राणं प्राणिनां प्राणं प्रणमामि परायणम्॥66॥ |
| तं देवाः प्राणयन्तेति ह्युक्थमुक्थेति यं विदुः।<br>तं प्राणं प्राणिनां प्राणं मरणात्यांग तोरण॥67॥ |
| एवं शश्वत् स्तुतः स्तुत्यः कृतकृत्यस्तु सत्पतिः।<br>कितवान्तकरो भूत्वा शं तनोतु सतां मम॥68॥ |
| अहं भजे मुदाभजे हृदाभजे सदाम्बुजे।<br>कृतालयं कृपालयां हरेरथाच्युतालया॥69॥ |
| यस्मान्नर समूहानामयनं नयनाग्रतः।<br>नरकान्नतरेत्सोयं नरनारायणोच्युते॥70॥ |
| रजतपीठ पुरमप्रतिमं भुवि पुरटपीठ गतमप्रतिमं हरिम्।<br>करटबुद्धिरपियाति को महान् सरट जन्मन जहाति तद्गतः॥71॥ |
| तादृशं कृष्णमाराध्य चेदृशं वैभवं तव।<br>यादृशं  कृष्ण महात्म्यमीदृशं नोच्यतेऽबुधैः॥72॥ |

| |
|---|
| सोहं कृष्ण इतिख्यातो विष्णौ तृष्णा विधायकः।<br>कृष्णायाश्च वरं दत्वा पुष्णाम्येतत्पतीन् सतीम् ॥73॥ |
| ईदृशं कृष्णमव्यक्तं विष्णुतत्वोपदेशकम्।<br>श्रुत्वातृष्णां जहात्याशु कृष्णे भक्तिं करोत्यलम्॥74॥ |
| इति मामुक्तवान् व्यासो दासं भासुरविग्रहः।<br>मन्दहासान्वितो नित्यं वृन्दं सर्वं प्रहर्षयन्॥75॥ |
| नमामि नारायण पादपद्मं वदामि नारायण नामधेयम्।<br>करोमि नारायण पूजनं च स्मरामि नारायण मूर्तिमेव॥ |
| तदात्मकं हयग्रीवं सदानुग्रहकारकम्।<br>तारकं भवराशेर्मां मारकं पापिनामिह॥77॥ |
| नमामि कामतातं मां कुमारश्चेति मानयन्।<br>रमायै काममात्रे च मेरौ यो दत्तवान्मुनिम्॥78॥ |
| तमीश्वरं भास्वर सूर्यशौर्यदं ममेश्वरं सर्व जगच्चसेश्वरम्।<br>मुनीश्वरैः सर्व सुरेश्वरेश्वरैर्वशेकरं सर्व महेश्वरं स्मरे॥79॥ |
| मूलरूपेण बालार्क सदृशं कमलेश्वरम्।<br>नीलमेघप्रतीकाशं लोकदृष्ट्या महाबलम्॥80॥ |
| सान्द्रं कमण्डलुधरं चोपेन्द्रं चाण्डलग्नकम्।<br>भजामि भजनीयं तं भुजगेश्वर शायिनम्॥81॥ |

कुजनाशङ्कयाजात वृजिनापहरं च मे।

अथ मधुं युधि निहत्य मोदतेबुध जनैरभिहितो मधुहेति॥82॥

विधिभवेन्द्र गुरुपूर्वकैः सुरैः कुसुम वर्षिभिरीडितः स्वराट्।

शङ्खचक्र ददाद्युदायुधैः शार्ङ्ग संज्ञित धनुः प्रवरेण॥83॥

बाणपूग सहिताक्षय तूणीभ्यामुपागमदथाब्धिषु मध्ये।

तद्युद्धमभवद्धोरं समुद्र सलिले तदा॥84॥

दृष्ट्वा तत्खेचरास्सर्वे दुर्द्रुवुर्भयतो दिशः।

नभस्थलं विशालाक्ष विमानावलिभिस्सुराः।

अलं चक्रुर्मलयजैराक्तोरुस्थलमालिनः॥85॥

तदैव देवो भवपूर्वकैस्सुरैः सुवन्दितः शत्रुवधं च कुर्विति।

तदोमिति प्रासवरेण वैरिणं निवारयमास जहास वै हरिः॥86

जानुमात्रं तु तस्यासीद्धानु मण्डल मप्यहो।

को नु तं वर्णयेद्देहं सूनुवर्यं श्रुणुष्वभो॥87॥

तदस्त्र शस्त्राणि स्वशस्त्र सञ्चयैर्विवृश्च पुत्रा प्रतिशस्त्र धारया।

शिरो जहाराशु सुरैस्समीडितो गिरीन्द्रवत्तच्च पपात कं भुवि॥

देवास्सर्वे पुनर्यातास्तत्र स्वर्यान्ति केचन।

कैलासं लोकविख्याताः सत्यलोकं च केचन॥89॥

ब्रह्मास्तुवन्परंब्रह्म ब्रह्मलोकं मुदा तदा।

ययौब्रह्महृदिध्यायन् ब्राह्मणैर्ब्रह्मवित्तमैः॥90॥

कैलासं लोकपालैश्च बालार्कद्युतिरव्ययः।

शूलीकालाग्निवद्भीमः स्वलोकं च ययौ मुदा॥91॥

इन्द्रोपि सान्द्र सन्तोषात् उपेन्द्रेणान्वितः प्रभुः।

मुनीन्द्रैस्सह मन्द्रैश्च चन्द्रलोको परिह्यगात्॥92॥

तस्यत्वक्कर्म मांसैश्च मेदो मज्जास्थिबिस्सुत।

रक्तैरक्तां धरां चक्रे प्रकृत्यवयवैरिह॥93॥

नखैः खननवच्चक्रे कुन्तैः कुन्तालकैरपि।

पिण्डी कृत्य च तत्पङ्कं सोनन्त महिमस्स्वराट्॥94॥

मेदोभिर्निर्मितत्वाच्च मेदिनीति विदुर्बुधाः।

तद्भूताभरणैर्युक्ता तस्मात्तां धरणीं विदुः॥95॥

लोकाधारत्वयुक्तत्वात्तां धरेति विदुर्बुधाः।

स्वयन्तूर्वरितत्वाद्धि नष्टेषु स्वपतिष्वहो॥96॥

उच्यते सापि चोर्वीति पर्वताद्यैरथान्विता ।

उर्वी च पर्वतधृतापि श्रीयोऽवराभूत्।

श्रीपर्वतं च स्वयमेव धरत्यमोघं॥97॥

तस्माद्वराह महिषी च बभूव कोलाद्

अङ्के धृता च मुहुरप्यभिलाषिता सा॥98॥

यस्या गर्वहरा येह वराहो नरकं सुतम्।

लोकराहुं धरायां च सृष्ट्वारोहयदद्भुतम्॥99॥

लोकपालपदं ब्रह्मवरतः पर्वतोपमान्।
कारयामास पापानां राशींस्तेन दुरात्मना॥ 100॥

स्वदंष्ट्र चोग्रपापानां सिद्ध्यर्थमददात्प्रभुः।
जघान स्वयमेवाजौ कृष्णो वै रुक्मिणीपतिः॥ 101॥

पातयामास कोपेन तत्तमोन्धं धरासुतम्।
ब्रह्माणमम्भ्रणी पुत्रं चकारारि निषूदनः॥ 102॥

एवं तत्पुत्रयोर्नीचत्वाधिकत्वतथा मुने।
तारतम्यं चकारात्र श्रुणु पुत्र न संशयः॥ 103॥

इत्थं मधु हरेणैव निर्मितां धरणीं पुरा।
पौराणिको वदत्येवं करुणां कुरु ब्राह्मणे॥ 104॥

इमां भूम्याश्च महिमां मानवोपि श्रुणोति यः।
वराहेण हयग्रीव स्वरूपेण महात्मना॥ 105॥

दत्तां तत्पदवीं याति यं वदन्तीह भूपतिम्।
श्रीमद्वादीभराजोहं वादिराजोऽवदं द्विजे॥ 106

बुधाः श्रुण्वन्तु मे दासाः सदा ममहिते रताः।
हरेर्वक्षस्थले दृष्ट्वाश्रियं विस्मितवानहम्॥ 107॥

पार्श्वयोरुभयोर्देवीं करेचामरधारिणीम्।
अङ्के च पङ्कजाक्षीं तां शङ्खपाणेर्महात्मनः॥ 108॥

कुङ्कुमाङ्कितगन्धाढ्यां कङ्कणादिविभूषिताम्।
अग्रतः पृष्ठतश्चापि ह्यदस्थादुपरिस्थिताम्॥109॥

सर्वत्र तां श्रियं दृष्ट्वा परमानन्द निर्भर
एतत्सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वैविप्रवर्यास्यजेन।
श्रुत्वाचोर्व्यां शर्वं गुर्वादि देवान्
दृष्ट्वोर्वशिं यान्तु मां मानवेन्द्राः॥110॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।
मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥111॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥112॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतिं ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलक श्रीवागीशतीर्थ श्रीमच्चरण करसञ्जात श्रीवादिराज चरणोदित ब्राह्मणस्वाप्नवृन्दावनाख्याने स्तोत्र भागे प्रथमोध्यायः ॥1॥

## ॥अथ द्वितीयोऽध्यायः॥2॥

इन्द्रोपि सान्द्र सन्तोषात् उपेन्द्रेण सहागतः।
वृन्दावनगतं देवं चंद्रवद्रञ्जनं दिशः॥1॥

नत्वातस्मै स्तुतिं कृत्वा दत्वातस्मै करं त्वरन्।
श्रुत्वा तस्य कथामुक्त्वा वृत्रासुर वधं तथा॥2॥

| |
|---|
| विनिर्गतः पुनः स्वर्गं गुर्वग्नि सहितः स्वराट्।<br>गन्धेन चर्चितश्चोग्रं दुर्गन्धं तेन वारयन्॥3॥ |
| इत्थं चाग्निस्तिग्मतेजाः मग्नश्चानन्दवारिधौ।<br>भग्ने च यज्ञकृत्ये च निर्माल्यं जग्मिवान् हरेः॥4॥ |
| यमश्च यमुनाभ्राता कमनीयं हरिं प्रति।<br>रमापतिं मम स्वामिनं ननामागतः स्वयम्॥5॥ |
| निवेद्य स्वाधिकारं तु दुर्जनानां च बाधकम्।<br>साधकं सिद्ध धर्माणां सम्पदा तं प्रणम्य च॥6॥ |
| जगाम निमिषेणायं स्वालयं कालयन्नरीन्।<br>पालयन् शील वृत्तानां त्याजयन् दुर्जनान्सुखात्॥7॥ |
| वरुणो वायुना सार्धं लोकाधिपतिना गुणिन्।<br>शरणं प्राप मद्वृन्दावने श्रीरमणं श्रुणु॥8॥ |
| स्वाधिकारं निवेद्यास्मै गङ्गादार उदारधीः।<br>सदारः प्रययौ धीरः सुधा श्राव्यातपत्रगः॥9॥ |
| कुबेरो नरहवाहं च निर्ऋतिं त्वरयारयन्।<br>गर्हयन् पुरतः शीघ्रं आससाद रमापतिम्॥10॥ |
| स्वाधिकारं निवेद्यास्मै प्रसादं शिरसा धरन्।<br>सदारः प्रययौ शीघ्रमुदारः स्वपुरं नरैः॥11॥ |

| |
|---|
| रुद्रोऽपि वीरभद्रेण शूद्र मोहन रूपिणा।<br>काद्रवेयादिभिः सार्धं द्रुतमायाद्रमापतिम्॥12॥ |
| मद्बृन्दावन मध्यस्थं सद्बृन्दैरन्वितोनमत्।<br>तद्बृन्दावनगं गोपं मद्बृन्दावन मध्यगम्॥13॥ |
| दृष्ट्वा च विस्मितो भूत्वा स्वनाथं राममेव च।<br>अत्यन्तं सुत सन्तोषभरितो भरतो यथा॥14॥ |
| बभूव सतु रुद्रोपि स रुद्रत्वं जहाविह।<br>रूपान्तरेण कैलासं ययौ रूपान्तरेण च॥15॥ |
| अत्राप्यन्तर्गतं रामं भजते निज सेवया।<br>एवं सर्वेपि देवाश्च स्व स्व योग्य हरिं प्रभुम्॥16॥ |
| भजन्ते निजसेवाभिः  भक्ति मन्तोत्र नान्यथा।<br>इत्थमष्टदिशा पालैः कृत वैभव मञ्जसा॥17॥ |
| मञ्जु मद्बृन्दावनस्य श्रुत्वानन्दं स याति च।<br>तस्माद्बृन्दावनमिदं सर्वाभीष्टप्रदं सताम्॥18॥ |
| भेरी शङ्ख मृदङ्गैश्च पणहानक गोमुखैः।<br>कहाळ ताळ सम्मिश्रैः दुन्दुभेः सिन्धुनिस्वनैः॥19॥ |
| तौर्यत्रिकैः नृत्त गीतैः वादित्रैर्भृत्य संस्तवैः।<br>भाति त्रिविक्रमोयं मे मनोरथ महोत्सवे॥20॥ |

| |
|---|
| पुरोडाशाशनैः सम्यग्गीडितः क्रीडया हरिः।<br>रथस्थ गुरुडारूढो देवराट् भाति निश्चयात्॥21॥ |
| चतुर्वीथीषु भृत्येन कारितः सुविशेषतः।<br>रथे गच्छन् मम मनोरथैः कृत महोत्सवे॥22॥ |
| महा प्रदीपावलिभिः कोलाहल महास्वनैः।<br>कृतैः करतलैः शब्दैः भाति भक्तसुपालकः॥23॥ |
| देव दुन्दुभयो नेदुः जगुर्गन्धर्व किन्नराः।<br>ननृतुश्चाप्सर श्रेष्ठाः रथस्थे च त्रिविक्रमे॥24॥ |
| दिवा दिनकरायुत प्रभः प्रियान्वितः प्रभुः।<br>रथोपरि प्रियातीह प्रकीर्ण विधिषु प्रियः॥25॥ |
| विमानं संस्पृशन्तीह सुमानव ममाप्यहो।<br>विसर्जिता इमेबाणाः नारायण रथोत्सवे॥26॥ |
| ब्रह्म रुद्रेन्द्र पूर्वैश्च गीर्वाणेन्द्रैरपीदृशः।<br>महोत्सवो न सन्दृष्टः कर्मन्दीन्द्र कृतोत्सवे॥27॥ |
| सन्तो वसन्तवारीणि नारायण रथोत्सवे।<br>सुवर्ण कुम्भैरानीय चाम्बोधिशयनं हरिम्॥28॥ |
| स्नापयामासुराश्वेनं प्राश्निकैरपि कात्स्न्यतः।<br>स्नानेन शुद्ध वृद्धास्ते तत्र सम्प्रश्न कोविदाः॥29॥ |

| |
|---|
| सन्तो वसन्तं अभ्युदवस्यन्तीति श्रुतिप्रियाः।<br>सन्ततं चक्रिरे सर्वे वसन्तेनान्तिमोत्सवम्॥30॥ |
| स कुङ्कुमरसैः स्निग्धै महारजत वारिभिः।<br>कस्तूरी कर्पुराद्यैस्तैः मिश्रितैर्हिम वारिभिः॥31॥ |
| दिव्यगन्धोदकैरङ्ग दिव्य मन्दार गन्धिभिः।<br>दिव्य द्रव्य समायुक्तैः दिव्य कुम्भ प्रपूरितैः॥32॥ |
| दिविजा दिविजेन्द्राग्रे दिवि देवैर्दिवोत्सवे।<br>दिवाकरे समुदिते दिवि देवोत्तमाज्ञाया॥33॥ |
| धर्मराज कृते राजसूये राजपुरोहिताः।<br>राजानः सद्विजाश्चावभृतं सस्नुर्यथा तथा॥34॥ |
| जगुर्गन्धर्वपतयो गान्धर्वे च विशारदाः।<br>ननृतुश्चाप्सर श्रेष्ठाः नृसिंहस्य महोत्सवे॥35॥ |
| देव दुन्दुभयो नेदुर्बन्दिनो वन्दनोत्सुकाः।<br>नन्दनाद्य श्रुणुष्वेह शतानन्द महोत्सवे॥36॥ |
| वागीश पूर्वकास्सर्वे सस्नुश्चावभृतं ततः।<br>एवं देवाश्च देव्यश्च रथोत्सववरे हरेः॥37॥ |
| दिवाकरे समुदिते दिवि देवोत्तमाज्ञया।<br>धर्मराज कृते राजसूये राजपुरोहिताः॥ |

राजानः सद्विजाश्च अवभृतं सस्नुर्यथा तथा।

इमं सार्धं च श्लोकं च त्यक्तवानसि विप्रक।

पाकशासन  लोकं च नाखिभिर्नीयते कृतिः॥38॥

अतः प्रमादो मा ते मे कुमारं स्मर ब्राह्मण।

सुमानवं प्रभावन्तं क्रमात् मत्साम्य सम्भवम्॥39॥

त्रिकोटि यतिषु श्रेष्ठं मुकुटेनाङ्कित प्रियम् ।

सोहं समीडित गतिः पाठकैः शिष्ट नान्यथा॥40॥

पश्यामि चाकाश विमान कोशे नाकीशमित्थं सुत सत्यमेव।

कीनाश लोकस्य च नाशकोहं तोकस्य सेवां कुरु सर्वदेव॥

इतः परं कुरु सुत मम पुण्य दिनं महत्।

गदाभृतः सदा पादं हृदा ध्याये मुदा भजे॥42॥

बुधादृतं कदाचिद्वाऽपदालस्य मदा न मे।

एवं महोत्सववरं श्रुत्वा सर्वेऽपि वर्णितं॥43॥

कर्णामृतं महाभाग कृतार्थास्ते न संशयः।

श्रद्धान्वितो हयग्रीव भक्तस्य सुमहात्मनः॥44॥

हे नन्दन आनन्दपूर्णो भवामि तव दर्शने।

कन्दाशन सहायेनाऽमन्द वृन्दावनेऽनिशम्॥45॥

तस्मात्त्रिकोटि यतिभिः त्रिविक्रम रथोत्सवे।

त्रिवेद वेद्यं दृष्ट्वा च त्रिवारमपि नैव मे॥46॥

| |
|---|
| तृप्तिर्नजाता मज्जात कुब्जापतिपरायण।<br>धिग्जाड्यं तु प्रजानां च न जातु मम साम्यगाः ॥47॥ |
| त्वां विना साम्य संयुक्तं मां विना काम्यमागतम्।<br>को मानवो न जानाति विमाने मम साम्यगः ॥48॥ |
| तस्मान्मयि त्वमप्यत्र ह्यमुत्रापि त्रिविक्रमे।<br>सुत्राम पूजिते पुत्र भक्तिं कुरु गुरूदिताम्॥49॥ |
| इतः परं पारिबर्हं दातुमर्हसि मेऽर्हतः।<br>गर्हितं नार्हयाम्यद्धा बर्हिषद्धर्षणं कुरु॥50॥ |
| इतः परं पारिबर्हं गर्हितं दातु मर्हसि।<br>न मेऽर्हतो बर्हिषदां हर्षं कुरु गुरूक्तितः ॥51॥ |
| सुखीभव सखायं मां मखाग्रेणापि पूजय।<br>शिखारहित ते दुःखावाप्तिर्न च नखादपि॥52॥ |
| नरके नरकान्तं च स्मरत्वं नरकेसरिम्।<br>गुरोर्ममापि कारुण्यं ग्रहाणेह सुपुत्रक॥53॥ |
| हे नन्दन भोजनं मे जातं कर्मन्दिभिः शनैः।<br>वृन्दावन पतेः सम्यक् मृष्टान्नं मम तद्दिने॥54॥ |
| अतस्त्रिकोटियतिभिः प्रीतोस्मि तव पुत्रक।<br>त्रिविक्रमोपि सुप्रीतश्चासीत् त्वद्भक्ति सत्कृतः ॥55॥ |

| |
|---|
| हे विप्र मम पुत्रस्य प्रसिद्धिः सुप्रतिष्ठिता।<br>प्रजासु प्राप्त कामोहं अभवं नात्र संशयः॥56॥ |
| ब्रह्मेश शक्र मरुदंश भवैस्सुरेन्द्रैः<br>देवैस्समस्त यतिभिः पतिभिस्सुराणाम्।<br>दृष्ट्वारथोत्सववरं सुरवर्य कार्यम्<br>स्वर्यामि शश्वदवनात् सुचिराय जीव॥57॥ |
| मम वृन्दावनं धीमन् कन्दाशन मदाञ्जनम्।<br>सदानन्दं ददामीति वदन् कर्मन्दि नामभूत्॥58॥ |
| अतः कर्मन्दिभिर्वन्द्यं वन्ध्यानन्दनदं बुध।<br>गन्धद्वारानन्ददं च मुकुन्दस्यापि नन्दन॥59॥ |
| यतयः कृतिनोवृत्त प्रवृताः शास्त्रवित्तमाः।<br>अमत्ता आपतन्तीह सती च स्वपतिं यथा॥60॥ |
| तस्माद्यति कुलैः सेव्यं मतं लैङ्गिक मार्गिभिः।<br>कृतालौकिक कृत्यैश्च वृथा लौकिक वार्तिका॥61॥ |
| कुतः सत्यं तपस्तप्तं जप्तं दत्तं मतं तथा।<br>वृथायत कृताचाराः ये न सेवन्ति सात्वतम्॥62॥ |
| तस्माद्वृन्दावनस्थं च सात्वतां पतिमव्ययम्।<br>गोपतिं गोकुलपतिं गोपीनां पतिमापतेत् ॥ 63॥ |

एतत्सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वैविप्रवर्यास्यजेन।

श्रुत्वाचोर्व्यां शर्वं गुर्वादि देवान्

दृष्ट्वोर्वशिं यान्तु मां मानवेन्द्राः॥64॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥65॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

यच्छ्रुण्वतां भक्तिरुदारसद्गुणे हरौ  हरेर्लोकगते  तथा मयि।

भवत्यहो सर्वशुभाप्ति  सन्मतिं ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलक श्रीवागीशतीर्थ श्रीमच्चरण करसञ्जात श्रीवादिराज चरणोदित

ब्राह्मणस्वाप्नवृन्दावनाख्याने स्तोत्र भागे द्वितीयोऽध्यायः  ॥2॥

## ॥ अथ तृतीयेऽध्यायः॥3॥

दास्यत्ययं मनुं दिव्यं वादिराज इतीरितम्।

दास्यत्ययं मनुं दिव्यं वादिराज यतीरितम्॥1॥

ओं श्रीकारद्वयेनापि पूर्वापरसमन्वितम्।

नमः शब्दश्चतुर्थ्यन्तं गुरुशब्दैश्च मिश्रितम् ॥2॥

ग्रहाणत्वं च विप्रेन्द्र सर्वां सिद्धिमवाप्स्यसि ।

यन्मन्त्र भीरवः सर्वे ग्रहा यान्ति दिशो दश॥3॥

सोहं महानुभावोत्र नग्रहोथ बलिग्रहः।

यद्गुणोच्चारणादेव पापसङ्घातपञ्जरम्॥4॥

जहाति मर्त्यः सतत स पापी तु कथं भवेत्।
यत्पादस्मरणान्नित्यं नराः सुकृतिनः सदा॥5॥

सोहं पुण्यतमः शुद्धः सततं नात्रसंशयः।
योमां ग्रहं विजानाति तस्य पुण्यं हराम्यहम्॥6॥

स याति नरकं घोरं यावद्ब्रह्मा चतुर्मुखः।
योमां देवं विजानाति ऋजुस्थं पुण्यकृन्नरः॥7॥

स याति निलयं पुण्यं यद्गत्वा न निवर्तते।
आत्मस्तोत्रं न कर्तव्यमहङ्कारेण धीमता॥8॥

अज्ञानां बोधनार्थाय कर्तव्यं नात्र संशयः।
हरिद्रोह गुरुद्रोह सुरद्रोह हरेपरे।
गिरि गह्वर कासारे तपः कुर्यां हरेरिति॥9॥

गिरिजापतिमाराध्य विरजार्कायुत द्युतिम्।
सुरजातचरं देवं अरिजात हरं परम्॥10॥

गुरुजातमतिं लिप्स नरजातिं समुत्सृजे।
हरिजात गुणान् ध्याये करजाताभयं लभे॥11॥

तेन च ब्रह्मणा साकं हरिमाराध्य भूरिशः।
ताभ्यां महानुभावाभ्यां मुच्येहं कर्मबन्धनात्॥12॥

एतां कृत्वा शिलायां मम कृतिमथ च स्थापयेत्तां च दृष्ट्वा
सन्तस्सन्तोषभाजः सुमति दमशमैर्युक्तं आत्मानमीशम्।
ज्ञात्वा देवेषु मुख्यं शुभगुणसुमुखं नित्यनिर्धूत हेयम्
मामेवं सद्गुणाढ्यं शुभविततगतिं यान्तु सन्तः सदा ते॥ 13॥

पञ्चाशत् योजनानां तु विस्तीर्णं कार्तभास्वरम्।
हंसवाहन संयुक्तं जाम्बूनदमयं शुभम्॥ 14॥

हेमराशि प्रतीकाशं हेमाद्रि शिखरोपमम्।
नाना मणिमयं दिव्यं नानामाल्योपशोभितम्॥ 15॥

नानोपहार बलिभिः जयशब्द पुरस्कृतैः।
नाना मुनिगणैर्दिव्यैः नाना देवगणैस्तथा॥ 16॥

गन्धर्वैरप्सरोभिश्च सेव्यमानं समन्ततः।
गीतवादित्र नृत्यैश्च छत्र चामर पूजितम्॥ 17॥

वितानैरर्कवर्णैश्च सेव्यमानं समन्ततः।
भक्ताभयकरं दिव्यं भुक्ति मुक्ति प्रदायकम्॥ 18॥

अमृतानां सुपानैश्च सोमपानैस्तथैव च।
सुरभि क्षीरपानैश्च सेवितं नित्यमेव च॥ 19॥

विमानं दिव्यमानं च दीप्यमानं सदायनम्।
वृन्दावनोपरिगतं पूजयन्तु सदा मम॥ 20॥

| |
|---|
| अहं सदा देवसभा सुभाजितः<br>सुभास्वरैर्दिव्य विभूषणैर्युतः।<br>अहं समानैस्सुरमानि मानितः समानयुक्तैस्सुमनोभिरञ्जसा॥21॥ |
| गुरुमखिल गुणज्ञं सद्गुणैकाधिवासम् |
| शम दम परिनिष्ठं सत्वनिष्ठं वरिष्ठम्।<br>सकल  सुजन शिष्टं नित्य निर्धूत कष्टम् |
| हयमुख पदनिष्ठं मां भजन्तु प्रपन्नाः॥22॥ |
| मच्छिष्य मध्ये मद्भक्तियुक्तो यश्च मदाग्रही।<br>मत्सम्प्रदाय संयुक्तो मन्मन्त्र जपशीलवान्॥23॥ |
| मत्कृतिं न श्रुणोत्यर्थं न जानाति न तुष्यति।<br>न पूजयति मत्पीठं न करोति सदा शुचिः॥24॥ |
| स च विप्र बहिर्भूतो मद्रोह फलभाक् स्वयम् ।<br>पितृभिस्सह मज्जेत नरके न च मामकः॥25॥ |
| इतः परं कियज्जन्म जातः प्रेक्षति मत्कृतिम्।<br>अवशिष्टं तु वक्तव्यं मुक्तिं यास्यामि सद्गतिम्॥26॥ |
| नन्दने च वने रम्ये स्यन्दनेऽमन्द नन्दने।<br>इन्द्राण्येन्द्रेणचानन्दी मन्दाकिन्यां रमाम्यहं॥27॥ |
| तथैव नन्दनप्रख्ये मम वृन्दावनेऽनिशम्।<br>रमामि रमया देवैः हयग्रीवेण चान्विते॥28॥ |

नन्दन स्यन्दनाकारे मम वृन्दावनेऽनिशम्।
वन्दनं नन्दनार्थं ये कुर्वन्तु गुण नन्दिनः॥29॥

तस्माद्वृन्दावनमिदं सर्वाभीष्टप्रदं सताम्।
वृन्दावनाख्यं मम मन्दिरं सदाकन्दाशनानन्द पदं सुधीमताम्।
वृन्दारकाणामिव मन्दराद्रिःसन्दर्शनानन्द सुधां प्रदद्यात्॥30॥

वृन्दावनं सदवनं सदनं ममेदंइन्द्रानुजस्य सदनं मदनस्य चेदम्।
वृन्दारकेन्द्र भवनं परमस्य चेदं नन्दादि पार्षदगणायनमेव चेदम्॥31॥

मेरौ मारमणं दृष्ट्वा रममाणो रमापतेः।
करकञ्जं रमायाश्च शिरसा मानयाम्यहम्॥32॥

ऊर्वश्याद्यप्सरस्त्रीणां शर्वस्यार्धाङ्गि सन्निधौ।
गर्वस्यार्थं कृतं नृत्तं सन्दृश्याम्यत्र चाद्भुतम्॥33॥

कैलासे पर्वतश्रेष्ठे सविलासेक्षणा स्त्रियः।
पलाशोक्षित चार्वाङ्ग्यः कैलासे पीत पौष्पिकाः॥34॥

नर्तनं प्रेरयन्त्यो वै कर्तनद्युतिसन्निभाः।
मदनं प्रेक्षकाश्चात्र प्राप्नुवन्वै मया विना॥35॥

हरस्य करकञ्जं च हरेश्चक्रधरं करम्।
अहङ्करभ्यां सङ्गृह्य तयोरन्तरगस्सदा॥36॥

तथैव ब्रह्मणो लोके ब्रह्मानन्दात्मकं हरिम्।
हंसवाहन संवीजच्चामरं चारुहासिनम्॥37॥

हयग्रीवं सुराग्रण्यं हार केयूर धारिणम्।
दृष्ट्वा मन्नयनानन्दं मग्नश्चानन्द वारिधौ॥38॥

एवं जनि शतावृत्त्यातद्भक्त्या तत्प्रसादतः।
लक्ष्मीकटाक्षतश्चाहं मुच्ये तत्कुक्षिगः क्षणात्॥39॥

स्वर्गे चस्वर्धुनीं यायां स्वर्गिणां स्वागतेन च।
स्वाराज्यपतिना सम्यक् स्वर्चितश्च स्वराडहम्॥40॥

स्वर्गादूर्ध्वं हरेर्मार्गं गत्वानर्घ्यं सुशीघ्रतः।
ब्रह्मणोधाम निस्सीमं अमानव समन्वितम्॥41॥

नमामि स्वामिनं मारतातं माकान्तमव्ययम्।
वसामि सुचिरं तत्र विरिञ्चेन चिरं रमन्॥42॥

वैष्णवं धाम निस्सीमं ततो यास्याम्यमायया।
एतत्ते कथितं विप्र सुप्रसन्नो भवामि ते॥43॥

पुत्र सुत्राम लोकोयं सत्राद्यैः कर्मभिर्भवेत्।
वैष्णवं धाम चाव्यक्तं योगिनामपि दुर्लभम्॥44॥

सुलभं मम तत्सर्वं हरेर्ज्ञानादि साधनैः।
एवं सुमानं सुमनोभिरञ्जसा सञ्ज्ञातमग्र्यं सुजनार्य सर्वम्॥45॥

कञ्जाक्ष गृह्णामि चिरं तु जीव त्वंजीवलोके कुजनार्तिदः सन् ॥46॥

मम वृन्दावने पुण्ये सुपर्वाणश्च नित्यशः।
वसन्ति पुण्य कर्माणो विशेषात्ते च पर्वसु॥47॥

| |
|---|
| तस्माद्वृन्दावने पुण्ये पञ्च पर्वसु पूजनम्।<br>दर्शनं सुजानानां तु सर्वाघौघ विनाशनम्॥ 48॥ |
| एतद्रहस्यं मम पुत्र पश्यन् त्वं सुप्रसिद्धिं कुरुसत्सु नित्यम्।<br>श्रुण्वन्तु सर्वे सुजनाश्च मत्कृतिं सर्वेष्ट दात्रीं शरणागतानाम्॥ 49॥ |
| इदमद्भुतमाख्यानं मम वृन्दावनस्य च।<br>श्रृण्वतां पठतां वापि सर्वाभीष्टप्रदम् सताम्॥ 50॥ |
| इदं तु संशयवतां नतु शंस कदाचन।<br>विश्वासिनां तु शंस त्वं शेषशायिसदात्मनाम्॥ 51॥ |
| इदं समाप्तं मम शोभनम् महत्वृन्दावनाख्यानमनुत्तमं नृणाम्।<br>यच्छ्रुण्वतां भक्तिरुदार सद्गुणेहरौ हरेर्लोकगते तथा मयि ॥52॥ |
| भवत्यहो सर्व शुभाप्ति सन्मतिम्ददात्यजस्रं सुत सत्यमेव तत्।<br>अतः सतां त्वं वद मत्कृतिं सदा शुभाप्तये ते च ममात्र कीर्तये॥ 53॥ |
| वेदवेद्य निरवद्य मद्दयावारिधे कदन कोविद् वादिभिः।<br>त्रिदशवन्द्य हयशीर्षसद्मनि स्यन्दनेन विहरामि नन्दन॥ 54॥ |
| चिरं जीव चिरं जीव सखी भव सुखी भव।<br>ममाशीर्वचनेनैव हयग्रीवपरो भव॥ 55॥ |
| नन्दन स्यन्दनाकारे मम वृन्दावनेऽनिशम्।<br>वन्दनं नन्दनार्था ये कुर्वन्तु गुणनन्दिनः॥ 56॥ |

अलौकिकैरदृश्यार्थैः लौकिकैः श्लोक भावितैः।

अलोकिकानुवाक्यैश्च लौकिकैर्वाक्य विस्तरैः॥57॥

लौकिकालौकिक जन साधारण्येन मत्कृतम्।

इदं वृन्दावनाख्यानं श्रुत्वा सर्वेपि लौकिकाः॥58॥

लौकिकालौकिक फलं प्राप्नुवन्ति न संशयः।

अप्रयोगेति भासन्ते ते सर्वेपि ह्यलौकिकाः॥59॥

सुप्रयोगेति भासन्ते ते सर्वेपि तु लौकिकाः।

तस्मान्नकार्या दोषस्य शङ्का शूका सुबुद्धिभिः ॥60॥

विश्वासः सर्वदा कार्यो मत्कृता च सुनिश्चयात्।

सुरराज प्रसादेन अमरराजो भव द्विज॥61॥

वादीभ मृगराजोहं वादिराजो हरिं भजे।

अनेक मूर्तिभिर्युक्त स्थौल्य सौक्ष्मादिभिर्वृतः॥62॥

अणिमाद्यष्ट सिद्धोहं हयग्रीवस्य चाज्ञया ।

वृन्दावने च मम नन्दन कानने च।

कैलास मोरु शिखरेषु तथैव नाके ॥63॥

सत्याख्य दिव्य भवनेच विरिञ्चरम्ये।

द्वीपे चरामि हरिणासह दिव्यधाम्नि॥64॥

| |
|---|
| ब्रह्मेश शक्र सुरकार्य धुरन्धरैश्च देवैस्समस्त यतिभिः पतिभिः सुराणां।<br>दृष्ट्वा रथोत्सववरं सुरवर्य कार्यम् स्वर्यामि शश्वदवनात् सुचिराय जीव।<br>कर्तुंचाकर्तुमप्येवं अन्यथा कर्तुमेव च।<br>समर्थोहं न सन्देहश्चेश्वरस्य सदाज्ञया॥65॥ |
| अहं महानुभावश्च सर्वसम्पद्विधायकः।<br>कालश्चायं कलिरितिह्यौदासीनं कृतं मया॥66॥ |
| परीक्षार्थन्तु भक्तानां  उक्तं नैतदपेक्षया।<br>अहं मन्ये धनं धान्यं तनु चापि तृणोपमम्॥67॥ |
| कनकं शनकैर्हित्वा म्रियते शुनकोयथा।<br>जीवश्चायं तु कञ्जाक्ष मञ्जीरमणि मौळिनम्॥68॥ |
| स्जानाति न सञ्जीवन् पुञ्जीकृत सुपापधीः।<br>वैराग्याभरणश्चाहं करि सन्त्राणकारिणम्॥69॥ |
| वरुणाद्गोपतित्राणं मरणात्यांग तोरणम्।<br>यमदण्डोपमश्चायं मम दण्डोपि पण्डितः॥70॥ |
| ब्रह्माण्डारम्भ शौण्डोयं मद्धोर्दण्डैकमण्डनम्।<br>मम कौपीनमप्येतत् पापिनं पाप यत्यहो॥71॥ |
| गोपीनां पतिना दत्तं पीताख्यं पाणिनिर्मितम्।<br>माणिक्यानान्तु श्रेणीभिः शोणाच्छोणित शोभिनाम्॥72॥ |

खचितं चार्चितं हंसैः याचितं याचकैस्सदा।
यतीनां पतिना दत्तं कृष्णेनाद्भुतकर्मणा॥73॥

नारदस्याप्यदत्वा तु मय्येवानुग्रहार्थिना।
सूत्रं कटितटे भाति गात्रमध्ये मम द्विज॥74॥

कात्र कीर्तिर्यतीनां तु शास्त्रसिद्ध विधिं विना।
वामनादाप्तवान् कामं कमनीयं कमण्डलुम्॥75॥

शमनं क्षुत्पिपासे चाप्यमृतोपम वारिणा।
कम्बलं रत्नजम्बालं चाम्बरं शाम्बरं तथा॥76॥

शम्भुना सम्भ्रमादाप्तं कुम्भराक्षस भङ्गिना।
पादपीठे हटात्प्राप्ते दिव्यरतन् सुघट्टिते॥77॥

त्वष्ट्रा च विठ्ठलादेशात् काठिण्यरहिते शुभे।
एवं सर्वाणि वस्तूनि वस्त्राद्याभरणानि च॥78॥

देवैरप्याप्तवान् कामं औदासीन्य विवर्जितैः।
मत्कृतौ यस्य विश्वासो नास्ति तस्य यशः श्रियः॥79॥

आयुष्यं श्रवते भिन्नघटान्तस्थोदकं यथा।
इमं श्लोकं तु विप्रेश सर्वदा सज्जनेष्विह॥80॥

वदस्व त्वं मदीयेषु मद्दया विषयेषु च।
विप्राणावधिर्यावत् सत्प्रमाणाविरोधतः॥81॥

तद्वाण्याच प्रवक्ष्येहं मद्वाण्याविष्टयानया।

मत्कार्यं विप्र कार्यं वा न जानासीति बुद्धिमन्॥82॥

क्रोधोपि मम नास्त्येव त्वं चिरं जीव पुत्रक॥83॥

विप्रार्थमेव सच्छास्त्रं वक्ष्येऽहं श्रुणु पोतक।

श्रुत्वा सर्वं च सद्धर्मं हृदिस्थं कुरु सर्वदा॥84॥

अयन्तु ब्राह्मणः श्रीमान्मामेव शरणं गतः।

वृन्दावन कृते पूर्वं स्वस्याभीष्टं निवेद्य मे॥85॥

शरणागतनिर्हरणं मरणं च विदुर्बुधाः।

करुणाकर तत्प्राणं करणं सर्व कर्मणाम्॥86॥

अहं वित्तानि दास्यामि चेति बुद्धिः प्रजायते।

कालश्चायं कलिरितिह्यौदासीन्यं कृतं मया॥87॥

सुराणां तु मनुष्याणां दर्शनं स्पर्शनं तथा।

सम्भाषणं च सम्बुद्धे नैव धर्मोत्र जातुचित्॥88॥

अथापि विप्रवर्येस्मिन् वक्ष्ये मम कलेवरम्।

पूर्वानुभव संस्कार कारणाद्विद्धि बुद्धिमन्॥ 89॥

तदेव मत्केलेवरं द्विजस्य यत्कलेवरं

तदेव मत्कलेरितं द्विजस्य यत्कलेरितम्॥90॥

तदेव कल्पनेरितं द्विजस्य कल्पनेरितम् ।

सुखस्य भोक्ता तद्देहे नासुखस्य कदाचन॥91॥

| |
|---|
| सुखस्य कर्ता तद्देहे नासुखस्य कदाचन।<br>स्माच्छसुखभोक्तृत्वं सर्वदा मे नचान्यथा॥92॥ |
| मार्ताण्ड मण्डलाभा द्वे कुण्डले पुण्डरीकिणा।<br>प्राप्तेभ शुण्डादण्डेन पण्डितेन विडम्बिना।<br>शतपत्रोपमं छत्रं रत्नदण्ड विचित्रितम्।<br>वृत्रस्य शत्रुणा गोत्र भेत्त्राचाप्तं शशिप्रभम्॥93॥ |
| चामरे चामरेशेन रत्नदण्डे शशिप्रभे।<br>सामरे सामरे लोके प्रेषिते मम पार्श्वयोः॥94॥ |
| मया पीठं हटादाप्तं तटिन्निभ सुपौरुटं।<br>त्वष्ट्रासु घट्टितं रत्न कोटिभिः कठिने तरम्॥95॥ |
| एवं सदा दिव्य महा विभूतिभिः संसेव्य मानः त्रिदशैः ममानुगैः।<br>विरिञ्च लोके सुचिरं रमन्मुदा रमामि लोकेपि रमापतेः प्रिये॥96॥ |
| नन्दनं ते शतानन्द मुकुन्दावसितं वदन्।<br>नन्दगोपसुतामन्दानन्दात्मन् पाहि नन्दनम्॥97॥ |
| ध्रुवं वातेन सन्त्यक्तं पीतं तच्छघटामृतम्।<br>नारदाच्छारदामूर्तिं पाहि तं मत्सुतं तथा॥98॥ |
| मुकुन्द कुन्द कुड्मल दन्तपङ्क्ति विराजित।<br>नन्दगोप सुतामन्दा नन्दात्मन् पाहिनन्दनम्॥99॥ |

| |
|---|
| यत्प्रेरणां विना सोऽयं ब्राह्मणः पुण्यकीर्तन।<br>एकं वा वक्ष्यति श्लोकं तर्हिदं तत्कृथं भवेत्॥ 100॥ |
| परीक्षां कुरु तच्छक्तिं वाग्भूति विषयां सुत।<br>स्वाप्न श्लोकं विना चैकं श्लोकं वक्ष्यति वानवा॥101॥ |
| मुकुटं रत्न सत्कूटं हाटकाद्रिरिति स्फुटम्।<br>भाति पौरुट भूयिष्टं कोटिसूर्य सुपाटवम्॥102॥ |
| सुवर्ण पूर्णे मम कर्मभूषणे गणैर्मणीनां तु झणझण ध्वनिः।<br>गलस्थ हारावलभिः सुमेलने  त्वासीत्तथा चालकसंस्थ मौळिना॥103॥ |
| एतत्सर्वं  स्वाप्नपद्येन गर्वं  हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥104॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥ 105॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥106॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीददात्यजस्रं सुत सत्यमेव तत्॥ |

इति श्रीमत्कविकुलतिलक श्रीवागीशतीर्थ श्रीमच्चरण करकमल सञ्जात श्रीमद्वादिराजपूज्य चरणोदित ब्राह्मण स्वाप्न वृन्दावनाख्याने अलौकिकविभागे  तृतीयोऽध्यायः  समाप्तः॥

## ॥ अथ चतुर्थोऽध्यायः ॥4॥

ओं वादिराजाख्यसन्मन्त्रं सदा भज मदाद्विना।
कदापि तव दासत्वे संशयो न वदादरात्॥1॥

नूपुरे तूपरि प्राप्ते श्रीपरीते च रूपिते।
का परीक्षा परेशेन चापारैर्या निरूपिता॥2॥

अङ्गदे भङ्गदेरिणां सङ्गदे सर्वदा हरेः।
अङ्गदेशे विराजेते तुङ्गहेम ममाङ्गज॥3॥

मम केयूरमप्येतत् वायुरूपं शिवायुतम्।
मयूररवतो नित्यं वायुत्वं तस्य व्यक्त्यहो॥4॥

मुद्राङ्गुलीयकं रुद्राक्त्यद्याः पुत्रेण चादृतम्।
अद्राक्षं द्रागभद्राणि द्रावयेद्राज्यदं द्रुतम्॥5॥

हस्ताङ्गुलीयकं शस्तं समस्तै रत्ननिर्मितम्।
प्रहस्तादपि तं रामः स्वहस्ताच्च ददौ मुदा॥6॥

वरुणो दत्तवान् कामं मरणाद्रहितस्य मे।
करणं सर्वरत्नानां किरणाद्रञ्जनं दिशः॥7॥

जनैरवेद्यविभवं स्फुटीकर्तुं द्विजस्य मे।
कुरु मद्वचनात्तोषं तत्तोषेऽहं सुतोषितः॥8॥

कटकं हाटकमयं मम सद्रत्नकोटिकम्।
काठकं पाठकैराप्तं हाटकाद्रौरविप्रभम्॥9॥

| |
|---|
| गले हारावलिर्भाति ताराणां तु केळेव मे।<br>मिळिता चेन्द्रनीलैश्च पुलकाङ्कं करोत्यहो॥10॥ |
| एवं सदाऽसङ्ख्यसुखैश्च संयुतो मुखैर्दुरापैः खगमुख्यदैवतैः।<br>दुःखैरसम्भिन्नतरैश्च शश्वत् प्रमोदते देववरो मयि प्रभुः॥11॥ |
| काञ्चनीयाञ्चनीयां तु काञ्चनीयान्मयाञ्चनात्।<br>मां विना तां विना नाकी नाकित्वं नैति नान्यथा॥12॥ |
| चामीकरमयो मेरौ स्वामी करतलेन मे।<br>कामे रतमुनीन् हित्वा मामेवाग्रे परामृशत्॥13॥ |
| मेरौ नारायणो यस्य कारुण्यं मे परायणं।<br>रमायाः मां करे प्रादात् कुमारोऽयमिति ब्रुवन्॥14॥ |
| मर्त्यलोकं तु हित्वाहं सत्यलोकमितोऽगमम्।<br>श्रुत्यभावं कर्तुकामो दैत्यः कश्चिद्धतो मया॥15॥ |
| नाकेऽपि सर्वलोकेशाः पाकशासनपूर्वकाः।<br>पिनाकी च मया साकं शोकहीनं चतुर्मुखम्॥16॥ |
| दत्वा गत्वा करं तस्य स्तुत्वा श्रुत्वा सुधामयीम्।<br>वाचं शोचन्तमात्मानं पाप्मानं च जहूरः॥17॥ |
| नरैश्च दत्ताचार्यत्वेऽप्यनेकापि सुमान्यता।<br>भवतीह न सन्देहस्तच्छिष्यैः सर्वथा सुत॥18॥ |

| |
|---|
| लोकैकगुरुणा दत्ताचार्यत्वेनतु न कश्चन।<br>मानो न जातो विप्रस्य जातो हास्यत्तरं तु किम्॥19॥ |
| एवं हास्यास्पदं चैतन्न कुरुष्व मम प्रभो।<br>विप्रान्तर्यामिणः पूर्णपुण्यस्य तु गुणार्णव॥20॥ |
| त्वया कृते तु सन्माने सर्वे कुर्वन्ति मानवाः।<br>मानं मौनवतां श्रेष्ठ कुरु मच्छासनं मुने॥21॥ |
| लोकानां गुरुणोक्तं तु श्लोकानां तु चतुष्टयम्।<br>काकानामिव वाक्यानि शोकानां हरणे न भूत्॥22॥ |
| हे विप्र दिव्यकटिसूत्रशुभाक्षसूत्र सच्छास्त्रवृत्तिभिरहो प्रतिभासि मे त्वम्।<br>मद्दत्तमन्त्र जपतः सुकृतैकपात्र वृत्रस्य शत्रुपदवीं जितवानितीव॥23॥ |
| अग्र्यासने सुनिहितं मम पादपीठं |
| सम्यक् प्रपूज्यं विधिवत्परमप्रकाशम्।<br>तस्याग्रतः परमदर्शनगुह्यसारम् व्याख्येयमेयमनिशं प्रदिशामि तेऽद्य॥24॥ |
| आयुर्वचः श्रियं क्षेमं विद्यां च तव सर्वदा ।<br>दशग्रीव शिरोहर्ता मणिग्रीवाभयप्रदः॥25॥ |
| हयग्रीवो मम ग्रीवाभरणानि ददौ मुदा।<br>सोदापुरेपि हि सदा मुदा मम गदाधरः॥26॥ |
| पादाङ्गुलीयकं प्रादाद्वादान्निर्जितवादिनः।<br>एवमाभरणानां तु कारणानि शरीरिणाम्॥27॥ |

| |
|---|
| श्रुत्वा मच्चरणानां तु श्रोतॄणां सुखदानि च।<br>एवमाभरणायाशाः किरणाद्रञ्जनानि मे॥28॥ |
| श्रवणात्सर्वपुण्यानि प्रापयन्ति मनीषिणाम्।<br>इन्द्रो ममेन्द्रनीलाढ्यं सान्द्रनीलाम्बुदप्रभम्॥29॥ |
| उपेन्द्रेरितहस्तीन्द्रं चतुर्दन्तं ददौ मुदा।<br>तथैव शुभ्राभ्रप्रभायुक्तमेकं प्रबर्हकम्॥30॥ |
| प्रददौ मत्प्रियं विप्र प्रयुतौजसमप्यहो।<br>उभौ तु दन्तिनौ पुत्र गच्छन्तौ वै ममाग्रतः॥31॥ |
| वायुवेगमनोवोगवन्तौ कान्तौ महोन्नतौ।<br>अहं तु धृत्वा द्वे रूपे त्वावारुहमहो मुने॥32॥ |
| चरामि सर्वलोकेशान् करोमि मम पूजकान्।<br>तल्लोकपतिभिः साकं सल्लापैः हितोऽगमम्॥33॥ |
| तेषां सन्दर्शयाम्यद्य मद्वृन्दावनवैभवम्।<br>वाजिनां भ्राजमानं वै देवराजश्च मे द्विज॥34॥ |
| समाजे निर्जराणां तु सौजन्याद्वै ददौ मुदा।<br>तमश्वं निश्वमप्यश्वं शश्वद्वायु मनोजवम्॥35॥ |
| सुस्वरं भास्वरं पार्श्वे कार्तस्वरविभूषितम्।<br>आहमारुहमाहार्यनीहारमिव लाघवात्॥36॥ |

| |
|---|
| मनोजवेन शर्वादीन् सर्वान् वै देवतागणान्।<br>गत्वा श्रुत्वागमं भूमिं तै साकं नाकिभिः सुतः॥37॥ |
| तेषां सन्दर्शयाम्यद्य मद्बृन्दावनवैभवम्।<br>एवं विमानं सन्मानं कृत्वा मे दानवान्तकः॥38॥ |
| भानु तेजोनिभं प्रादात् कीनाशेन सुमानितम्।<br>किम्वन्तकाशीति वाक्यान्नह्यन्तक भयं च मे॥39॥ |
| इति बुद्ध्या मयाचोक्तं कीनाशेन सुमानितम्।<br>अहं देदीप्यमाने च विमाने मानवोत्तम॥40॥ |
| मानितः सुमनोभिश्च कनकाम्बर भूषणैः।<br>तद्गतानां तु देवानां मद्गतैकमनोयुजाम्॥41॥ |
| तेषां सन्दर्शयाम्यद्य मद्बृन्दावनवैभवम्।<br>नानावाहनसंस्थोहं नानामानैः सुमानितः॥42॥ |
| नानामणिगणैर्नित्यं नाना मुनिगणैस्तथा।<br>गन्धर्वैरप्सरोभिश्च किन्नरोरगराक्षसैः॥43॥ |
| सिद्धैः साध्यैर्मरुद्भिश्च बद्धस्नेहैः सुबुद्धिभिः।<br>किमत्र बहुनोक्तेन मद्वैभव समो नहि॥44॥ |
| एवं महा वैभवमेव भोक्ष्ये सभासु भास्वत् प्रतिमं ऋभूणाम्।<br>महानुभावस्य मधुद्विषः सदा भक्तस्य किं चित्रममुत्र वैभवे॥45॥ |

| |
|---|
| एतत्ते लेशतश्चोक्तं मम वैभवराशितः। <br> साकल्याद्वक्तुमेवं ते नालं वर्षशतैरपि॥46॥ |
| य एतद्वैश्शृणोत्यद्धा श्रद्धायुक्तो बुधाग्रतः। <br> मद्धाम पद्धतिं याति बद्धभावो मदुद्विषि॥47॥ |
| ब्रह्मणो दक्षिणांसं तु वायोर्वामांसमेव च। <br> गृह्य सव्येतराभ्यां मे पाणिभ्यां संस्थितोऽभवम्॥48॥ |
| ब्रह्मणो दक्षिणे कर्णे वायोः कर्णेतु वामके। <br> संविदं तु करोम्यद्य विष्णोस्तत्वस्य निर्णये॥49॥ |
| रमापतेः करं गृह्य सञ्चरामि रमामि च। <br> श्वेतद्वीपे बुधालापे सदा पापहरे परे॥50॥ |
| श्वेतद्वीपेऽर्णवानूपे समीपे श्रीपतेरभूत्। <br> सुधारूपे करारोपे शरीरे पुलकाञ्चनम्॥51॥ |
| अतो मया च पूर्वेद्युनोक्तं स्वप्ने तव द्विज। <br> मत्पुत्रचरणाम्भोजं भज मुक्तिर्भविष्यति॥52॥ |
| मद्बृन्दावनमध्यस्थं सद्बृन्दावनचारिणः। <br> यद्गोपालेतिनामास्य तद्गोपालाः समाययुः॥53॥ |
| मद्बृन्दावनमध्यस्तं सद्बृन्दावचारिणः । <br> यद्बृन्दावनता ह्यस्य तद्बृन्दाश्च समाययुः॥54॥ |

| |
|---|
| इदं वृन्दावनाख्यानं सदानन्दादि साधनम्।<br>द्विधाव्याख्यानवत्कृत्वान्मदानन्दपरो भव॥55॥ |
| मन्नन्दन ममानन्दप्रद सद्वृन्दनादिना।<br>विलसद्वदनाम्भोजद्विजानन्दप्रदो भव॥56॥ |
| अहं तु गत्वा चायास्ये चिरञ्जीव सुखीभव।<br>अहं गत्वा बदर्यां तु कदर्याणां भयङ्करः॥57॥ |
| सोदर्यादादृतो नित्यं गिरिदर्यां वसाम्यहम्।<br>तत्रापि दृष्ट्वा श्रीवासं व्यासं भासन्तमावसम्॥58॥ |
| पृच्छामि तच्छासनानि स्वच्छान्यादृच्छकानि च।<br>तत्रानन्दादिमात्रेण मा त्रासः संसृतेस्त्वया॥59॥ |
| कर्तव्यः सततं विष्णुः स्मर्तव्यः स्मृतिनाशनः।<br>इति सम्बोधितो नित्यं संसाराम्भोधिभीतितः॥60॥ |
| पादमूलमुपासेऽहं पापहारिकृपायुजः।<br>इति जानन्ति मां नित्यं ये नराः पापशीलिनः॥61॥ |
| तेषां पापानि हर्ताहं हयग्रीवस्य चाज्ञया।<br>शिष्याणामयुते तस्मिन् पुष्पाणां कृतमालिकाम्॥62॥ |
| पुष्यरागप्रभां दिव्यां तुष्यन्मह्यं ददौ मुदा।<br>भारतार्थं समाख्याय मारुतेरित बुद्धिना॥63॥ |

| |
|---|
| कीर्तिमावृत्य लोकेऽस्मिन् मूर्तिं प्राथ्यामुदाददीः।<br>युक्त्याख्यमल्लिकाभिश्च भक्त्या मत्पादमर्चयन्॥64॥ |
| कृत्यानया सुतुष्टोहं मत्या मालां ददामि ते।<br>क्षुत् क्षामतृट् परीहर्त्री दात्री मुक्तेश्च पद्धतिम्॥65॥ |
| कृत्या मया तु दत्तेयं त्रायतां त्वां सदैवतु।<br>इति मामुक्तवान् व्यासो दासं भासुरविग्रहः॥66॥ |
| मन्दहासान्वितो नित्यं कन्दाशनरतं मुनिम्।<br>सुखोपविष्टः संहृष्टः सुदृष्टिर्विष्टरश्रवाः॥67॥ |
| दृष्टवान् तपसायुक्तं पुष्टाङ्गं मां धियोत्कटम्।<br>पस्पर्श पाणिना मेऽङ्गं प्राणनाथ प्रियोह्यसौ॥68॥ |
| दैपायनो महायोगी वैशम्पायन मानितः।<br>यादृत्पारत्रिकं विप्राद्वैभवं भुवि कीर्तितम्॥69॥ |
| तादृक्सार्वत्रिकं नैव तपसश्चाति दुश्चरात्।<br>नरनारायणो देवो वरनारी परायणः॥70॥ |
| हरेः रामायणं सार्थं स्वराद्बारायणं व्यधात्।<br>कदलीवनमध्यस्थं द्विदलीकृतराक्षसम्॥71॥ |
| सदळीकृत पादाब्जं मदलीकं विना भजे।<br>इतीयं बादरीवृत्तिर्मधुरालापचित्रिता॥72॥ |

| |
|---|
| धरित्री पापहानिं च दात्री सत्यं मयोदितम्।<br>भारतं भारती भर्ता कीर्तयन् सेवते हरिम्॥73॥ |
| मारुतो मारुतस्त्वं हि नित्यं कीर्तय भारतम्।<br>समीरणो जगत्प्राणः कारणात्कुरुनन्दनः॥74॥ |
| भूत्वा रणमणिं कृत्वा हत्वा सर्वगुणाधमान्।<br>कृष्णानन्दस्य पात्राणि पूरयामास वीर्यवान्॥75॥ |
| भीमो मागध भीमस्य मारो धीर पराक्रमः।<br>रोदयामास देवारीन् बादराणसादरः॥76॥ |
| बभूव प्रभयायुक्तो स्वभयादभयं नभूत्।<br>सभास्वशुभावानां भारतीभावक्षोभिनाम्॥77॥ |
| कुत्सितं कीचकं छित्वा पाचको याचको यथा।<br>शोचकः सर्वदैत्यानां मोचको व्यसनात्सतः॥78॥ |
| इति मामुक्तवान् व्यासो दासं भासुरविग्रहः।<br>मन्दहासान्वितो नित्यं वृन्दे हासं समर्पयन्॥79॥ |
| इतीमां बादरीवृत्तिं आदराद्यस्तु वक्ष्यति।<br>बादरायणसम्प्रीतिं सादरं याति निश्चयात्॥80॥ |
| पूर्णप्रज्ञस्तु मां दृष्ट्वा पूर्णसन्तोषसम्भृतः।<br>पूर्णानन्दस्य व्यासोपि पूर्णानन्दास्ततोऽपरे॥81॥ |

मानव स्वामिनो वार्तां कामितां सन्निवेद्यमे।
मामेव पुनरागन्ता ब्राह्मणः श्रृणु मामकः॥82॥

राजभृत्यो यथा वार्तां सर्वेषां सन्निवेद्य च।
पुनाराजानमेवैति मनांस्यस्य प्रहर्षयन्॥83॥

शुभस्य वार्तामाहर्तुः सर्वे कुर्वन्ति मान्यताम्।
तथामद्वैभवाहर्तुः सर्वे कुर्वन्तु मान्यताम्॥84॥

मद्वार्तं मद्गतप्राणं ब्राह्मणं प्रापणं गुणान्।
येऽवजानन्ति नाकीन्द्रभृत्यं मद्द्रोहिणश्च ते॥85॥

मद्द्रोहान्नरकानेव परकायप्रवेशिनः।
भूत्वा भविष्यन्ति भूमौ भूतप्रेतपिशाचकाः॥86॥

तस्मात्कुर्वन्तु सन्मानं ब्राह्मणाय तु मानवाः।
तन्मानोऽपि ममैवेह तदन्तर्यामिणो मुने॥87॥

ब्राह्मणस्य मुखेनैव चेदमुक्तमिति प्रभो।
मा कुरु त्वमविश्वासं विश्वासं कुरु सर्वथा॥88॥

तव वैभवविख्यात्यैः भुवि को वर्तते युवन्।
वदतं वदतां श्रेष्ठ त्ववतं त्ववतां वर॥89॥

शिबिकामधिरोप्यार्थं शुभवार्तां च वाचकम्।
अभयं तस्य दत्वा त्वमभरस्त्वं द्विजोत्तमम्॥90॥

| |
|---|
| इति मामुक्तवान् व्यासो दासं भासुरविग्रहः।<br>मन्दहासान्वितो नित्यं वृन्दे हासं समर्पयन्॥91॥ |
| तस्माद्विजस्य सन्मानं सुजनोत्तम तं कुरु॥92॥ |
| एतत्सर्वं स्वाप्नपद्येन गर्वं |
| हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् |
| दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥93॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥ 94॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥95॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीददात्यजस्रं सुत सत्यमेव तत्॥ |

**इति श्रीमत्कविकुलतिलकवागीशतीर्थश्रीमच्चरणकरसञ्जात श्रीमद्वादिराजपूज्यचरणोदित ब्राह्मणस्वाप्नवृन्दावनाख्याने अलौकिकविभागे चतुर्थोऽध्यायः समाप्तः॥4॥**

THE KULADEVATHA OF DAIVAJNYA BRAHMINS

## ॥ अथ पञ्चमोऽध्यायः ॥5॥

ओं अस्यां मम कृतौ यस्य विश्वासो नास्ति दुर्मतेः।
तस्मिन्नाशास्यता न स्याद्यासस्यैवाज्ञया हरेः।
सर्वैर्गिरीन्द्र सदनैः मदनोऽपिदारैः दूरीकृतश्च बदरीपुरवासिभिस्तैः।
यस्याश्रयातसकलदैवत दैवतेशं व्यासं सुशान्तमनिशं मनसा स्मरामि॥2॥

लक्ष्मीपतेः सूक्ष्ममते मत्कथामृतवारिणा।
सतामाध्यात्मिकाद्याग्निं शमयं त्वं सुखी भव॥3॥

त्रिवाचापि मया चोक्तं तव बुद्धिर्यथा तथा।
कुरु विप्रस्य वचनं न मृषेति विचिन्तय॥4॥

मन्महामहिमां वक्तुं मानावानां न शक्यते।
मापतेर्भक्त माहात्म्यं कामतेः शक्यते नु किम्॥5॥

यादृग्वैभवभोगस्य स्थानं भुवि दिवि स्थितम्।
तादृग्वैभव रूपेण तत्तल्लोके वसाम्यहम्॥6॥

बहुरूपाणि धृत्वाहं सहभोगन्तु दैवतैः।
इह भुक्त्वा दिविस्थोऽपि सह मुच्ये विरिञ्चिना॥7॥

इति मद्वैभवाहर्तुर्भुवि प्राप्य च मद्गतिम्।
यां कतिं प्राप्य मोदन्ते तामप्यस्य ददाम्यहम्॥8॥

इति मद्वैभवगतिं श्रुत्वा मद्भक्तिसंयुताः।
मत्पादाब्जगतिं यान्ति मद्दयाविषयाश्च ते॥9॥

| |
|---|
| एवं श्रुत्वा विप्रवर्यात्सुगूढमाश्चर्यभूतं मम वैभवं तु |
| पुत्र चैतत्सुप्रसिद्धं कुरु त्वं मित्रो यथैवान्धकारस्थमर्थम्॥ |
| उक्तानि सर्वकर्माणि मम वैभवपर्वणि।<br>सर्वे वदन्तु भद्राणि सदा पर्वणि पर्वणि॥11॥ |
| तेषामिष्टानि पुष्टानि भविष्यन्ति न संशयः।<br>तेषां कष्टानि नष्टानि भविष्यन्ति न संशयः॥12॥ |
| सत्यं सत्यं पुनः सत्यं चोद्धृत्य भुजमुच्यते।<br>विप्रेणोक्तं च यत्सर्वं तत्सर्वं च मयोदितम्॥13॥ |
| हयग्रीवं महोग्रावं संसारग्राहनिग्रहम्।<br>मणिभास्वच्छुभग्रीवं श्रृणु वन्दे कृताञ्जलिः॥14॥ |
| इतः परं न वक्ष्येऽहं परस्याक्षेपकारणम्।<br>कुतः शरः प्रयोक्तव्योऽसुरस्यायोग्यबुद्धिनः॥15॥ |
| तस्माद्वृन्दावनाख्यानं मन्दानां शङ्कितं मुने।<br>कन्दाशनेन्द्ररचितं तं दोषं न ददाति च॥16॥ |
| मन्मनः सन्निकर्षेण त्वन्मनः स्मृतिकारणम्।<br>दिने दिनेऽभिजानीहि कानीह सृकृतानि ते॥17॥ |
| मन्नेत्रसन्निकर्षेण नयनं ते सुदर्शनम्।<br>दिने दिनेऽबि जानीहि कानीह सुकृतानि ते॥18॥ |

| |
|---|
| मत्कर्णसन्निकर्षेण त्वत्कर्ण श्रृणुतेऽनिशम्।<br>दिने दिनेऽबि जानीहि कानीह सुकृतानि ते॥ 19॥ |
| मज्जिह्वायुक्त त्वज्जिह्वाप्यंहो मुग्वचनं भवेत्।<br>दिने दिनेऽबि जानीहि कानीह सकृतानि ते॥ 20॥ |
| मद्घ्राणंसन्निकर्षेण त्वद्घ्राणं जिघ्रतेऽनिषम्।<br>दिने दिनेऽभि जानीहि कानीह सकृतानि ते॥ 21॥ |
| मद्धस्तसन्निकर्षेण त्वद्धस्तः कुरुते कृतिम्।<br>दिने दिनेऽबि जानीहि कानीह सुकृतानि ते॥ 22॥ |
| मत्पादसन्निकर्षेण त्वत्तपादः चलते पदम्।<br>दिने दिनेऽबि जानीहि कानीह सुकृतानि ते॥ 23॥ |
| सर्वाणि करणानीति युक्त मत्करणानि ते।<br>कर्माणि पुण्यरूपाणि कुर्वन्ति मम सन्निधेः॥ 24॥ |
| तस्माद्वृन्दावनाख्यानं मुकुन्दानन्द कारणम्।<br>मन्दानां बोधनार्थाय कन्दाशन कृतं त्वभूत्॥ 25॥ |
| एवं निशाम्य मम भृत्यमुखाच्च सर्वम् वृन्दावनस्य विभवं सुजनाश्च सर्वे।<br>श्रद्धालवो विततभक्तियुका भजन्तु सर्वेष्टदं सकलपापविनाशनं तत्॥ 26॥ |
| मत्पाद स्मरणेनैव जनानामणिमादिता।<br>प्राणनाथपदं हित्वा कोणपं भजते नु किम्॥ 27॥ |

| |
|---|
| शिलास्थां कुरु पुत्रेश बलात्कारेण मत्कृतिम्।<br>स्थालान्तरगतां विद्धि स्वलाभार्थं च नाकिना॥28॥ |
| देवैरप्यर्थितां स्वार्थमार्ति नाशाय पार्थिवैः।<br>प्राप्स्येति किमु वक्तव्यं सार्थीकुरुत मत्कृतिम्॥29॥ |
| चरमाज्ञा ममैवेयं परमार्थेति विद्धि ताम्।<br>कुरु मा चान्यथा बुद्धिं परमा नीतिरीर्यते॥30॥ |
| अहं रमामि रामेण रमारमणरूपिणा।<br>अहं पुष्णामि कृष्णेन भाषितं विष्णुरूपिणा॥31॥ |
| अहं पृच्छामि मत्स्येन सच्छास्त्राणि प्रसङ्गतः।<br>गच्छामि कच्छपेनैव स्वच्छरूपेण स्वेच्छया॥32॥ |
| वराहेण करारोहे नमितोऽहं च राहुणा।<br>नृसिंहेन कृतस्नेहे सैंहिकेयेन पूजितः॥33॥ |
| वामनेन च सन्माने कामेनापि सुमानितः।<br>भार्गवेणैव चानर्घे माने सति च स्वर्गिणा॥34॥ |
| गर्गादि मुनिभिः सार्धं श्रद्धयाराधितोऽस्म्यहम्।<br>बुद्धः प्रबुद्धः सिद्धेशो बद्धबुद्धिप्रबोधकः॥35॥ |
| बौद्धराद्धान्तसिद्धार्थं देवानां बोधयत्यलम्।<br>स देवो वरदो मह्यं कदा चेह समागतः॥36॥ |

| |
|---|
| इति मामुक्तवान् सूक्तं स्वपादे चावदात्यजत्।<br>कल्की सङ्कल्पसंसिद्धो म्लेच्छमूलकुलान्तकः॥37॥ |
| अनल्पमपि चालस्यं चालयामास लीलया।<br>एवं दशावतारेषु दुर्दशारहितेषु च॥38॥ |
| सदा सुशरणं प्राप्य तद्दासत्वमवाप्तवान्।<br>पूर्वं मयोक्त श्लोकेषु सांशायिकमतिं त्यज॥39॥ |
| त्वत्कर्णाभरणमुद्दिश्य मणिव्यत्ययतः कृतम्।<br>अहं ब्राह्मण ते वामकर्णे संस्थित सन्मणिम्॥40॥ |
| पाणिना दक्षिणे कर्णे न्यस्य तद्गतकामणिम्।<br>वामकर्णे पुनर्न्यस्य मम पुण्यवचांस्यहो॥41॥ |
| अथोपदिष्टवानस्मि स्पष्टं मद्धस्त  कर्म ते।<br>कर्णे ते दक्षिणे विद्वन् पश्य हस्तेन संस्पृशन्॥42॥ |
| इतीदं विद्धि सद्बुद्धे वृद्ध मद्धस्तकर्म च।<br>शुद्धभावेन मामद्धा भज क्रोधमिमं त्यज॥43॥ |
| अन्वारुहमहो स्वर्गं सह देवैर्वसाम्यहम्।<br>इदमाश्चर्यवृत्तं मे श्रुत्वा सर्वेऽपि गर्विताः॥44॥ |
| चर्चितं मे मया सर्वं गर्वं त्यजत शीघ्रतः।<br>कर्तुं चा कर्तुमप्येवमन्यथा कर्तुमेव च॥45॥ |

| |
|---|
| समर्थोऽहं न सन्देहश्चेश्वरस्य सदाज्ञया।<br>इति पूर्वं मया प्रोक्त मनुसन्धत्स्व बुद्धिमन्॥ 46॥ |
| मार्ताण्डरथमारुह्य स्वाण्डार्तेन सुमानितः।<br>शरकाण्डजमातॄणां करकाण्डेन पूजितः॥ 47॥ |
| भानुमण्डलगं विष्णुं को नु ब्रह्माण्ड संस्थितः।<br>दोर्दण्डादर्चयन् साक्षात् मां विनाण्डस्य शक्तिमान्॥ 48॥ |
| सूर्यस्य रथमाश्रित्य वीर्यस्य परमात्मनः।<br>आर्यस्यापि ममास्यान्तं कार्यस्यान्तं गतं मया ॥ 49॥ |
| एवं सुष्ठु रथे तिष्ठन् पृष्ठतः परमात्मनः |
| काष्ठान्तं यामि कामेन स्पष्टं पश्यंश्च सज्जनान्।<br>शिंशुमारं समासाद्य कंसमारेण चादृतः |
| संसरामि पुनर्नाहं कं सरामीति याचये॥ 50॥ |
| स देवो वरदो मह्यं करदाय महाप्रभुः।<br>स्मरदाश्रितदुष्कर्म विददार हरिः स्वयम्॥ 51॥ |
| तत्पुच्छान्तं न पश्यामि स्वर्गमूर्तेर्महात्मनः।<br>पृच्छामि स्वच्छतत्वानि तत्पुच्छगततेजसाम्॥ 52॥ |
| स चोपदिष्टवान् स्पष्टं ज्योतिर्मण्डल मण्डनम्।<br>ध्रुवादि सर्वलोकानां पालकत्वं  स्ववैभवम्॥ 53॥ |

| |
|---|
| एवं क्रमेण सर्वाणि ज्योतींषि गतवानहम्।<br>तेजसा सर्वचक्षूंषि विमुष्णन् विष्ण्वनुज्ञया॥54॥ |
| तिष्ठन् सूर्याभिमुख्येन कष्टं कुर्वन्नधः सदा।<br>स्पष्टं तप्ये महात्मानं दृष्ट्वा चेक्षन् तमीश्वरम् (ततोग्रवान्)॥55॥ |
| रथे तिष्ठन् पृथुग्रीवं वृथाग्रहसुनिग्रहम्।<br>ध्याये मायां विना कायं पातयित्वा च दण्डवत्॥56॥ |
| श्रेयो यास्ये त्वयाऽवार्यं मयोक्तं सत्यतः कुरु।<br>इति सम्प्रार्थयन्नित्यं श्रुत्यन्तेषु विचारयन्॥57॥ |
| कृत्यं सर्वं तु हित्वाहं स्तुतेः कृत्यं करोमि ते।<br>प्रभुस्तदा प्रसन्नात्मा प्रवणं मां प्रकृष्टधीः॥58॥ |
| प्रावोचत्सुप्रसन्नोऽस्मि प्रकृत्या मोचये प्रिय।<br>इति मामुक्तवान् सूक्तं स्वपादे चापदात्यजत्॥59॥ |
| पस्पर्श गात्रं नेत्रान्तैः दृष्टवान् स्तोत्रमात्रतः।<br>कात्र कीर्तिः कृपापात्रतया हीनस्य पुत्रकः॥60॥ |
| त्वमप्येवं प्रसन्नास्यं प्रसन्नीकुरु तं हरिम्।<br>गुरुं मां मावमंस्थास्त्वं कुरु कार्यं मयेरितम्॥61॥ |
| आलस्यं न कुरु त्वं हि पालयिष्येऽहमञ्जसा।<br>कालक्षेपो न कर्तव्यः स्वालयं ते भविष्यति॥62॥ |

| |
|---|
| क्लीबोक्त्या स्वालयं चेति तवालस्याद्भविष्यति।<br>पालयामि बलादेव कालयाम्यपमृत्युताम्॥63॥ |
| तस्मान्माभीः कुमाराभ ह्यशुभाच्च शुभात्मक।<br>सभासु भासुरं वाक्यं  भावगर्भं तु बोधय॥64॥ |
| बुद्धिमान् भव सिद्धेश श्रद्धां कुरु बुधे मयि।<br>विप्रस्य तनुरेवेयं मत्तनुर्नात्र संशयः॥65॥ |
| अत एव स्ततो विप्रः स्वकृत्या वक्ति मत्कृतिम्।<br>सुकृतिं चास्य विप्रस्य स्वकृत्या साधयाम्यहम्॥66॥ |
| तस्माद्विप्राय दातव्यं क्षुधितायान्नमुत्तमम्।<br>सकुटुम्बाय दारिद्र्यात्कृद्धाय  शुद्धाय च॥67॥ |
| अन्नकामाय चरते कृशायेति श्रुतौ सुत।<br>पश्यान्नदानमाहात्म्यं मानसिद्धमनन्तकं॥68॥ |
| श्रुत्यर्थं जानतः पुत्र कुतो वक्ष्ये निरन्तरम्।<br>मानतः प्राप्तधर्मं तं मा त्यज त्वं सुतोत्तम॥69॥ |
| अहं नमामि कामेन मानवायन्नदाय च।<br>दानवा अपि  यास्यन्ते चान्नदानात्सु सद्गतिम्॥70॥ |
| अन्नस्य नाम्ना चानन्तोऽप्यतियत्नं करोति च।<br>जीवानां जनने को नु मानसिद्धं परित्यजेत्॥71॥ |

अन्नाद्भूतानि जायन्ते जाताश्चान्नेन वर्धते।
अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते॥72॥

एवमन्नं निमित्तं च कृत्वा तत्तत्करोति च।
अन्नतोऽपि तथान्नेन माहात्म्यं स्वस्य याति च॥73॥

अतोऽन्नस्याविना भावाज्जीवानां जीवमानता।
अन्नानि चैव जीवानां कानने वासिनामपि॥74॥

जीवमानप्रदान्येव किमु ग्रामनिवासिनाम्।
अतोऽन्नसदृशो मानो जीवानां नैव विद्यते॥75॥

मयोक्त मन्नतत्वं च श‍ृणुते योऽनिशं सुत।
अन्नं च लभते पूर्णं अनन्तं चापि पश्यति॥76॥

इदं कथं सङ्घटते अनुपपत्तिरथात्र तु।
इति मा वित्त जीवं त्वं कत्थनं वापि मानव॥77॥

यद्येवं वदसे विद्वन् मद्वन्दन विधिं कुरु।
क्रुद्धश्चेच्छिन्धि क्रोधं तं भिन्धि दुर्बुद्धिपद्धतिं॥78॥

नोचेद्गच्छस्व दूरं तु दारं प्रति सदा कुरु।
द्वारं राज्ञां पुनर्गच्छ दीरवादमथा कुरु॥79॥

वक्ष्येऽथापि ते कामं कथाक्रमविधिं बुध॥80॥

सुक्षीणस्त्वं वृथाक्षेपो भिक्षामात्रं ददस्व मे।
विप्रान्तर्यामिणः पूर्णपुण्यस्य तु गुणार्णव॥81॥

| |
|---|
| अहं विप्रमुखेनैव चान्नं भोक्ष्यामि नान्यथा।<br>अनेकवैभवं चान्नं मन्नन्दनमुखेन तु॥82॥ |
| विना नान्यत्र भोक्ष्यामि चान्न मात्रं तु तन्मुखे।<br>तस्माद्विप्राय दातव्यं त्रातव्यश्च सदा द्विजः॥83॥ |
| साचिव्यं कुरु वाण्याच वक्ता स्यात्सर्वमेव च।<br>अनेकमूर्ति संयुक्तः कीर्ति सन्ततिसंयुतः॥84॥ |
| प्रार्थयामि हयग्रीवं स्वार्थं यास्यामि कामितम्<br>मूर्त्यैकया प्रार्थितया परैश्च।<br>स्वार्थेषु सक्तैः कृतकृत्यबुध्या॥85॥ |
| आर्तिश्च हृत्वा परमार्थरूपं कार्तस्वराभं हयकन्धरस्य।<br>नमामि कामेन विना वदामि नामानि तस्यैव सुमानवाग्र्य॥86॥ |
| ध्यायामि मायामपि कामितप्रदां त्वया मतः सूक्ष्मतरं हृदिस्थितम्।<br>शतं शतं तु पद्यानां प्रत्यध्यायगतं कुरु॥87॥ |
| शुभ श्रुत कथस्त्वञ्च भव निःसंशयो भव।<br>अहमेकेन रूपेण शोकं परिहरन्सदा॥88॥ |
| श्लोकान् वक्तुं प्रविष्टोऽहं काकबुद्धौ द्विजोत्तमे।<br>तथैकेनैव रूपेण मत्तोके च प्रविश्य तु॥89॥ |

लोकस्य दर्शनात्सद्यः शोकं परिहराम्यहम्।

देववृन्द समायुक्तो मद्वृन्दावन संस्थितः।

सद्वृन्दानां प्रयच्छामि चेष्ट वृन्दानि सर्वदाय॥90॥

एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥91॥

इदं वृन्दावनाख्यानं यो पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥92॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्ककृतं॥93॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

॥ इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराजपूज्यचरणोदित स्वाप्नवृन्दावनाख्याने स्तोत्रभागे पञ्चमोऽध्यायः समाप्तः ॥

## ॥अथ षष्ठोऽध्यायः॥6॥

ओं लक्ष्मीकान्तं भूवराहं भजेऽहं बादरायणम्।

वादिराज हृदम्भोजमन्दिरम् वाजिकन्दरम्॥1॥

भीमसेनानन्दतीर्थवानरेन्द्रानहम्भजे।

वादिराजगुरून् वन्दे वेदवेद्यगुरून् भजे॥2॥

| |
|---|
| गुरून् वेदनिधीन् वन्दे नारसिंहगुरून् भजे।<br>वन्दे नारायणाचार्यान् कर्णादिगणसेवितान्॥3॥ |
| वन्दे वृन्दावनाचार्यान् हयग्रीव मुनीन् भजे।<br>शेषसीतापतिव्यासान् प्रणमामि गुरुप्रियान्॥4॥ |
| ओं तथैव नन्दने पुण्ये वने नन्दनमानितः।<br>इन्द्राण्येन्द्रेण चानन्दी मान्दाकिन्यां रमाम्यहम्॥1॥ |
| तथापरेण रूपेण मेरौ नारायणार्चकः।<br>सुराणां शरणे रम्ये करणैर्मरणार्तिभिः॥2॥ |
| मुक्तो युक्तो हरेर्भक्त्या शक्त्या सूक्त्याच शक्तिमान्।<br>पृक्तस्तुषारैर्नेत्रोथैः प्राक् तृष्णां त्यक्तवानहमम्॥3॥ |
| तत्र चैव चिरं रम्ये रमारमणसारणे।<br>कारणं च विनारीणां शरणं यामि चारणैः॥4॥ |
| एवं मेरौ सदारामे चाराधनपरायणः।<br>नारायणस्य चरणे मरणार्तिं जहामि च॥5॥ |
| तथैकेनैव कालेन कैलासे निर्मलाचले।<br>सालवृक्षशतालोले कोलादि मृगचञ्चले॥6॥ |
| पालिते बालरूपेण कालनं कुर्वतां सतां।<br>लोकेश पालकेनापि पालितोऽहं न संशयः॥7॥ |

| |
|---|
| हे नन्दनः पुनः श्रीमन् ममानन्दप्रदो भव।<br>मद्दास सङ्गीतसंस्थसत्पद्यानि सदा श्रृणु॥8॥ |
| सङ्गीतस्यानुकूल्येन त्वङ्गीकुरु पदान्तरम्।<br>प्रसङ्गीकुरु तस्यार्थं साङ्गीकुरु च मत्कृतिम्॥9॥ |
| विप्रस्य दोषेण कानिचित्पद्यानि मनांसि नः।<br>शब्दमान विरोधीनि कृण्वन्ति श्रृणु नन्दन॥10॥ |
| अथापि विप्रवर्यस्य दोषो नास्ति श्रृणुष्वतत्।<br>जाग्रत्कृति ग्रहे वापि त्वग्रहो जायते सुत॥11॥ |
| स्वाप्नग्रहण शक्तौ च पश्य विप्र च मत्कृतिम्।<br>तदपि ब्राह्मणस्यास्य मदनुग्रहतोऽभवत्॥12॥ |
| सदनुग्रह माहात्म्यं त्वद्हृदिस्थं सदा कुरु।<br>अथ चानुसदाम्यत्र प्रकृतं पुत्र तच्छृणु॥13॥ |
| कृच्छ्रान्नास्ति ममैवेह तथा चापि न संशयः।<br>अहमेकेन रूपेण स्वर्गेऽनर्घ्येण घर्घरम्॥14॥ |
| दीर्घज्ञानं दिशाम्यद्धा गर्गादीनां न संशयः।<br>यमोऽपि कमनीयं मे रूपं दृष्ट्वा मनोरमम्॥15॥ |
| कः पुमानीदृशोस्माकं लोकं नाकं त्वमागतः।<br>इत्यपृच्छत् प्रचेताश्च सुचेता अपि काश्चन॥16॥ |

| |
|---|
| स्त्रियोप्यात्रेयमुख्याश्च कोऽत्र सुत्राममानितः।<br>तदापि कमनीयं मे रूपं दृष्ट्वा मनोभवम्॥ 17॥ |
| मेने रतिः स्वभर्तारं कामार्ता रूपसम्पदा।<br>एवं स्त्रियश्च सर्वास्ताः उर्वश्याद्याः सुगर्विताः॥ 18॥ |
| गुर्वादिष्टास्तु स्वाविष्टाः प्रहृष्टा रूपसम्पदा।<br>वासिष्ठानथ दृष्ट्वा ताः पृष्टाः कामेन तुष्टिदाः॥ 19॥ |
| अष्टाध्यायात्मकं चैतत्कष्टान् परिहरिष्यति।<br>काष्ठान्ते कुर्वतां ख्यातिं शिष्टानामिष्टदं सुत॥ 20॥ |
| रामोपि तत्र मां दृष्ट्वा कामेन रहितं मुनिम्।<br>सुमनोहर मे नित्यं भृत्यो भव समीपगः॥ 21॥ |
| इति मामुक्तवान् सूक्तं स्वपादे चापदात्यजत्।<br>एवं यमसभामध्ये समवर्ति सुविस्मितः॥ 22॥ |
| कुमाराभं च मां दृष्ट्वा समारोऽपि सुलज्जितः।<br>नरके परकीयाश्च सुरकार्यविवर्जिताः॥ 23॥ |
| स्वकीया अपि पाकीयाः प्रकीर्य मम पूजनम्।<br>शरणं मरणातीतं करुणाकरमञ्जसा॥ 24॥ |
| तरणिं मोहसरणेः स्फुरणं करणं च माम्।<br>आगताः स्वागतोक्त्याच का गतिः पापिनामिह॥ 25॥ |

इत्यप्रुच्छन स्वच्छतत्वं कुत्सितं कर्म तत्यजुः।

क्रकचच्छेदनं चापि छित्वा सर्वे दिवं ययुः॥26॥

इत्येवं नरकोत्तारं त्रातारं सर्वसज्जनान्।

श्रुत्वा हित्वा तु कामार्तिं नरकं यान्तु मत्पदम्॥27॥

मम स्वप्ने तव स्वप्ने चास्य स्वप्ने मदत्वयम्।

तर्हि विप्रस्य तत्स्वप्नं सत्यं लोके भविष्यति॥28॥

इत्यविश्वासतः पुत्र ये वदन्ति कुबुद्धयः।

तेषां शापान् प्रदास्यामि दासानामपि शाश्वतान्॥29॥

कुतो वक्ष्ये भवत्स्वप्ने मृतिं मा यास्व पातकिन्।

सुतं मेऽकुमतिं प्रेत वृथा प्रेरितवानसि॥30॥

श्रद्धाऽहीनं कुबुद्धे त्वं वृद्धं त्याजितवानसि।

सर्वज्ञोऽहं न सन्देहः कुमतिज्ञो दुरात्मनाम्॥31॥

सुमतिज्ञः सतां चापि तत्वज्ञोऽहं विशेषतः।

सर्वत्र तव विश्वसो ह्यविश्वासः कुतोऽत्रतु॥32॥

अविश्वासोऽत्र ते सम्यक् यदिवा तर्हि सर्वतः।

अविश्वासो भवत्येव तव सत्यं मयोदितम्॥33॥

विश्वासस्तत्र चेत्पुत्र ह्यविश्वासः कुतोत्रतु।

सर्वे मयोक्ताः श्लोकास्ते शोकमूलस्य नाशकाः॥34॥

काकवाक्यानीव पुत्र मा कुरु त्वं परेरितः।
विप्रोऽयं मम सद्बुध्या शुद्धान्तःकरणोऽभवत्॥35॥

श्रद्धायुक्तो मयोक्ते तु वृत्तिं याज्ञां करिष्यति।
यावदीश्वरदत्तं वै तावतैव सुखी भवेत्॥36॥

मत्प्रेरणाबलं पश्य ब्राह्मणे पुण्यकीर्तन।
कारणं च ऋणान्मुक्तौ मत्कारुण्यं विना नहि॥37॥

एवं कृते ह्यविश्वासे ह्यलमेतावता सुत।
कृतेन मम सत्पुत्र स्वस्ति तेऽस्तु कुतोऽशुभम्॥38॥

विप्रप्राणावधिर्यावदित्युक्तं पुण्यरूपिणा।
कण्वादि मुनिमध्येतु श्रृण्वद्य मम मानसम्॥39॥

स्वर्गागमनपर्यन्तमुत्सर्गोऽयं  न संशयः।
निर्गतोऽद्य भवाम्यद्धा वाक्सर्गादपवादतः॥40॥

यथागच्छन् गजः शीघ्रं गोक्षुराद्यपवादतः।
न गच्छति पुनः शीघ्रं दुर्वादिगजसिंह भोः॥41॥

तथाहमपवादे तु निवृत्तो वाग्विसर्गतः।
अत्रापवादकः पुत्र ह्यविश्वासोऽस्मदीयकः॥42॥

तस्मात्प्रतिज्ञाहान्यादि दोषो मम न कश्चन।
कदाचिदेव वक्ष्यामि कार्ये तु प्रस्तुते सति॥43॥

| |
|---|
| इति पूर्वं मया प्रोक्तमनुसन्धस्त्व बुद्धिमन्।<br>ममेह त्रीणि रूपाणि शिष्टानि तुष्टानि च॥44॥ |
| मत्पुत्रे कृतपाण्डित्ये विप्रे वृन्दावने सदा।<br>यथा वायुस्तवायुष्यवृद्धये वर्तते त्वयि॥45॥ |
| तथाहं वर्तयाम्यत्र विप्रे पुत्र न संशयः।<br>हे शुद्धवृद्ध विप्रोऽयं अति मुग्दः स्वकार्यतः॥46॥ |
| क्रुद्धस्त्वं मा भवस्वाद्य श्रद्धायुक्तो बुधे मयि।<br>सत्यं वच्मि हितं वच्मि सुत वच्मि पुनस्तव॥47॥ |
| विप्रोऽयं वर्तते वृत्तिं कुत्र यास्यति मत्प्रियः।<br>विधवा श्रुत तेऽद्यैव विधिश्च विमुखो भवेत्॥48॥ |
| द्विजकार्यतमद्रोहात् द्विजकार्यविरोधिनः।<br>सुखिनः सन्तु मद्भक्ताः शश्वत् जीवन्तु मत्प्रियाः।<br>अति सौभाग्यवन्तश्च सन्तु भक्तियुता हरौ॥49॥ |
| मम वृन्दावने पुण्ये कमनीयं तु मां स्मर॥50॥ |
| श्रमहारिणमज्ञात्वाऽसुमनास्त्वं न गच्छह।<br>एवं बुद्धे सदा शुद्धश्रद्धां कुरु धिया तव॥51॥ |
| क्रोधं त्यज द्विजाद्यैव भज मां भुजगेश्वरम्।<br>अहं तवाहितं नैव वच्मि किञ्चन काचन॥52॥ |

| |
|---|
| व्यथा ते मास्तु नास्तीति गुरुदैवं वदन्ति तैः।<br>मत्सुतस्य सुविश्वासं पश्य त्वं विप्रसत्तम॥53॥ |
| सीतापतेश्च भक्तस्य व्यास शेषस्य चैव हि।<br>चतुर्णामपि विश्वासे स्वर्णलाभं यथा तथा॥54॥ |
| कर्णश्राव्यं भवत्येव वर्णात्मकमिदं वचः।<br>मत्प्रेरिताः सुविश्वासं कुर्वन्त्येते न संशयः॥55॥ |
| पश्यन्ति विश्वासफलमैहिकामुष्मि कं च यत्।<br>वर्णात्मकमिति प्रोक्तं कर्णेन श्रृणु नन्दन॥56॥ |
| स्वर्णवर्ण शिलायां मे चीर्णेन लिखितं कुरु।<br>वर्णानां ब्राह्मणाद्यानां कर्णश्राव्यं तथा कुरु॥57॥ |
| स्वर्णलाभायते पुत्र शर्मणे च सदा तव।<br>सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते॥58॥ |
| शस्तं शस्तं कुरु क्षिप्रं विप्रस्य न मृषा वचः।<br>शीघ्रेणाहं तु गच्छामि व्याघ्रादिभयकम्पिता॥59॥ |
| प्राग्र्याथ गौर्यथारण्ये स्वाग्र्यां मूर्तिं भजामि ताम्।<br>अविश्वासेन सर्वेषामुर्व्यामत्यन्तपापिनाम्॥60॥ |
| तेषामाकर्षणम् काले यमदूतैश्च कारयन्।<br>तस्मान्नरवरश्रेष्ठ प्रेष्ठ मे सर्वदा मठे॥61॥ |

| |
|---|
| बुद्धि सौष्ठवसंयुक्तान् श्रेष्ठानङ्गीकुरु स्फुटम्।<br>इयं तव शुभा बुद्धिः कियन्तः कुजना भुवि॥ 62॥ |
| नयन्तो नरकावासं स्वयं तेऽपि पतन्त्यहो।<br>कविता ब्राह्मणे नास्ति सविता वेत्ति सर्वथा॥63॥ |
| भविताऽथापि लोकोऽयमयुतं शरदां शतम्।<br>मयाङ्गीकृतो विप्रोऽयं प्रेत्य पुत्र सुखी भवेत्॥64॥ |
| काऽत्र हानिः कृता चास्य परैर्हास्ये कृतेऽप्युत।<br>ब्राह्मणाधम मद्वाणीं निर्गुणान् प्रतिमाभण॥65॥ |
| गुणिनां भण सद्वाणीं नो चेत्पाणान् वृणोमि ते।<br>काण काण गुणैर्हीनोऽप्यण्वी कुरु कुमानवम्॥66॥ |
| मत्सन्निधाने सति नन्दनाग्र्य वृन्दावने सुन्दरमन्दराभे।<br>कन्दाशनेद्रैः सह चेन्द्रियेशो वीन्द्रादि देवैरपि सन्निधत्ते॥67॥ |
| मयि गच्छति सत्पुत्र देवैः सह मुनीश्वरैः।<br>परिगच्छन्ति स्वच्छन्दोऽप्यनेकात्म सुमूर्तिभिः॥68॥ |
| अन्वयव्यतिरेकानुविधायित्वेन तस्य मे।<br>कस्य चेदृशमाहात्म्यं पश्य लोके सुचक्षुषा॥69॥ |
| तस्माद्विश्वासतः पुत्र यास्यन्तं स्थापयाशु तम्।<br>सेश्वरं भास्वरं मूर्तिं कार्तस्वरसमाकृतिम्॥70॥ |

अविश्वासे प्रयास्यामि सुविश्वासे वसाम्यहम्।
तव श्वासप्रणीताहं भविष्यामि न संशयः॥71॥

तस्मादायुष्यवृध्यै ते शुद्ध विश्वास संस्थितम्।
कुरु श्रद्धान्वितो नित्यं कोद्धा वक्ता च मां विना॥72॥

सहोदरं च हित्वापि कविः स्यां त्वन्मुखे सदा।
एतच्छ्रुत्वा रहस्यं मे परस्य सुयशस्विनः॥72॥

विप्रस्य शश्वदुक्त्याच विश्वासं कुरु मत्कृतौ।
दर्वीकरो गर्वितोऽपि गरवीर्येण गारुडैः॥74॥

गां गतोऽपि  न गन्ता च स्वर्गतिं सौगतो यथा।
तथैव तव विश्वास विश्वस्तः प्रस्तुतां गतिम्॥75॥

हित्वा शस्तां प्राप्य पूजां त्वत्कृतां संस्थितोऽभवम्।
तवादराख्यरोधेन प्रतिरुद्धो भवामि च॥76॥

त्वदाराधितपादाब्जः सुधासागरगो यथा।
अभवं शुभमेव त्वमभयं चापि मद्भव॥77॥

लभ मे भव सम्प्रीतिभाजो भव्यभवेषु च।
इतः परं परैरुक्तां रिक्तां विश्वासतः कृतौ॥78॥

न्यत्कृतां तर्कितां सद्भिः स्वीकृतां न कुरु प्रिय।
काकोदरो यथा लोके तोकोदर प्रपूरणम्।
भेकोदरगतांत्रैर्वल्मीकोदर गतोऽपि सन्॥79॥

| |
|---|
| कुरुते निरतस्तच्च स्मरते हरते नरैः।<br>हरन्तु त्वरते रन्तुं पुरते क्रियते च सः॥80॥ |
| तद्वत्खलोपि मलभाण्डमजाण्डकोशे<br>स्वस्योदरं तु तरते परपीडनाच्च।<br>नित्यं कलत्रतरिमान् भवतीह पुत्र<br>प्राणान् परस्य हरते नरके चरिष्यन्॥81॥ |
| अप्राकृतं प्रवक्ष्यामि विप्रान्तर मुखेन च।<br>सुप्राकृत मनेनैव सम्प्रार्थय सुताशु माम्॥ 82॥ |
| शिष्टानि तुष्टानि चेति वर्णे न्यूनत्वतः सुत।<br>सन्निधानस्य न्यूनत्वं क्रमाज्जानीहि मानव॥83॥ |
| वृन्दावने यादृशं तु तादृशं नास्ति नन्दने।<br>नन्दने यादृशं धीमन् तादृशं नास्ति ब्राह्मणे॥84॥ |
| अधिष्ठानस्य माहात्म्यं दातुं वृन्दावने सदा।<br>वृन्दारकेन्द्रसन्दिष्टो मन्दस्मित वसाम्यहम्॥85॥ |
| त्वयि सच्छास्त्रवक्ताच व्यक्तं व्यक्तिमतां वर।<br>त्यक्त्वा सर्वाणि कृत्यानि भृत्यानुग्रह कातरः॥86॥ |
| वसामि मनसा श्रीमन् दासो व्यासस्य शासनात्।<br>श्वासरूपेण चावासः विप्रस्यापि भवाशु च॥87॥ |

| |
|---|
| शास्त्रार्थज्ञ कृतार्थं मां त्राता त्वं सर्वदाऽत्रतु।<br>कुबेरोऽप्यथ मां दृष्ट्वा सभेरीरव आदरात्॥88॥ |
| गम्भीर स्तोत्र संनाद सुभीरुस्सन् उपागतः।<br>गृह्णन् प्राणिं गुणिन् धीमन् मणि कीर्णानि मानव॥89॥ |
| ददौ चाभरणान्याशु चरणे मणिराशिकम्।<br>स्वगृह्यं वेशयामास स गृह्णन्नेव मे करम्॥90॥ |
| प्रगृहीतमतिप्रेम्णा जगृहे मम पादुके।<br>कुबेरस्त्वथ मां दृष्ट्वा सुवीरोऽपि सुविस्मितः॥91॥ |
| त्रयीविरोधिनं हत्वा कवीश्वरमुपागतम्।<br>यथा करोति वेदस्य निर्भयं भारतीपतिः॥92॥ |
| तथा करोषि लोकेशप्रीतिं सादितवानसि।<br>इति मामुक्तवान् भक्त्या मत्कृतिस्मृतिमात्रतः॥93॥ |
| त्यक्तवान् सर्वकृत्यानि श्रुत्वा तत्वानि मे सुत।<br>अहं निमिषमात्रेणानिमिषैः सहितोऽगमम्॥94॥ |
| पश्यतामेव सर्वेषां पाशिनो लोकमागतः।<br>प्रचेता अपि मां दृष्ट्वा सुचेताश्च विपश्चितम्॥95॥ |
| कुचेताश्चागतः पश्चात् स्वच्छं याचितवान् मम।<br>ज्ञानं भानुनिभं मौनिन् मानेन सहितं शनैः॥96॥ |

| |
|---|
| अनन्तानन्तमाहात्म्य सूचनं लोचनं यथा।<br>काञ्चनेनाञ्चनं कुर्वन् मां छन्नं पापिनामिह॥97॥ |
| लाञ्छनैः प्राञ्चितं जानन् वाञ्छितं चाप्तवान् मया।<br>तदादरेण सर्वेऽपि गर्विता अपि चर्वितम्॥98॥ |
| दर्वीकरपतिं पर्वण्याप्ताः स्ववासिनश्च ये।<br>साधु साध्विति सम्भाष्य जगृहुर्दर्शनं च मे॥99॥ |
| स्वादु स्वादु पदैर्दिव्यैः मधुरोक्ति समन्वितैः।<br>एवं ज्ञानोपदेशं च मानवान्तकसन्निधौ॥100॥ |
| दानवा अपि तच्छ्रुत्वा स्तुवन्तो मां दिवं ययुः॥101॥ |
| एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥102॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥103॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥104॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥ |

**इति श्रीमत्कविकुलतिलकवागीशतीर्थश्रीमच्छरणकरसञ्जात श्रीमद्वादिराजपूज्यचरणोदित**

**ब्राह्मणस्वाप्नवृन्दावनाख्याने अलौकिक विभागे षष्ठो ऽध्यायः समाप्तः॥**

## ॥अथ सप्तमोऽध्यायः॥7॥

ओं एवं वै देवता लोके पाकशासनपूर्वकान्।
दृष्ट्वा चाकाशागामी तु सत्यलोकमितोऽगमम्॥1॥

तत्रैव निवासाम्यद्धा शुद्धान्तःकरणः सदा।
बध्वाहयग्रीवपादे श्रद्धायुक्तश्च सुस्थिरः॥2॥

तत्रापि मां हयग्रीवः श्रुत्यर्थं सर्वमेव च।
ग्राहयामास सर्वज्ञो वर्गे वर्गार्थं तत्ववित्॥3॥

सर्गे सर्गे तथाहं वै स्वर्गं यास्यामि मार्गयन्।
घर्घरौ तौच दैत्याग्र्यौ मधुकैटभ संज्ञितौ॥4॥

तौ हत्वा सलिले काले लोकं निर्मितिवानलम्।
पालयामि कुलालोऽपि कलशं पालयन् यथा॥5॥

एवं सृष्ट्याद्यष्टकं च स्पष्टं कष्टं विनाप्यहम्।
श्रेष्ठ सुष्ठु करोमीष्टां भक्तानां प्रेष्ठसद्गतिम्॥6॥

इति मामुक्तवान् भक्तं त्यक्त्वा सर्वं तु पातकम्।
प्राप्तं पदान्तिकं स्वस्य शक्त्या युक्तं श्रुतिग्रहे॥7॥

सहस्रपद्य तत्पद्यं तत्पदाख्यदलान्वितम्।
तद्भावसौरभभुवं जिघ्रन् बिभ्रत् स्वमूर्धनि॥8॥

विप्रास्य सरसोद्भूतं तरसा सर्वभूसुराः।
शिरसा स्वरसोपेताः श्रियैः तामरसं परम्॥9॥

धारयन्तु बुधागारे धारयन्तु सदारकाः।

आदरैः पादरजसा धूतपापाश्च येऽनराः॥10॥

इत्थं ममोक्तिरेवेयं कथं कृत्रिमवार्तया।

व्यर्थतां याति तत्वज्ञ पार्थिवेष्वपि सार्थिका॥11॥

अतिगौप्यानि पद्यानि मयोक्तान्यपि कानिचित्।

जनस्यायोग्यतां दृष्ट्वा हृतवान् विप्रवाक्यतः॥12॥

अहं त्वविश्वासमेव भाविनं भावनात्मकः।

भावयन् भानुमद्धीमन् अबुधानां हरामि च॥13॥

एवं नित्यं प्रनृत्यन् वै सत्यं कर्तुं मयोदितम्।

तत्तन्मुखे प्रयत्नानि वक्तुं तथ्यं करोमि च॥14॥

अहं धवळगङ्गायां देवैः सह मुनीश्वरैः।

अरुणोदयवेलायं स्नात्वा गच्छामि नित्यशः॥15॥

नराणां दर्शनं चापि स्पर्शनं च विमर्शनम्।

सुराणां नैव धर्मश्च सम्भाषणमपि प्रिय॥16॥

स्वप्नेऽपि चाप्तवान् श्रीमन् आयुष्मन् नरदेहिनम्।

प्राप्नोति यदि वा तापं नरके चाप्नुयाद्ध्रुवम्॥17॥

अथापि मे न दोषः सन्यान्निस्सङ्गवपुषो ऋषेः।

अघमर्षणतो दोषं शोषयामि तदप्यहम्॥18॥

| |
|---|
| तस्याद्धवळगङ्गायमङ्गीकृत्य मुनीश्वरः।<br>सङ्गी कृतावगाह सन् स्वाङ्गं यस्यामि नित्यशः॥19॥ |
| अथ ते वच्मि सत्यं च प्रश्नं मा कुरु मां प्रति।<br>शिश्नोदरपराणां च वाचं न श्रृणु नन्दन॥20॥ |
| शोषये स्मृतिमात्रेण दोषं सर्वं विपश्चिताम्।<br>हयास्यकृपया नित्यं मयास्य चरणार्चनात्॥21॥ |
| प्रियास्येव गतिः प्राप्ता प्रयास्यामि न संसृतिम्।<br>हे पुत्र वृत्र हन्तायं विचित्रं कृतवानहो॥22॥ |
| पित्राद्दष्टश्च स्वच्छत्रं  धृतवानत्र मूर्धनि।<br>धन्वन्तरिं भजे नित्यं मन्वन्तरपतिं प्रभुम्॥23॥ |
| तन्वन्तरगतश्चाहं नन्वन्तरगतोऽपिसन्।<br>अमृतांशुगतं देवं त्वमृताब्धि समुद्भवम्॥24॥ |
| अमृतं पाययन्तं मां अमृताक्तकमण्डलुम्।<br>स देवो वरदो मह्यं तदैव प्रभुरव्ययः॥25॥ |
| ददौ च दिव्यविज्ञानं मुदैव मम सेवया।<br>श्रीपतिश्चोत्तमो नित्यं सत्यं जगति तत्कृतम्॥26॥ |
| कत्थनं तच्च मिथ्येति जल्पन्ति दितिजाः सुत।<br>पूर्वं सुरासुरगणैरर्थितोऽहं कथान्तरे॥27॥ |

तथान्तरे पपुर्देवास्त्वमृतं चेतरे मृतिम्।
युद्धे देवैः सुसन्नद्धाः वृद्धा वृद्ध विरोधिनः॥28॥

मुग्धाः सद्भावतो दुग्धपयोब्धौ मध्यगाश्च ते।
तद्वेषाद्वेषरूपास्ते मृषेति मम भाषितम्॥29॥

भाषन्ते शेषशायिं च दोषीति सुषिरोक्तिभिः।
इतिमामुक्तवान् सूक्तं स्वपादे चावदत्यजत्॥30॥

कापट्यान्तकदैत्यानामन्तकं चापि तं भज

अनन्तं तं नतोऽस्मीशं देशतः कालतश्च यम्।
गुणतश्च वदन्तो ये सन्तः कान्तं श्रियः सुत।
वैद्यो धन्वन्तरिश्चायं चैद्यशापाख्यरोगहा॥31॥

चोद्यं च कृतवान् मह्यं चाद्यन्तौ हृतवान् मम।
भैषज्यं कृतवान् मह्यवैषम्यरहितः प्रभुः॥32॥

भैष्म्यापतिप्रसादाख्यं प्रेष्यस्य स महाभिषक्।
एवं ज्ञानामृतं श्रीमन्नानृतं चोच्यते मया॥33॥

को मृतिं नानुयातीह मामृते तं वदस्व मे।
हयग्रीवप्रसादेन शुभमेव भविष्यति॥34॥

भवग्राहाद्भयं नास्ति शुभग्रहनिरीक्षया।
मत्प्रसादेन पुत्रेश सुप्रसङ्गी भविष्यसि॥35॥

| |
|---|
| कुप्रसङ्गं निराकृत्य सुप्रभाते प्रियोभव।<br>नित्यं वच्मि शुचां प्राञ्चं कचं गृह्य वचो मम॥36॥ |
| विचक्षणं विचार्याहमाचार्या प्राक्कतुर्विधम्।<br>तत्वं तत्वविदां श्रेष्ट मत्वा तन्मतमव्ययम्॥37॥ |
| कृत्वाकृत्वाहमत्यन्त सुखी भव शमिन् सदा।<br>वसामि नित्यं श्रीशस्य सभायां सारवत्तया॥38॥ |
| व्यासात्पाराशरात्सार तत्वानि स्मारितोऽभवम्।<br>बदरीपुरवासे तु मदिरापानतः सुत॥39॥ |
| कदरीकृत चारित्रान् विददार हरिः स्वयम्।<br>नरनारायणात्पुण्यं श्रृणोमि मुनिमण्डले॥40॥ |
| स्मरणात्सर्वपापघ्नात् करणं मुक्ति पद्धतेः।<br>व्यासोऽपि दासाय विशालबुद्धेः शशास मह्यं जगदीशदास्यम्।<br>सदा हयास्यं समुपास्य श्रीशं सेषं सशेषं जगदास दासम् ॥ |
| विरिञ्चि पूर्वं कविरञ्जितं हरिम्स्वरञ्जितं मौनिजनैरथाञ्चितम्।<br>स्मरं जय त्वं स्मरमारखञ्जनिम्यद्रञ्जितं त्वद्धृदयं निरञ्जनम्।<br>इति मामुक्तवान् व्यासो दासं भासुरविग्रहः॥43॥ |
| मन्दहासान्वितो नित्यं इन्दिरेशोऽपि मां तदा।<br>सुषिरोक्तिभिरित्युक्ते कषणोक्तित इत्यहो॥44॥ |

| |
|---|
| भाषसे भेषजं किं ते जिह्वाया अपि तद्वद।<br>वातापित्तादि दोषाणां मेलने सति कालतः॥45॥ |
| बालकान् सतिमित्रादीन् प्रतिकालयते यथा।<br>तथा वदस्यन्यथा त्वं कथां वक्ष्ये हरेरथो॥46॥ |
| त्वत्कथा मत्कथायुक्त सर्वथा मा वृथा भवेत्।<br>सैव ते भेषजं भाषाः प्रेरयिष्यति नान्यथा॥47॥ |
| निर्दोषाणां मृषा वाणी न भविष्यति  सर्वथा।<br>तस्माद्वक्ष्ये कथां तथ्यां प्रतितान्वय सम्भव॥48॥ |
| तिथौ तिथौ मा कृथात्वं व्यथां तात वृथा वृथा।<br>तथा तथा भवत्येव हरिः कर्ता यथा यथा॥49॥ |
| हरेराज्ञां पुरस्कृत्य स विधिः वर्तते विधौ।<br>हरश्च हरते सर्वं स्वयं चास्यस्थितौ तथा॥50॥ |
| गरुं हित्वा तु गुर्वर्थं गीर्वाणाः सर्व एव च।<br>गन्धर्वा अपि गान्धर्व शौण्डाः पण्डितमानिनः॥51॥ |
| हरिं ययुर्मुरारिं तच्चरणं परमादरात्।<br>सुरास्ते किङ्करवराः शरणं प्रापुरञ्जसा॥52॥ |
| करदा वरदायाथ स्मरदाश्रयदाय च।<br>परदारपरान् देव विदारय क्रुधा रिपून्॥53॥ |

विदारयासिधारया सुधारसमुदीरय।
उदार सादरं धारां पदारविन्दजां भर॥54॥

इत्यूचुः सोऽचिरं वाक्यं श्रुत्युक्तं प्राक्तनं च ते।
यौक्तिकं शौक्तिरूप्यत्वं मतं चातात्विकं जगुः॥55॥

इति सम्प्रार्थितस्तस्य भक्त्याऽकृत्रिमया सुत।
कृत्यं तत्कृतवानत्र चित्रं हरिकृतं बत॥56॥

पारम्पर्येण राजत्वं तदीयानं मदीरितम्।
अतश्चिरेति धैर्यार्थं पूर्वं मे वागुदीरिता॥57॥

तत्त्वज्ञानां मुनीशानां शासनं न विनाप्यतु।
शनैर्मद्वचनं जानन् धीमन् मद्वचनं शृणु॥58॥

अहं पूर्वेऽपि सर्वज्ञो गुर्वाज्ञां त्वमगर्वितः।
शिरसा धारया प्रार्थ्यामीश्वरज्ञोऽतिशीघ्रतः॥59॥

परदारेति पूर्वोक्ताः गरदाः स्वपतौ च या।
विददार हरिः सर्वाः असिधाराभिरेव ताः॥60॥

तत्परं स हरिः स्वैरं गरखड्गात् न्यकृन्तत।
वरदः परदेशस्थ स्मरदाश्रयदः स्वयम्॥61॥

रामो राजीवनेत्रोऽसौ रावणावरजे यथा।
करदा वरदायाथ स्मरदाश्रयदायच॥62॥

| |
|---|
| इति पूर्वं मया प्रोक्त मनुसन्धत्स्व बुद्धिमन्।<br>वादिराजाग्रतः क्षुद्र राजकार्यं कुतः सुत॥63॥ |
| वादीभमृगराजोऽहं वादिराजो हरिं भजे।<br>इत्यपि स्वोक्तमेवात्र ह्यनुसन्धेयमन्वहम्॥64॥ |
| इति सर्वज्ञतां शान्त स्वान्तस्थं कुरु चान्तकम्।<br>मां तातं सन्ततं त्वं च चिन्तयित्वा निकृन्तय॥65॥ |
| तस्यापि स्वोक्त दार्ढ्यार्थं स्वप्ने वक्ति रघूत्तमः।<br>कात्र शङ्कापि ते मास्तु शास्त्रज्ञ मम सत्कृतौ॥66॥ |
| उदार सादरं धरां पदारविन्दजां भर।<br>हृदादरान् मदीरितं हृदि स्थितं सदा कुरु॥67॥ |
| इत्यहं प्रार्थयाम्यद्धा बुद्धिसिद्धेश्वरं हरिम्।<br>प्रवृद्धज्ञानसंशुद्ध समिद्धाग्निरिव ज्वलन्॥68॥ |
| अतस्तदीरितं वाक्य मैहिकामुष्मिकं च यत्।<br>तत्स्व कुरु गुरूक्तं चेत्यतो भवति ते शुभम्॥69॥ |
| तथैव शेषमुद्दिश्य मद्वाक्यं समुदीरितम्।<br>विश्वासे सति तद्वै स्यात् नस्याद्वा तदभावतः॥70॥ |
| विश्वासिनामवश्यं तु तद्वै स्यात्पश्य शोभनम्।<br>स्वस्याविश्वासतः शान्त न स्याद्वाक्यस्य दोषिता॥71॥ |

| |
|---|
| विश्वासिनां समाजे च न पश्यामि हि तादृशम्।<br>यादृशं व्यासभक्तेशं तथा सीतापतेर्मतम्॥72॥ |
| तयोर्विश्वसतोर्वीशाधीश श्रीशोऽत्र शोभनम्।<br>दास्यत्यसंशयं पश्य मत्प्रसादात्स विश्वकृत्॥73॥ |
| गुरुप्रसादतः कस्य फलं न स्यादवश्यतः।<br>करिष्यत्वेव तत्स्वामी तत्प्रसादानुसारतः॥74॥ |
| प्रसादं मत्प्रसादेन प्रसादं स करिष्यति।<br>कः प्रसादमृते क्वापि प्रसीदति न सीदति॥75॥ |
| तस्माद्गुरौ सदा धीर रतिं कुरु हरौ प्रिय।<br>गुरुद्वारा प्रसन्नः सन् भरति त्वां रमापतिः॥76॥ |
| शुद्ध सद्धर्म सिद्धानां पद्धतिं बुद्धिमान् कुरु।<br>क्रुद्धो मद्धर्म रुद्धानां पद्धतौ स्तब्धतां कुरु॥77॥ |
| सिद्ध मद्धर्मपद्धत्या श्रद्धावान् मधुसूदनम्।<br>आराधय बुधाराध्यं विबुधेश्वरबुद्धिगम्॥78॥ |
| मधुं क्रुद्धं तु धीमान् यो गदाधाराहतं व्यधात्।<br>अर्चिमार्गेण गत्वाहं स्वर्चितः सर्वदैवतैः॥79॥ |
| चर्चितश्चन्दनैर्दिव्यैर्नार्चन्मां  कोटि सद्गुणम्।<br>ईश्वरस्य प्रसादेन सेश्वरं जगदद्यमे॥80॥ |

| |
|---|
| प्राश्रितं चास शास्त्रेश मात्रा सः सर्वथा तव।<br>तमीश्वरं भास्वरसूर्यशौर्यदं ममेश्वरं सर्वजगच्च सेश्वरम्॥81॥ |
| मुनीश्वरैः सर्वसुरेश्वरेश्वरै-र्वशेकरं सर्वमहेश्वरं स्मरे।<br>अनन्तासनपर्यन्तं अनन्तपद सञ्चरन् ॥82 |
| अनन्तशयनं दृष्ट्वाह्यनन्तसुखमन्वहम्।<br>अनुभोक्ष्ये शनैर्वक्ष्ये मुने लक्ष्यं मनःक्षतिम्॥83॥ |
| तनुक्षतिं न वक्ष्येहं वक्ष्ये ननु मनःक्षतिम्।<br>तनुक्षतिं क्षमे नित्यं क्षमे नाहं मनःक्षतिम्॥84॥ |
| दक्षान्मनःक्षतिं त्र्यक्षः क्षमते किं विचक्षण।<br>मन्मनो वेदानां सद्यः पद्यैर्वक्ष्येत्र नन्दन॥85॥ |
| त्वदग्रतो बुधाग्र्यस्त्वं कुरु शीघ्रं तदग्रतः।<br>अध्यायान् गुरुपद्यानां स्वाध्यायान्न विनाप्यनु॥86॥ |
| श्रद्धावान्नैव कृद्धोऽहं वृद्धमङ्गीकुरु प्रिय।<br>शीलास्थां कुरु शीलाढ्य सालप्रांशऽमलां कृतिम्॥87॥ |
| लोकेशः पालयेत्सत्यस्त्वां बालं कालकालतः।<br>एतद्दुःखेन मे सर्वं सुखं मे पारलोकिकम्॥88॥ |
| विषमिश्रामृतं यद्वत्तद्वदेव भवत्यहो।<br>एतत्कार्यत्रयं शिष्टमिष्टं कुरु यथेष्टतः॥89॥ |

| |
|---|
| स्पष्टं मे मनसस्तुष्टिं शिष्ट साधय साधु भोः।<br>इतः परं न वक्ष्यामि कुतो वक्ष्ये निरन्तरम्॥90॥ |
| सुतान्तरं न पश्यामि मतं मे साधकं त्वलम्।<br>हे पुत्र शास्त्रवक्ताहं स्तोत्रं कुरु ममात्र तु॥91॥ |
| हे मित्र पात्रभूतोऽयं कात्र शङ्का तु कृत्रिमा।<br>अन्यथा परसौख्यं मे दुःखासम्भिन्न मेवहि॥92॥ |
| कोऽन्यथा वक्ति तत्वज्ञ मन्मतज्ञ वृथाज्ञता।<br>ब्रह्माण्डसमभाण्डैर्मे माण्डव्यमुनिपाचितम्॥93॥ |
| शाण्डिल्य शौण्डितं चान्नं कौण्डिण्यपरिवेषितम्।<br>चतुर्विरचितं तच्च चतुर्मुखसुचर्चितैः॥94॥ |
| चतुर्वेदोदितार्थैश्च चतुराश्रमवर्तिभिः।<br>उपेन्द्रेण सह प्रेम्णा ह्युपते गा दिवाकरम्॥95॥ |
| उपभोक्ष्ये ह्युपेक्षा तु ह्युपक्षोकृषु नास्ति मे।<br>मम भोजनसन्तोषं सुजनाम्बुजभास्करम्॥96॥ |
| कुजनाम्बुजसङ्कोचे द्विजराजं ममात्मजतम्।<br>वदन्तं द्विच ते कल्पभुजं मज्जनतां प्रति॥97॥ |
| मदजाड्यरुजाहीनं द्विचाराध्यं भजाद्य तम्।<br>मम भोजनसन्तोषं ये श्रुण्वन्ति मुनीश्वर॥98॥ |

| |
|---|
| तेषामन्नानि सम्पूर्णानीति सत्या फलश्रुतिः।<br>मम भोजनसन्तोषं ये च श्रुण्वन्ति नित्यशः॥99॥ |
| तेषामप्यनिशं विप्र सहभोजनमेव च।<br>इत्येकं श्लोकमेके च न वदन्ति मुनीश्वर॥100॥ |
| पाकशासनलोके च को न वक्ता च नाकिषु।<br>तेन ते भविता तोषो दोषोपि तदनादरात्॥101॥ |
| मदनादरतो यद्वत् 'द्विजं तोषय याजय'।<br>कुरु कार्यत्रयं शिष्टं परलोकसुखं हरम्॥102॥ |
| अन्यथैतच्चिन्तयामि कान्त कातरता भवेत्।<br>स्वान्तरस्थां कुरु श्रान्तिं मा  तराय सुकार्यतः॥103॥ |
| एतत्कार्यत्रयं पुत्र शत्रुहास्याभिमन्त्रितम्।<br>चित्रं गुरूक्तमप्यत्र पुत्रेण नकृतं त्विति॥104॥ |
| यादृशोऽहं गुरुर्धीरः तादृशः शिष्य एव च।<br>इति मे हन्त दैतेया हास्यं कुर्वन्ति नित्यशः॥105॥ |
| तस्मात्कुरु गुरूक्तं ते मनसा स्मर धीर भो।<br>कार्यत्रयं त्रिकालेऽपि कदा कुर्यां तदीरितम्॥106॥ |
| सत्यं सत्यं पुनः सत्यं विप्रोक्तिर्नैव मत्कृतिः।<br>सत्यं तथ्यं पुनस्तथ्यमेतत्कार्यत्रयं सुत॥107॥ |

| |
|---|
| तत्पादकमलं फुल्लं मद्गले बध्यतेऽमल।<br>उपलस्थलपर्यन्तं मम निर्मलसत्कृतेः ॥108॥ |
| अध्यायकृतिपर्यन्तं स्वाध्यायं कुरु मङ्गलम्।<br>बुध्यारोहय मद्धार्यं वृद्धं विप्रमतिप्रियम्॥109॥ |
| एतत्कृत्यत्रयस्यापि सुनिष्कृत्यर्थं मेव च।<br>प्रत्यहं कुरु पुत्रेह मत्प्रियं विप्रसाक्षिकम्॥110॥ |
| हे सीतापति भक्तेश हा तोक्तं प्रति मे वद।<br>होमे वा जुह्व तद्वाक्यं हूहूगन्धर्वगानगम्॥111॥ |
| कार्यत्रयं नष्टमासीत् षष्टिकालव्रतं चरे।<br>ममेष्टसिद्धिपर्यन्तं कष्टं त्याजय भोजभो॥112॥ |
| हेपुत्र तव चाप्तीश्चेच्छ्रुत्वा सीतापतेर्वचः।<br>कार्यत्रयं शत्रवाणां नैव हास्यास्पदं कुरु॥113॥ |
| पञ्चवृन्दावने पुण्ये पुराणं पञ्चलक्षणम्।<br>पञ्चास्यवाक्यसन्दिष्टं त्वं च कारय भूरिषः॥114॥ |
| निर्विघ्नतः कुरु त्वं च ह्यविघ्नं त्वग्निसन्निभम्।<br>संसारयो निमग्नानां तद्रुजां रुग्णकर्मणाम्॥115॥ |
| अहं निमिषमात्रेणनिमिषैस्सहनैमिषे।<br>मनुष्यलोकमायुष्मन् मनीष्यामि मुनीश्वर॥116॥ |

नैमिषारण्यगस्यापि नो विषादस्त्वभून्मम।
मनीषिणां मतं वक्ष्ये सर्वं तव श्रृणोषि चेत्॥117॥

मनीषिणां मनःस्थं च भणेऽद्य श्रुणु नन्दन।
गुणिनापि स्वपुत्रेण मुनिनां स्वामिनस्तव॥118॥

कृत्यं न कृतमप्यत्र चित्रं हरि कृतं बत।
इति पृच्छन्ति मां नित्य सत्यं सत्यं मयोदितम्॥119।
मुनयो नैमिषारण्यवासिनोऽपि निराशिनः।
मयि सन्मानिनो नित्यं मुने तानपि तोषय॥120॥

त्रिभिः पुत्रस्य पुत्रत्वं वित्त श्रुत्युक्तमेव च।
कृत्यत्रयं त्वमप्यत्र कृत्वा पुत्रत्वमाप्नु हि॥121॥

पुदित्याहुः पूयशोणादि भाजं व्याजान्मया नोच्यते चात्मजाद्य।
तस्मात्त्राता पुत्र इत्येव चात्र यः कथ्यते सोऽपि त्वमेव नान्यः॥122॥

इत्येवं पुत्र शब्दार्थः त्वय्येवास्ति सुपुत्रक।
ततः कृत्यत्रयं विप्र करु चित्रं नच त्वयि॥123॥

तस्मात्कृत्यत्रयं पुत्र कुरु मित्र ममात्र तु।
पुत्र शत्रो सुमित्रस्य माऽत्रते संशयो भवेत्॥124॥

मम सन्तोषणार्थं च मुनीनां तोषणाय च।
तव पुण्यार्थमप्यत्र कुरुष्व निपुणाय तत्॥ 125॥

एवं चेदहमेवात्र पिता तव न संशयः।

त्वमेव मम पुत्रश्च नान्यः कश्चन विद्यते॥126॥

तुङ्गभद्रानदी तीरे गङ्गा स्नान परायणः।

रङ्गनाथप्रियार्थं च साङ्गं कुर्यां तपस्त्वहो ॥127॥

तुङ्गभद्रानदींगत्वा गङ्गासङ्गात्सुपुण्यदाम्।

अङ्गनाऽसेवितः स्वाङ्गैः साङ्गं कुर्यां तपस्त्वहो॥128॥

एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् दृष्टोर्वशीं यान्तु मां मानवेन्द्राः॥ 129॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥130॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥131॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थ करकमलसञ्जातश्रीमद्वादिराज पूज्यचरणोदित

स्वाप्नवृन्दावनाख्याने अलौकिकविभागे सप्तमोऽध्यायः समाप्तः॥

## ॥ अथ अष्टमोऽध्यायः॥8॥

ओं तुङ्गभद्रानदीतीरे गङ्गासङ्गात्सुपुण्यदे।

मङ्गलार्थं पितॄणां च स्वाङ्गां द्वादशनिष्कदाम्॥1॥

| |
|---|
| दत्तवान् वित्तपूरdवं मे मत्तेऽपि स्वहितोऽपि च।<br>तृप्त्यर्थं तात पूर्वेषां पितॄणां नात्र संशयः ॥2॥ |
| भद्रानद्याश्च  तीरेऽपि पितृणां श्राद्धतद्दिने।<br>सुभद्रावाप्ति सिद्ध्यर्थं दाता पूर्वं ददावथ॥3॥ |
| इतिमन्त्रत्रयं विप्र कुतो न लिखितं त्वया।<br>तव हस्तस्य पातोऽयं दत्तापहरतो भवेत्॥4॥ |
| दत्तवानहमेवेष्टं तत्पितॄणां त्रिविष्टपे।<br>कष्टं नायात्यविस्पष्टं षष्टिवर्षसहस्रकम्॥5॥ |
| होमे वा जुह्व मद्वाक्यमित्युक्ते तव जिह्वया।<br>दहेति चोच्यते हाहा किं ते जिह्वा दहेत्यहो॥6॥ |
| अश्लीलभाषा मातेयमावालं विषयेऽमला।<br>शीलाढ्यं तु कुलाढ्यं प्रत्यश्लीलोक्तिर्न चोदिता॥7॥ |
| सावधानमनाः श्रीमन् श्रवणे भव सद्गुणे।<br>भवने भव मे नित्यं तव नैवास्त्यसन्मतिः॥8॥ |
| हिमवत्पर्वतं गत्वा समहत्पर्वणि स्फुटं।<br>अगमं पर्वतस्योर्ध्वं अनवत्पर्वतोऽपि माम्॥9॥ |
| तद्दस्तोतापरिमद्धस्तः मधिरोप्याऽद्रेण च।<br>ऋद्धिमद्धिमवद्गेहमारुहं बृहदुन्नतम्॥10॥ |

तेन सम्पूजतश्चाहं मेनकासंयुतेन च।

मानितो बहुमानैश्च कामेन हरितोऽप्यहम्॥11॥

रत्नकोटिभिराटोपयुक्तैश्च तटिदम्बरे।

यथास्फुटं मेघसङ्घघटिता धूर्जटेर्मतैः॥12॥

अभिषेकं सुषेणाग्र्यकृतवान् दोषवर्जिते।

अपि मेषगते पूष्णि शेशशायिप्रियैः सह॥13॥

मत्प्रसादापन्नरत्ननिचयान् सुचरित्रिषु।

अददां मदनावेशरहितेषु मुनिष्वहम्॥14॥

इत्यादि कृतसत्कारैः अतिपूज्योऽहमेव तैः।

हिमवत्पर्वताद्यैश्च सुमते श्रृणु वैभवम्॥15॥

ममाभिषेकस्य महोत्सवं तु ये दोषयुक्ताश्च विशेषतोऽपि।

श्रुत्वा च तद्दोषलयं प्रयान्ति निर्दोषभूता च न मे मृषा वाक्॥16॥

हिमवच्छिखरादूर्ध्वं स्वर्गं आरुहमार्यज।

घर्घराध्वानगाः सर्वे मुनयो मार्गयन्ति माम्॥17॥

त्रिविष्टपादहं यास्ये विष्टरश्रवसं सुत।

कष्टं च मम नैवास्ति वैकुण्ठपतिदर्शने॥18॥

मन्दर कुन्धरं गत्वा सुन्दरं त्विन्दिरापतिम्।

गन्धर्वसेवितं सेन्द्रवृन्दारकमनोरथम्॥19॥

अमृताब्धौ सुधासिद्धिपर्यन्तमकरोद्धियः।
तं नतोऽस्म्युन्नते देशे तिष्ठन्तं चाष्टसद्भुजम्॥20॥

तस्मिन् मन्दर वृन्देच मन्दारः कश्चनागतः।
सौन्दर्यसार सान्द्रैश्चवेन्दिरे वेन्दिरापतिम्॥21॥

मम सौन्दर्यसारं च दृष्ट्वा हृष्टो बभूव च।
अनङ्गवशमासाद्य स्वाङ्गानि मम दर्शयन्॥22॥

अनङ्गसङ्गनिस्सङ्गं मां सन्दृश्य सुविस्मितः।
अभवत्सभवानीव दृष्ट्वा च भवमव्ययम्॥23॥

भवेदेतादृशो भर्ता मम चात्र भवे भवे।
इति स्वस्येष्टदेवस्य तुष्टिं चक्रे यथेष्टतः॥24॥

काष्ठमौनं सामासाद्य श्रेष्ठ सोऽतिष्ठदत्र च।
अङ्गुष्ठमात्रतः प्रेष्ठ सुष्ठु निश्चेष्टताङ्गतः॥25॥

इष्टदैवं प्रति स्वेष्टं याचयंस्तत्र वै स्फुटम्।
इति दृष्ट्वाच तत्कष्टं मामुवाच स विठ्ठलः॥26॥

तस्येष्टं कुरु शिष्ट त्वं ममाभीष्टमिदं तवा।
मत्प्रेक्षायाः परीक्षार्थं तं पक्षीकृत्य पुत्रक॥27॥

मत्वा रमापतिः साक्षात्परिरेभे मुदा तदा।
तं दारं प्रत्युवाचेदं मन्दारवनमध्यगः॥28॥

| |
|---|
| किं दारं जन्मकामार्तं वृन्दारकगुरुं प्रति।<br>भवान्तरे भविष्यन्तेऽभीप्सितं मास्तु तद्वृथा॥29॥ |
| सत्यं मयोदितं कान्त तावत्पत्यं तपः कुरु।<br>इत्युक्तो हरिणा दारो गिरिमूर्ध्नि परात्परम्॥30॥ |
| शरण्यं शरणं प्राप मां स्मरन् हृदि सर्वदा।<br>ममापि प्राप्तवान् कामात् कमनीयं त्वमानवम्॥31॥ |
| सम्मानय मनस्तेन शमयानङ्गसङ्गमम्।<br>भवान्तरेऽपि मां धीर तेऽधरामृतमन्वहम्॥32॥ |
| वितरार्ये तदर्थे च मत्करं शिरसा धरन्।<br>अहं यास्ये त्वया दत्तविश्वासं सत्यमेव च॥ 33॥ |
| कुरु शीघ्रं सुरश्रेष्ठ श्रेयसे मे भवाय च।<br>इत्युक्ता प्रययौ दारः कामराहित्यमार्जवम्॥34॥ |
| ख्यापयामास लोके मे सर्वत्र सुचरित्रिणः।<br>इमां कथां च  ये नित्यं श्रृण्वन्ति यतयोऽपि तु ॥35॥ |
| लभन्ते कामतः शान्तिं सुत सत्यं मयोदितम्।<br>मयोक्तश्लोकपूगेषु वक्तुं योग्यान् पृथक्कुरु॥36॥ |
| ये लौकिकार्थाः भासन्ते श्लोकांस्तान् कुलभूषण।<br>चतुरध्यायगान् साङ्गां गङ्गास्नानफलं तव॥37॥ |

| |
|---|
| मङ्गळायनमाशास्यं निःसङ्गस्य वचो मम।<br>अष्टाध्यायेषु शिष्टानां तुष्टिं कुरु यथेष्टतः॥38॥ |
| प्रौढिं पश्यामि ते सुष्ठु ममेष्टं शिष्ट साधय।<br>इति च द्वादशाध्यायान् कुरु शीघ्रं बुधाग्रतः॥39॥ |
| अहमाकाशगो नित्यं नाकिभिः सह लोकदृक्।<br>पाकशासनमुख्यानां तोक मे श्रुणु वैभवम्॥40॥ |
| मद्विमानमथाकाशे निमिषार्धेन च द्रुतम्।<br>विरिञ्चलोकपर्यन्तं धावतीत्यधिरोप्य माम्॥41॥ |
| चक्रवद्भ्रमते नित्यं शक्रलोके च पुत्रक।<br>वक्रबुद्धिहृदः शल्यमिव चङ्क्रमतेऽनिषम्॥42॥ |
| दिक्षु सर्वासु वृक्षेषु नन्दस्थेषु नन्दन।<br>स्यन्दनेन चराम्यङ्ग गङ्गातीरे तरङ्गिणि॥43॥ |
| एवं महानुभावोऽहं भानुमण्डलगं हरिम्।<br>तद्रथस्योपरि प्राप्य प्रार्थयामि तमीश्वरम्॥44॥ |
| कमनीयं कामहीनोऽप्यनिशं भानुमन्वहम्।<br>मानितस्तेन देवेन मानिन् श्रुणु हरिप्रियम्॥45॥ |
| नानाविधैरनेकैश्च वाहनैर्वाहकैर्युतैः।<br>चरामि मारतातं च स्मरामि हृदि सर्वदा॥46॥ |

| |
|---|
| मर्त्यलोकं तु हित्वाहं सत्यलोकमितोऽगमन्।<br>श्रुत्यभावं कर्तु कामो दैत्यः कश्चिद्धतो मया ॥47॥ |
| इति पूर्वं मया प्रोक्तमनुसन्धत्स्व बुद्धिमान्<br>तस्मात्सर्वोत्तमो नित्यं जगतः पतिरप्रतिः॥48॥ |
| श्रियःपतिः सुरपतिः स विरिञ्चपतिः स्वयम्।<br>मयोक्तसर्वोत्तमत्वं श्रुत्वा सर्वे सुरारयः॥49॥ |
| गर्विता वै हरिं नागुः शर्वं चापि गुरुं च माम्।<br>साम्यबुध्यातामसास्ते मेघच्छन्नमिव ग्रहम्॥50॥ |
| कामतातं कोमलाङ्गं मानवं मेनिरे हरिम्।<br>मयोक्तसर्वोत्तमत्वं श्रुत्वा सर्वे हरिप्रियाः॥51॥ |
| गुर्वन्तर्यामिणः स्वैरं करं दास्यन्तु भूरिषः।<br>ममापि जीवोत्तमत्वं श्रुत्वा सर्वे मम प्रियाः॥52॥ |
| गर्वं हित्वा प्रदास्यन्तु गुर्वन्तर्यामिणः  करम्।<br>इत्थं सर्वोत्तमत्वं तु श्रुत्वा सर्वेऽपि सात्विकाः॥53॥ |
| हित्वा संसृति मार्गं तु यान्तु विष्णोः सलोकताम्।<br>एवं मया जगत्सर्वं वैष्णवं चास सात्विकम्॥54॥ |
| आसुरं शार्वमेवास मयोक्तेऽपि स्वयोग्यतः।<br>मद्भक्ताः सुखिनः सन्तु शश्वज्जीवन्तु मत्प्रियाः॥55॥ |

| |
|---|
| ममाभक्ताः प्रयास्यन्तु तमोऽन्धं तामसाश्च ते।<br>अहं नक्षत्र मध्यस्थः सुक्षेत्राणि प्रकाशयन्॥56॥ |
| तत्क्षेत्रवासिनः सर्वे भिक्षामात्रं ददुश्च मे।<br>इतितेषां वदन्नित्यं तन्मध्यस्थो भवामि च॥57॥ |
| मत्तेजसा तिरस्कारः सर्वेषां तेजसामभूत्।<br>यथा सूर्यप्रकाशेन तेजसां च तिरस्कृतिः॥58॥ |
| तथा मत्तेजसा सर्वतेजसां च तिरस्कृतिः।<br>स्यात्पश्यतां च नेत्राणि विमुष्णन् विष्ण्वाज्ञया सदा॥59॥ |
| आहं निषण्णस्तन्मध्ये विषण्णः सर्व एवे ते।<br>इत्थं तैजसदेहानां सन्दोहं सन्ददाति मे॥60॥ |
| बुधाग्रस्य स्वपादाब्जसेवया वै गदाधरः।<br>शारदा नीरदश्यामा नारदाराधितादरात्॥61॥ |
| वेदोदरी श्रीधराज्ञाधारिणी मे सुवाग्धरा।<br>रथस्योपति तिष्ठन्तमरुणोन्यरुणद्धिमाम्॥62॥ |
| वरुणं प्रतिगच्छन्तं चरणेन विनाकृतः।<br>मात्रा भ्रात्रा विहीनोऽहं त्राता त्वं मम सर्वदा॥63॥ |
| यात्रां न कुरु चात्रापि तिष्ठ रूपान्तरेण च।<br>गरुडाग्रज इत्थं मामवदज्जरठाद्य च॥64॥ |

| |
|---|
| इति तेनोक्त एवाहं कान्तरूपान्तरेण च।<br>वसामि वसुभिः साकं कश्यपात्मज पूजित॥65॥ |
| करटाभः स्वबुध्या त्वं मद्बुध्या श्रेष्ठ एव च।<br>वरुणोऽपि तदाह्वातुमागतो मां प्रति प्रिय॥66॥ |
| कान्तरूपान्तरेणापि तद्गेहं गतवानहम्।<br>यमोऽपि मां समाह्वातुं स्वयमेवागतो महान्॥67॥ |
| रामस्वामीक्षते काममागमिष्यति मत्प्रियः।<br>इत्यवोचद्वचः प्राज्ञन् काञ्चनेच्छाऽरुचिं च माम्॥68॥ |
| हरिलाञ्छनसञ्छन्नं शङ्खचक्राङ्कितं भुजे।<br>कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥69॥ |
| शान्तं कान्तं पराक्रान्तं रामं तं सन्नतोऽस्म्यहम्।<br>इन्द्रोऽपि सान्द्रसन्तोषादुपेन्द्रस्याज्ञया प्रभुः॥70॥ |
| केन्द्रस्थानगते चन्द्रे मुनीन्द्रं मां समाह्वयत्।<br>कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥71॥ |
| तमुपेन्द्रं चिदानन्द सान्द्रसुन्दररूपिणम्।<br>कन्दाशनेन्द्र वन्द्योऽहमिन्दिरापतिमव्ययम्॥72॥ |
| नतोऽस्मि तस्य सन्दृष्टिं सङ्गतोऽस्मि समागमम्।<br>प्राप्तोऽस्मि स्वामिनः श्रीनिवासस्य मनसाप्यहो॥73॥ |

पापान्धकार संरुद्धः कुर्वन्यो दीपमालिकाम्।

कोपान्धकारितमुखं भास्करिं च न पश्यति॥74॥

तदैव मां समाह्वातुं धनदोऽपि समागतः।

सदैव मे ग्रहावासं विबुधेन्द्र कुरु प्रिय॥75॥

इतिमामुक्तवान् भक्त्या शक्त्या हस्तं प्रगृह्य मे।

स्वगृहं प्रापयामास प्रीत्या विप्र न संशयः॥76॥

कान्तरूपान्तरेणापि तद्गेहं गतवानहम्।

तदैव शूली शिरसि त्रिशूली हस्ते गले सक्तनृरुण्डमाली॥77॥

दलीकृतान्धश्च शिलीमुखेषु हालाहली गलमध्ये महात्मा।

स्मशानवासी धृतभस्मराशिर्भस्मीकृतः त्रिपुरः पौरुषेण॥78॥

भस्मासुराज्ज्ञातभयी पिनाकी नाकीश्वरं मां समुपाजगाम॥79

गङ्गाधरो मङ्गळनाम मूर्ध्नि ध्यानान्तरङ्गी सर्वलिङ्गान्तरस्थःस्वार्धाङ्ग्याच सार्धं।

उत्तुङ्ग  कैलासकृताङ्ग वासो निःसङ्गिनं मां त्वागतः स्वगतोस्या॥80॥

आह्वयामास मां प्रीत्या मापतेः प्रियमुत्तमम्।

कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥81॥

एवं सर्वेऽपि देवाश्च कालेनैकेन मां तदा।

आह्वयामाससुरायान्तमगमं बहुरूपकैः॥82॥

भस्मराशिरितिप्रोक्ते धृतेत्युपपदेन च।

साकं शोकविहीनेन कृतभस्मेति चोच्यते॥83॥

| |
|---|
| ताळपत्रे तथा विप्रलेखनं नैव कारय।<br>लोकवार्तां त्यज त्वं तूलूखले बद्धगोपकम्॥84॥ |
| स्मर क्षिप्रप्रसादं तु स करिष्यति दारकः।<br>द्वारकापतिरेवायं मद्वृन्दावनमार च॥85॥ |
| नीलात्मकस्तदैवाग्निः कालाग्निरिव लोकहा।<br>ममालयं समागच्छ मां पालय सुशील भो॥86॥ |
| इत्युवाच स तेजस्वी तेजोरूपं च मां प्रति।<br>कान्तरूपान्तरेणापि तद्गेहं गतवानहम्॥87॥ |
| तदैव निर्ऋतिः प्राप्तो वररुचिरुवाच सर्वदा।<br>वायुप्रभृतिभिः सार्धं स्वैरं विहर मद्गृहे॥88॥ |
| इत्युक्तवन्तः ते सर्वेऽप्याह्वयामासुरञ्जसा।<br>तत्तद्रूपान्तरैरेव तत्तद्गेहमगां तदा॥89॥ |
| व्यञ्जनस्याधिकत्वेन न छन्दस्यतिदूषणम्।<br>स्वच्छन्दवृत्तेर्मम च कश्छन्दोभङ्ग एव च॥90॥ |
| इत्थमेवाष्ट दिक्पालैः स्पष्टं सम्प्रार्थितोऽस्म्यहम्।<br>हृष्ट रूपान्तरैरेव शिष्यामि दिशो दश॥91॥ |
| मूलरूपेण बालार्कसदृशं कमलेश्वरम्।<br>नीलमेघप्रतीकाशं लोकदृष्ट्या महाबलम्॥92॥ |

| |
|---|
| समयेन दृढं बध्वा कमनीयं त्वमानवम्।<br>शमनं तन्मनः कामं वामनं तं नतोऽस्म्यहम्॥93॥ |
| चन्द्रमण्डलगं विष्णुमिन्द्राण्याखण्डलार्चितम्।<br>सान्द्रं कमण्डलुधरं चोपेन्द्रं चाण्डलघ्नकम्॥94॥ |
| भजामि भजनीयं तं भुजगेश्वरशायिनम्।<br>कुजनाशङ्कया जात वृजिनार्तिहरं च मे॥95॥ |
| मयि ब्रह्माच वायुश्च वर्तते सर्वदाऽपि हि।<br>यावन्मम विमुक्तिः स्यात्तावत्पर्यन्त मेव च॥96॥ |
| अतो मया यदुक्तं तु तत्सर्वं युज्यते मयि।<br>अधिकारिषु सर्वेषु चोत्तमोऽहं न संशयः॥97॥ |
| इदं सर्वेऽपि जानन्ति देवाश्च ऋषयस्तथा।<br>गन्धर्वा अपि सर्वेऽपि दानवा मानवाश्च न॥98॥ |
| सर्वलिङ्गान्तरस्थश्च मयोक्तं त्यज्यते त्वया।<br>मयानुक्तमपि स्वार्धाज्ञ्या च सार्धं तु गृह्यति॥99॥ |
| उक्तमेव तु वक्तव्यमनुक्तं न कदाचन।<br>मत्सत्रभोजनं भुक्त्वा मदुक्तं त्यक्तवानसि॥100॥ |
| मया द्विमुखतश्चोक्तं सुमुख प्राग्द्विधा कृतम्।<br>इदानीं मुख्यमेवोक्तमेकेनैव मुखेन तु॥101॥ |

अनेकमुखसम्पन्नः मुखमेवानुभूयते।

मखैरपि दुरापन्नं खगमुख्यैश्च दैवतैः॥102॥

एतत्सर्वं स्वाप्नपद्येन गर्वम्

हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान्

दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥103॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥104॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥105॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौहरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभास्ति सन्मतीः ददात्यजस्रं सुतसत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराज पूज्यचरणोदित

स्वाप्नवृन्दावनाख्याने अष्टमोऽध्यायः समाप्तः॥

## ॥ अथ नवमोऽध्यायः॥9॥

ओं हनूमान् बहुनामायं न्यहनद्गहनादरी।

सहनामा महारूपो महानाम्नि महोत्सवे॥1॥

नमामि तं महात्मानं हनूमन्तमथाहवे।

न्यहनद्यो महारक्षो ह्यक्षं त्वक्षयविक्रमः॥2॥

| |
|---|
| रेमे सेवासु निरतो कामेन रहितः सदा।<br>यस्य नाथ प्रसन्नात्मा ददौ स्वात्मानमेव च॥3॥ |
| तद्वन्ममापि कामेन हीनस्य मनसाप्यहो।<br>नाथो ह्यात्मानमेवासौ हयग्रीवो ददौ मुदा॥4॥ |
| परिरम्भणव्याजेन मन्दरे गुणवारिधिः।<br>गणयन् सतु तं दारमुद्दिश्य मम सद्गुणान्॥5॥ |
| अहं राजाधिराजश्चाप्येतदुत्तरजन्मनि।<br>भवामि स भवानीव मां तु यास्यति या पुरा॥6॥ |
| मन्दरे सुन्दरं मां तु दृष्ट्वा कन्दर्पमोहितः।<br>इन्दिरापतिमाराध्य वरदं प्राप तद्वरम्॥7॥ |
| सा गमिष्यति मां तस्मिन् जन्मनि प्रियवादिनी।<br>साधिनी स्वमनोरथ्यं सारसौन्दर्यसारतः॥8॥ |
| कनकाम्बरसंवीता मणिकाशितभूषणा।<br>गणिकाजातिकां त्यक्त्वा झणिकारवनूपुरा॥9॥ |
| दारा पुंसीतिवश्चार इति नो शाब्दिकैर्वृतः।<br>उदारकामहीनस्य स दार पुरुषो यथा॥10॥ |
| इत्यभिप्रायतोऽप्येक वचनेऽपि प्रयोजितः।<br>दारशब्दः परैरुक्त दोषोऽपि मम नास्त्यतः॥11॥ |

| |
|---|
| एदमानद्वितऽप्येतत्कृतवान् देवराडसौ।<br>मां प्रौढभक्तिसम्पूर्णमारोप्य गरुडोपरि॥12॥ |
| जगाम निमिषार्धेन मेरुमूर्ध्नि स्वमन्दिरम्।<br>तस्मान्मन्दरगं प्राप सुन्दरं स्वस्य विग्रहम्॥13॥ |
| तस्मादपि ययौ श्वेतद्वीपं मामधिरोप्य च।<br>पीताम्बरधरः स्रग्वी श्रीपतिः श्रेयसां पतिः॥14॥ |
| श्वेतद्वीपादपि प्राप प्लक्षद्वीपं सुपावनम्।<br>अपाम्पतेश्चोपकण्ठे विपतेश्चावरोप्य माम्॥15॥ |
| गरुत्मानं समाहूय मानयन्निदमब्रवीत्।<br>मघोनाऽमृतमानीय मामकस्य मुनेर्दिश॥16॥ |
| इत्युक्तः स तु नत्वा च वैनतेयो विहायसा।<br>गत्वा स्वर्गपतेस्तच्च ह्यमृतं प्राप सत्वरः॥17॥ |
| आदाय गरुडः प्रौढः चोड्डीरोड्डीयपक्षिराट्।<br>आढकेन मितं षोढा प्ररूढं पौरुटस्थितम्॥18॥ |
| पाययामास मां पापरहितं पिहितं करे।<br>स्थापयामास पादाग्रे श्रीपतेः शेषितं च यत्॥19॥ |
| दिव्यं तदपि गोविन्दो गोदोहनकरेण च।<br>मां गोसवे कोसवे च पाययामास नेतरम्॥20॥ |

| |
|---|
| ममामृतप्राशनं च ये श्रृण्वन्ति नरा भुवि।<br>अमृतप्राशनं कृत्वा त्वमृतत्वं भजन्ति ते॥21॥ |
| प्लक्षद्वीपादपि प्राप प्लवमान इतस्ततः।<br>उपप्लाव्यं तदा विष्णुरूपप्लवविवर्जितः॥22॥ |
| तदनन्तरमन्विच्छन्ननन्तासनमेव च।<br>अनन्तशयनं द्रष्टुं अनन्तो यो गुणैरपि॥23॥ |
| अनन्तपद्मासाद्य चानन्तोपरि संस्थितः।<br>अनन्तशयनं प्राप ह्यनन्तासनगं हरिम्॥24॥ |
| तेनैकीभूय कालेन नानात्वं मयि नास्ति च।<br>इति नो दर्शयामास नेत्रयोरपि मानव॥25॥ |
| इन्द्राणीं मां समानीय चेन्द्रेण सह मन्दिरम्।<br>उपेन्द्रऽपि तदा चाप्तश्चेन्द्रेण सह चेक्षितुम्॥26॥ |
| भद्रा देवी समायुक्तः सुभद्रार्थं तदैव माम्।<br>भद्रासने समारोप्य भद्रामारार्तिकाम् व्यधात्॥27॥ |
| अरुन्दतीसमायुक्तो वृन्दावनकृतिं त्विमाम्।<br>स्वमन्दिरे समादाय चेन्द्रेण सह चार्चयत्॥28॥ |
| एवं सर्वाश्च देव्यस्ताः पतिभिः सह मन्दिरम्।<br>मां समानीय चानर्चुः वृन्दावनकृतिं त्विमाम्॥29॥ |

| |
|---|
| तस्मात्स्वमन्दिरे सर्वे वृन्दावनकृतेः परम्।<br>प्रकुर्वन्त्वर्चनं सम्यगारात्यी च समन्वितम्॥30॥ |
| मद्वृन्दावनमेवेत्र सद्वृन्दावनमेवहि।<br>तद्वृन्दावनगः श्रीशः सद्वृन्दावनगः सदा॥31॥ |
| (येन वृन्दावनाख्यातिर्जाता चात्र दिने दिने।<br>तस्मै नन्दन धान्यं वा धनं वा किं न धीयते॥31॥) |
| मद्दोर्दण्डेन चोर्ध्वाण्डं दक्षिणेन गुणिन् स्पृशे।<br>सव्येनाधस्तमप्यस्मिन् लोको पीवकवज्ज्वलन्॥32॥ |
| त्र्यसरेणुरजस्थाणुः चरमाणु रहं भजे।<br>पारिमण्डिल्यवत्सौक्ष्म्यं शाण्डिल्यो वेत्ति शौण्डिलः॥33॥ |
| मेरुवद्गुरुभारोहं तूलवल्लघुतां व्रजे।<br>व्यापकश्चाकाशवच्च भागशो योगतोऽभवम्॥34॥ |
| मद्योगबलतो नानादेहगो भोगवानहम्।<br>सौभरिर्यद्वद् भ्राभो मद्वत्कोभ्राजतेऽधुना॥35॥ |
| अणिमाद्यष्टाङ्गयोगं मणिमान् दुष्टराक्षसः।<br>घणिना मानितं दृष्टन् तत्पदाङ्गुष्ठतो हतः॥36॥ |
| तद्वत्साष्टाङ्गयोगेन मया वादेन चाहतः।<br>मायावादिमताचार्यः पूर्वं क्रोधवशाधिपः॥37॥ |

| |
|---|
| तस्मादाचार्यवर्येषु मताचार्याः सुरोत्तमाः।<br>आचार्येष्वपि तेष्वत्र मध्वाचार्यः परो मतः॥38॥ |
| वेदेषु सर्वेषु हरिः सुरोत्तमः पूर्वेष्वथाचार्यमतेषु तन्मतम्।<br>गुरुष्वपीह प्रवरेषु गौरवात् पूर्णप्रज्ञः सर्वशास्त्रेषु तद्वाक्॥39॥ |
| मयास्थिजातान्यपि तस्थिवांसि (तस्थु षांसि) |
| चक्राङ्कितान्येव क्रमन्ति विष्णुम्॥40॥ |
| तत्पादजाम्भः सुसुपावितानि यद्देह मां तत्पदकं नयन्ति॥41॥ |
| भुजास्थिनी शङ्खचक्रे सुवृत्ते जान्वस्थिनी पद्मगदे च जाते।<br>उरोऽस्थि तन्मूर्तिरूपं प्रजातं शिरोऽस्थि नारायण मुद्रितं च॥42॥ |
| दन्तास्थि तत्पादपद्मं च जातं वृन्तास्थि तच्छार्ङ्ग धनुश्च जातम्।<br>कर्णास्थि तद्बाणरूपं प्रजातं पादास्थि दामोदरपादपार्श्वम्॥ |
| सदा च मां प्रापयामास शीघ्रं  कदापि संसारगतिं ददाति।<br>न मे पदं तस्य महात्मनः प्रभोः॥44॥ |
| इत्थं तु सर्वाप्यस्थीनि विष्णोश्चक्राङ्कितेन च।<br>जातानि जननाद्यं च नाशयन्ति मम श्रमम्॥45॥ |
| हे मुग्धविप्र दधिदुग्ध पयोनिधौ च बध्वा हरेस्तु पदमेव सुभक्तिपाशैः।<br>दग्ध्वा कलेवरमिदं सकलाधिव्याधि ग्रस्तं च योगबलतः प्रवसामि<br>पार्श्वे॥46॥ |

| |
|---|
| यथा दुर्योधनकृतं दग्ध्वाजतुगृहं पुनः।<br>द्वैपायनस्य पार्श्वेपि ह्युवास कुरुनन्दनः॥47॥ |
| उदारगुणसम्पन्नः सदारश्च भवान्तरे।<br>वृन्दावनगुरोराज्ञां मन्दारवनगस्य मे॥48॥ |
| दिव्यरागान्वितग्रीवो द्रव्यरागविवर्जितः।<br>करादागतवित्तानि सदारेभ्योऽददां सदा॥49॥ |
| वैराग्यगुणसम्पन्नः सदाराज्यपराङ्मुखः।<br>एष्यच्च निश्चितं सर्वमतीतत्वेन भण्यते॥ 50॥ |
| प्रेष्य सत्यं मया प्रोक्तं विश्वासं कुरु सर्वथा।<br>इत्थं ब्राह्मणमुखेन श्रुत्वा वै गुणवैभवम्॥51॥ |
| (गुणयत्स्वपि देशेषु) गणयत्स्वपि देवेषु भणसत्सु च मामिह।<br>अहं शुबोदसागरेऽन्वहं विभोर्हि वासरे॥52॥ |
| सुहंसरूपिणो हरेर्ग्रहं सरामिरेऽरमम्।<br>कारितुं सर्वभृत्यैश्च तारितुं भवसागरात्॥53॥ |
| स्मारितुं सर्वश्रेयांसि प्रेरितुं सर्वशः सुरान्।<br>अहं ममेत्यहङ्काररहितो वै हरेरिह॥54॥ |
| करोम्यहरहः कर्म हंसो हंसरहस्यकृत्।<br>हंसोपि हंसवाहस्ये सुयशं ज्ञानमुत्तमम्॥55॥ |

| |
|---|
| संसारोत्तरणांशं च मामापि प्राक् शशंस ह।<br>कंसारि श्वेतवाहस्य संसारं नाशयेद्यथा॥56॥ |
| कांश्यं कांशस्य कार्तैव संशोधयति चोद्धवम्।<br>स देवो वरदो मह्यं कदा चेह समागतः॥57॥ |
| इति मामुक्तवान् सूक्तं स्वपादे चावदात्यजत्।<br>अहं आनन्दमुनिना सदानन्दप्रसङ्गिना॥58॥ |
| सह नानाविधा गाथाः श्रीनाथस्य स्मराम्यहो।<br>तद्दर्शनोद्बुद्धहृद्यसंस्कारः शुद्धसात्विकः॥59॥ |
| बद्ध सौहृदतत्पादपद्येऽहं पतितोऽस्म्यहो।<br>तेन साकं बदरिकाश्रमं शोकविनाशनम्॥60॥ |
| तत्रापि दृष्ट्वा श्रीवासं सर्वसिद्धसुसेवितम्।<br>शुकस्य जनकं वै वासिष्ठकृष्णं नतोऽस्म्यहम्॥61॥ |
| अहं घनोदकं चापि ह्यतिलङ्घ्यं महाघनम्।<br>धनूरत्नं च पश्यामि पुरा मधुविभेदनम्॥62॥ |
| बाणं च शाणसंयोगान्निशितं द्युमणिप्रभम्।<br>पश्यामि गुणसम्बद्धं शार्ङ्गिणः करभूषणम्॥63॥ |
| प्रासं च भासमानं तं न्यासकर्मणि कोविधः।<br>पश्यामि श्रीपदेर्दास्यात् सोऽहम्भावविवर्जितः॥64॥ |

| |
|---|
| अहं ब्रह्मास्म्यहं ब्रह्मास्मीति यो वक्ति हिंसकः।<br>स्वहिंसाब्राह्मण ब्रह्मण्यारोपयति नान्यथा॥65॥ |
| ब्रह्महिंसात्मकस्यास्य महाब्रह्महतिः सुत।<br>भवत्येवान्धतामिस्त्रे पतत्येव  न संशयः॥66॥ |
| सामान्यब्रह्महत्यस्य प्रायश्चित्तं श्रुतौ स्मृतौ।<br>न विद्यते द्विजश्रेष्ठ महाब्रह्महतेः किमु॥67॥ |
| वक्तव्यं तत्र कर्तव्यं तत्र नास्ति बहिष्कृतेः।<br>सुविस्तृतेऽन्धतामिस्त्रे पतन्त्येतन्मताश्रिताः॥68॥ |
| तस्मात्सोऽहम्भावयुक्ते महत्पापं भवेद्ध्रुवम्।<br>महापापगतिं यान्ति स हाहेति वदन् सदा॥69॥ |
| सोऽहम्भावान्मोक्षमाप्नोषि जीव तस्मादन्धं याति तामिस्त्रमेव।<br>दासोऽहं ममुद्धरस्वेति हन्त चान्धन्तमो नैव यातीति कामम्॥70॥ |
| प्रार्थय प्रार्थ्यमानं तं सार्थीकुरु मनोरथम्।<br>कार्तस्वरतरं चार्थ्यं पदमारोह तद्धरेः॥71॥ |
| हे भेदवादिन् तव भेदसिद्ध्यै सत्यं हि दैत्यादि वदस्व मानम्।<br>तदैक्यवादं जहि योऽहमस्मि ब्रह्माहमस्मीति कुवादिनोक्तं॥72 |
| जित्वा चाभेदवादं तं दत्वा शिष्येषु सन्मतिम्।<br>श्रुत्वा च गुरुणा तत्वं गत्वा च हरिमन्दिरम्॥73॥ |

| |
|---|
| तत्रापि सच्चिदानन्दरूपं पश्य हरेरपि।<br>स्मराभेदजयं चापि यत्फलं हरिदर्शनम्॥74॥ |
| अहं घनोदकं तीर्त्वा मनोवेगेन मानव।<br>करोमि ब्राह्मणमुखादाख्यानं शोकनाशनम्॥75॥ |
| अहमाकाशमार्गेण नाकीशमगमं हरिम्।<br>लोकेशं पश्य दासत्वं तोकावस्यं हृदि स्थितम्॥76॥ |
| नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा।<br>तस्याः शिखाया मध्ये च ममात्मा संव्यवस्थितः॥77॥ |
| तं पश्य हृदयाकाशे महाकाशे यथा रविम्।<br>कोटिसूर्यप्रतीकाशं चन्द्रकोटिविकासितम्॥78॥ |
| त्वत्सकाशाद्भिन्नमेव तत्सकाशादिदं जगत्।<br>कासारे च यथा भातमाकाशं चोपरि स्थितम्॥79॥ |
| तथा त्वद्धृदयाकाशे भातं सूर्यान्तरे स्थितम्।<br>किरीटहारकेयूरस्फुरन्मकरकुण्डलैः॥80॥ |
| विराजन्तं हरिं पश्य नेत्रयोरतिसुन्दरम्।<br>शङ्खचक्रगादापाणिं नारायणमरिन्दमम्॥81॥ |
| सरोजासनमध्यस्थं अरुणेनादरार्चितम्।<br>स यश्चायं पुरुषयो रविमण्डलमध्यगम्॥82॥ |

| |
|---|
| तमेकं पश्य देवेशं दासस्त्वं हृदिसंस्थितम्।<br>एवं मदुपदेशेन को देशो ज्ञानगोचरः ॥83॥ |
| वेदेशं तु न जानाति तं वदस्वाद्यनन्दन।<br>ब्रह्मन् कन्दाशनेद्रोऽहं चन्द्रान्तर्यामिणं हरिम्॥84॥ |
| सन्दृश्याम्यत्र सान्द्रेणानन्देनैवाशु नन्दितः।<br>तं दृष्ट्वानन्तमव्यक्तं शीतांशुकरमच्युतम्॥85॥ |
| अमृताक्त करान् लोके विकिरन्तं मुरान्तकम्।<br>भजामि कामजामार्तिं त्यजामि करजात मे॥86॥ |
| सृजामि वाचो जालानि तज्जातगुणजानि च।<br>अहं सप्त समुद्रेषु सप्तद्वीपेषु सञ्चरन्॥87॥ |
| सप्तस्वपि पर्वतेषु सप्तसप्तिरथेऽपि च।<br>सप्तलोकेषु नित्यं च सप्तर्षितुषितार्पितैः॥88॥ |
| सप्तमीमिश्रिताश्विन्यां सप्तकाञ्चनभूषणैः।<br>अलङ्कृतः कलङ्केन हीनैः सम्राडिव प्रिय॥89॥ |
| वेङ्कटाद्रौ शङ्खभेरीनादं श्रुत्वागमं हरिम्।<br>जनार्दनं जनानां तु जननार्दनकारिणम्॥90॥ |
| जनित्रं ब्रह्मणः कञ्जनेत्रं जनमनोत्सवम्।<br>दृष्ट्वा हृष्टो भवाम्यष्टतिथिषु श्रेष्ठभाजनैः॥91॥ |

पौरुदैर्दत्तमृष्टान्नं शिष्टैः सह मठादिपैः।
अश्नामि कृत्वा स्नानानि सुस्वनोर्जितसंस्तवैः॥92॥

श्रुत्वा प्रश्नानि तेषां  च कात्स्न्यद्वि वच्मि तद्गुणान्।
अहं तैः सहितोऽप्यत्र चागतो यतिभिः कृतिन्॥93॥

द्रष्टुं त्रिविक्रमस्यापि रथोत्सवमथो हरेः।
त्रिकोटियतिभिः साकं अटामि मम सेवकैः॥94॥

मठेऽपि तव हे तोक रटामि परमार्थकम्।
मृष्टान्नं देहि तेषाञ्च मृष्टकाञ्चनभूषणैः॥95॥

नष्टकामं ममापि त्वं सुष्टु पूजय पुत्रक।
हे शिष्ट श्रेष्ठपूजां मे स्पष्टं कुरु हरेरपि॥ 96॥

इष्टं यतेष्टतः पुत्र नष्टं चापि ददाम्यहम्।
निष्टप्तकटके श्रेष्ठकटकं चापि कुण्डले॥97॥

तटित्प्रभे पादपीठे शिष्टे मयि मठागते।
देहि ते हितसिध्यर्थं को हि मे त्वां विनेह च॥98॥

हितवान् देहिनां मध्ये जहि ते चाहितामपि।
एवं ममाज्ञां प्राज्ञाद्य कुरु चाज्ञानबन्धनम्॥99॥

निराकुरु तव ज्ञानं ज्ञायते ज्ञानिषूत्तमम्।
अतस्त्वत्सदृशो नास्ति यतिषु प्रेष्ठ मादृशः।
कीदृशोस्मद्गुणो लोके त्वादृशोऽपि न विद्यते॥100॥

एतत् सर्वं स्वाप्नपद्येन गर्वम् हित्वा सर्वे विप्रवर्यास्यजेन।
श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥101॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।
मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥102॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥103॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराज पूज्यचरणोदित
स्वाप्नवृन्दावनाख्याने नवमोऽध्यायः समाप्तः॥

## ॥अथ दशमोऽध्यायः॥10॥

ओं गणैः स नारायणभूतनाथः समन्वितः कर्णविकर्णसंज्ञैः।
महामणीनां बहुलैः सुकीर्णं मौलिं ददौ मे शिरसि स्थिरोऽभूत्॥1॥

कुबेरकोशादानीतं शोकापनुदकामदं।
दत्तवान् वित्तहीनं मे भूतनाथः प्रतापवान्॥2॥

कुबेरो दत्तवान्नारायणभूतस्य हस्तके।
सोऽपि मे शिरसि प्रोतं चकार श्रृणु पोतक॥3॥

विप्रापहार्थं ते पुत्र चरणाद्रौप्यभूषणम्।
नारायणेनापहृतं भूतेनाकार्यकारिणा॥4॥

अतश्च त्रिगुणं दत्तमेकैकचरणस्य मे।

दुर्वर्णं कारय क्षिप्रं तेन ते पुत्र भूषणम्॥5॥

तस्मान् चिन्ता कार्या मत्पुत्रचिन्तामणिं भज।

कान्तारे च यथैकान्ते स्वकान्तं भजते सती॥6॥

शैलराजसुतापैलमुनिमाह च सादरम्।

कैलासशिखरे रम्ये तैलदीपावळिं कुरु॥7॥

इत्युक्तस्सोपि प्रत्युक्तिमवदद्द्विजपुङ्गव।

करोमि वृन्दावनाग्रे कन्दाशनवरस्य मे॥8॥

अव्यग्रश्चाग्रतः शीघ्रं पैलः कैलासपर्वतान्।

तैलं गोघृतमादाय शैलं वृन्दावनं मम॥9॥

चकार दीपावलिभिः पापावलिविनाशनम्।

ववर्ष पुष्पावलीश्च मधुपावलिसंयुताः॥10॥

एवं सर्वेऽपि ऋषयो वर्षे वर्षे समावृताः।

चक्रुः सर्षपमात्राणि दुष्कृतानि प्रहर्षिताः॥11॥

कायः सन्निहिताप्रायः प्रायः श्रेयस्करो मम (श्रेयस्करस्तथा)

वायुप्रवेशनोपायं तावायुर्वृद्धये वयम्॥12॥

कूर्मः कूर्मावतारेण पूर्णाशा पूरिताशिषः।

सुपर्वाणः सुपर्णेन कार्द्रवेयाध्य चोद्धृताः॥13॥

तथा तथा सुतश्चायं कृतात्कृच्छ्रात्समुद्धृतः।
तस्माद्वद्वथा कृतिश्चेयं मत्कृता मास्तु ते सुत॥14॥

श्रीमद्वृन्दानं भूमौ सौमवद्रञ्जनं दिशः।
को महास्तुन्न स्तुतिं कुर्यान्नो मनःप्रियकारकः॥15॥

को महान् दर्शनं नैव कुर्यान्मूढं विना मम।
हे नन्दन तव व्याख्यान्नादः कन्दाशनस्य मे॥16॥

शतानन्दस्य लोकेऽपि सदानन्दविवर्धकः।
अहमानन्दमुनिना सदानन्दप्रसङ्गिना॥17॥

सह नानाविधगाथाः श्रीनाथस्य स्मराम्यहो।
तद्दर्शनोद्बुद्ध हृद्यसंस्कारः शुद्धसात्विकः॥18॥

बद्ध सौहृदतत्पादपद्मेहंऽपतितोऽस्म्यहम्।
तेन साकं बदरिकाश्रमं शोकविनाशकम्॥19॥

शुकस्य जनकं वै वासिष्ठकृष्णं नमाम्यहम्।
इति पद्यत्रयं त्राय्यन्त्यक्तवानसि विप्रक॥20॥

आकरस्थं लेखनं च कारय प्राञ्भयोरितम्।
महीजश्चामहीजश्च सहोषतुरहोऽरहः॥21॥

हे विरराहो हे वीरराहितारहिताश्च ये।
पद्यस्यार्थास्यर्थसारं तु नद्यः परमपावनाः॥22॥

| |
|---|
| उद्यन्तमिव चादित्यं खिद्यन्ते तामसाश्च ये।<br>एतत्पद्यद्वयस्यापि शक्त्यार्थः केन हीयते॥23॥ |
| सोऽपि मत्सदृशो बुध्या प्रायः श्रेयस्करो मम।<br>द्वारैश्चतुर्भिः परितो विभाति वृन्दावनं मन्दरसन्निभं मे॥24॥ |
| वृकोदराचार्य हनूमतां च ममापि सन्मूर्तिभिरन्वितैश्च।<br>कीटं वासिष्ठकृष्णोऽयं यथा पुष्णाति पूरुषम्॥25॥ |
| पटुं स्वप्नान् स्फुटं वक्तुं श्लोकान् पुष्णाम्यहं तथा।<br>वृन्दावने च देवानां वृन्दाः सन्तीह नन्दन॥26॥ |
| मुकुन्दपादपद्मं ते विन्दन्त्यनिशमञ्जसा।<br>ब्रह्मा ब्रह्मभवः शक्रो वक्रतुण्डः सुरेश्वरः॥27॥ |
| गरुडः शेषभाष्यज्ञः सशिष्यः सोम भास्करौ।<br>मित्रावरुणकारुण्यविषयाश्च विशेषतः॥28॥ |
| सुत्राम शरणं प्राप्ताः पूषा पिष्टादनस्तथा।<br>एते चान्येच बहवो बहुमानपुरस्सराः॥29॥ |
| कुरुयोगे च सुरुतमग्निं कृत्वा धनं ददुः।<br>ब्राह्मणेभ्यश्च सौपर्णश्रुतिज्ञेभ्यश्च पर्वणि॥30॥ |
| ब्रह्मणा सह पुण्याहे सस्नुर्धवलवारिणि।<br>कर्म स्वैरं विरिञ्चादि भुभवो रत्नसञ्चयान्॥31॥ |

| |
|---|
| वृन्दावने च ववृषुः हर्षपूर्णाः सहस्रशः।<br>विष्णोर्निर्माल्यमालाश्च बालसूर्यामलप्रभाः॥32॥ |
| बालव्यजनसंवालाः काले दर्ध्रुर्गले कुहोः।<br>सिनीवाल्यादियोगेऽपि निमील्याक्षीणि काणवत्॥33॥ |
| सन्निलीनाः पालयन्ते शरणं करुणार्णवम्।<br>मग्नास्ते मत्सरःश्रेष्ठे भग्नपापा बभूविरे॥34॥ |
| अग्निं हुत्वा च विधिवज्जामदग्निं ववन्दिरे।<br>वृन्दावनगतं देवास्त्विन्दिरापतिमव्ययम्॥35॥ |
| मन्दाकिन्या जनिं विष्णुं पुनरेव ववन्दिरे।<br>तमनुज्ञाप्य देवेशाः स्वर्गं यान्ति सुमानिताः॥36॥ |
| पुनरायान्ति योगेषु पुण्येषु श्रृणु नन्दन।<br>एवं धवलगङ्गा मे विधुवद्वला भुवि॥37॥ |
| प्रवालमणिसोपान त्रिवळीशयुता बभौ।<br>देवैर्निरन्तराक्रान्ता मन्वन्तरशतान्तरा॥ 38॥ |
| तन्वन्तरातिरिक्ता चावधन्वन्तरिकृतान्तरा।<br>स्नानार्थं गच्छतां स्नायुबन्धनादिविनाशनम्॥39॥ |

शिश्नात्कृतैनसां नाशं करोति प्रश्नमात्रतः

एवं विधास्मत्कृत वैभवान्विता भूदेवदेवैर्नरदेवपूजिता।

कृतान्तमार्गं त्ववगाहनोत्सुकान्

सन्तारयत्येव हरेः सुतान्विता॥40॥

एतच्चित्रं कलिमलैः कलुषीकृतमानसाः।

न जानन्ति नराः सर्वे कलौ भूतलवासिनः॥41॥

एवं मद्वृन्दावनस्य सद्वृन्दा एव भूतले।

जानन्त्यनन्तमाहात्म्यं नेतरे पापपूरुषाः॥42॥

अहं नमामीह महानुभावं हयास्यरूपं हयमात्तहारम्।

मया सहैवाशु च हंसवाहं यो हंसरूपी नैरुणत्पयोब्धौ॥43॥

शाल्मलीद्वीपमाश्रित्य सुमालीति बलाधिकः।

निर्मलाख्यातलावण्यं बालातपसमप्रभम्।

पपृच्छ स तु मां दृष्ट्वा विच्छिन्नत्रिपुरः पुरा॥44॥

रुद्रो वाऽभद्रहीनोऽसि सुपर्णो वार्णवान्तरः।

शेषो वा दोषहीनोऽसि वायुर्वापायदूरगः॥45॥

इन्द्रो वा सान्द्रसन्तोषी चन्द्रो वाऽमन्दतोषकः।

कामो वा त्वं च रामाणां मोहनं रूपमाश्रितः॥46॥

सूर्यो वा शौर्यसम्पन्नः ऋषिर्वाऽपुरुषवाचकः।

धनदो धनिनां श्रेष्ठो महाधनविभूषणः॥47॥

| |
|---|
| वरुणः करुणासक्तः त्वं कविः कोविदेश्वरः।<br>अथवा वादिराजाख्यो वागीशकरजातकः॥48॥ |
| वादीभमृराजत्वाद्वादिराजाभिदा तव।<br>हयग्रीवाराधकत्वात्प्राग्र्यां लोकांस्तथागतः॥49॥ |
| व्याघ्रचर्माऽपि सन्मानं चाग्रपूजां चकार ते।<br>इमां कथां काव्यकर्ता काव्योऽपि व्याजहार च॥50॥ |
| श्राव्यं पापविनाशाय न व्याजान्न च हास्यतः।<br>इति तेनोदितं श्रुत्वा कृत्वा तस्याप्यनुग्रहम्।<br>स्मृत्वा हरेश्च माहात्म्यं पृत्त्वानन्दजलैर्भुवम्॥51॥ |
| ततश्च पावनान् वानप्रस्थान् वानरयूथपान्।<br>वनराजिषु पश्यामि वनजान् मनुजाधिप॥52॥ |
| तन्मतं शृणु  कल्याण पुण्यात्पुण्यतमं महत्।<br>नारायणो गुणनिधिः वाणीपतिमभाषत॥53॥ |
| श्रीमन्मध्वमतं दिव्यं मद्भक्तेनोद्धृतं सुत।<br>मत्सर्वोत्तमतामुक्त्वायुक्तिमालाभिरञ्जसा॥54॥ |
| व्यासात्मना मया पूर्वं यदुक्तं सर्वमेव तत्।<br>जगत्सत्यत्वादिकं च तात्पर्य विषयं ऋते॥55॥ |
| तत्समर्थितमेवादौ समर्थेन महात्मना।<br>प्राप्य तत्र कृतार्थत्वं व्यर्थीकृत्य सुदुर्मतम्॥56॥ |

| |
|---|
| मत्समीपमिहागन्ता वृन्ताद्यस्थीनि तस्य च।<br>चक्रशङ्खाद्यायुधैश्चाथाङ्कितानि महात्मना॥56॥ |
| तस्मात्तन्मतमेवाग्र्यं ग्राह्यं सर्वबुधैरपि।<br>प्राग्र्यं लोकमवाप्नोति तन्मत चाग्रहान्वितः॥58॥ |
| इति ब्राह्मणमुद्दिश्य गुणवारिधिरब्रवीत्।<br>शृणु सत्यं मया प्रोक्तं भण सर्वबुधान् प्रति॥59॥ |
| कृत्वा वृन्दावनं तत्र फलं भावय मां विभुम्।<br>अहं वृन्दावने स्थित्वा सर्वाभीष्टं ददामि ते॥60॥ |
| इदं ममात्मजे सर्वं वेदवेद्य तपोनिधौ।<br>वक्तव्यं पुरतः स्थित्वा निःशङ्कः सन् सदा द्विज॥61॥ |
| विप्रत्वं तव पुत्रं तु मम नाम्ना समाह्वय।<br>सुप्रीतत्वं तु विज्ञाय मयि सर्वं समर्पय॥62॥ |
| कामधेनुर्यथा पूर्वं सर्वाभीष्टफलप्रदा।<br>तथा कलौ वादिराजः श्रीपादोऽभीष्टदः सताम्॥63॥ |
| अदृश्य एव सर्वेषां सर्वाभीष्टफलप्रदः।<br>इदं तु वेदवेद्याख्य श्रीपादस्य सुतस्य मे॥ 64॥ |
| वक्तव्यं तत्र गत्वा तु नात्र कार्या विचारणा।<br>भारतीपतिवद्भाति भारतार्थप्रकाशनात्॥65॥ |

| |
|---|
| भारतार्थप्रकाशत्वात्तत्कर्तृ सदृशोहिसः। <br> तत्कर्तृसदृशत्वातु तद्वत्पूज्यो गुरुः सताम्॥66॥ |
| पूज्यत्वान्नित्यमेवात्र वृन्दावनगतं पतिम्। <br> पूजयित्वा महात्मानं महाभारतकीर्तनैः॥67॥ |
| ततोऽस्मत्सन्ततिं वा सर्वेष्टं वा तदाहरेत्। <br> इदं तु सन्तं सन्तत्यात्वामुद्दिश्यतथोक्तवान्॥68॥ |
| पूजनीयो गुरुर्नित्यं सर्वाभीष्टमभीप्सुना। <br> इमामस्मत्कृतिं विद्याद्यो विद्यात् त्वत्कृतिं नरः॥69॥ |
| स याति निरयं घोरं मृषात्वगतिरीदृशी। <br> कुष्ठापस्मारलुतान्तान् बालस्फोटादिकान् बहून्॥70॥ |
| मृत्तिका नाशयत्वेव वृन्दावनगता मुने। <br> मया सम्पूज्यमानः सन् हयास्यः पुरुषोत्तमः॥71॥ |
| लक्ष्म्या सार्धं सुरैः सर्वैरत्र सन्निहितः स्वयम्। <br> इमां कृतिं शिलायां तु लेखयित्वा ममाग्रतः॥72॥ |
| स्थापयेदत्र तां दृष्ट्वा सन्तः सन्तोषमाप्नुयुः। <br> इमां कृतिं नरो यस्तु स्वाप्नीं मन्दस्य बुद्धिदाम्॥73॥ |
| पठित्वा सर्वपापेभ्यो मुच्यते नात्र संशयः। <br> अर्थं बुद्ध्वा कृतेरस्याः सर्वेष्टं लभते नरः॥74॥ |

योनुवक्ता कृतिमिमां ममतोषस्य भूरसौ।

ख्यातिं कुरुष्वाल्पमते मम कीर्तिं नरेष्वपि॥75॥

माच्छादय शुभां शक्तिं मम ख्यातिं शुभेष्वपि।

त्वां भक्तिमन्तं विप्रेन्द्र न मुञ्चामि कदाचन॥76॥

सेवस्व मम पादाब्जं नित्यं भारतकीर्तनैः।

भुक्तिं मुक्तिं ततो दद्यां वचनं मम विश्वसीः॥77॥

आचार्यत्वं वृणीश्व त्वं मम पुत्रेण धीमता।

पञ्चवृन्दावने नित्यं पञ्चरूपात्मको हरिः॥78॥

पञ्चीकृत्य स्वरूपाणि नित्यं सन्निहितः स्वयम्।

इति जानन्ति ये मर्त्याः प्रपञ्चे सर्व एव तु॥79॥

पञ्च भूतानि हित्वा तु पञ्चत्वं न व्रजन्ति ते।

पञ्चवृन्दावनं चात्र यो वा कारयिता मम॥80॥

पञ्चाशद्युगपर्यन्तं विष्णोर्लोके महीयते।

पञ्चपुत्राः भविष्यन्ति पञ्चाननसमप्रभाः॥81॥

पञ्चायुधधरस्याथ भक्ता एव भवन्ति ते।

पञ्चभक्षसमायुक्तं पञ्चामृतसमन्वितम्॥82॥

पञ्चखर्जूरसंयुक्तं नैवेद्यं विनिवेदयेत्।

पञ्चम्यां च तिथौ नित्यं पञ्चपर्वसु पूजयेत्॥83॥

| |
|---|
| धूपैर्दीपैस्तथामाल्यैर्गन्धैर्दूर्वाक्षतादिभिः।<br>एवं सम्पूज्यमानोऽहं दद्यां वरमनुत्तमम्॥84॥ |
| अहं क्षुधातुरो भूत्वा नैवेद्यं नोक्तवान् मुनिः।<br>एतत्ते किञ्चिदाख्यातं भक्तत्वात् त्वद्विभूतये॥85॥ |
| श्रुत्वा त्वन्मुखतः सन्तः सर्वे यान्तु स्वभीप्सितम्।<br>इदं ममात्मजे सर्वं वेदवेद्ये तपोनिधौ॥86॥ |
| वदस्व मद्दयासिन्धौ हयग्रीवतपोनिधौ।<br>नैवेद्यार्थं मया प्रोक्तं विशेषतिथिपर्वसु॥87॥ |
| आच्छादितं च तत्पद्यं त्वयाऽदुर्मतिसत्तम।<br>स च दास्यति नैवेद्यं यो वृन्दावनकृत्स्वयम्॥89॥ |
| वृन्दावनगता देवास्तस्य तुष्टा भवन्त्यहो।<br>अहं क्षुधातुरो भूत्वा नैवेद्यं नोक्तवान् मुनिः॥90॥ |
| पीत्वा चामृतमेवात्र देवैः सह चराम्यहम्।<br>दीपार्थं नोक्तवान् दीपं तेजोमयसुविग्रहः॥91॥ |
| गन्धार्थं नोक्तवान् गन्धं दिव्यगन्धसुविग्रहः।<br>माल्यार्थं नोक्तवान् माल्यं दिव्यमन्दारमाल्यवान्॥92॥ |
| चामरार्थं मया नोक्तं दिव्यचामरवीजितः।<br>व्यजनार्थं मया नोक्तं दिव्यव्यजनवीजितः॥93॥ |

छत्रार्थं तु मया नोक्तं दिव्यछत्रविभूषितः।

भूषणार्थं मया नोक्तं दिव्यभूषणभूषितः॥94॥

वाहनार्थं मया नोक्तं अहं दिव्यविमानगः।

भोगार्थं तु मया नोक्तं दिव्यभोगसुभोगवान्॥95॥

भवतामेव कर्तव्यं मम पादाब्जपूजनम् एवं निशम्य मम वैभवमत्र नित्यं

वृन्दावने सकलदैवत सन्निधाने।

नानाघराशिशमनेऽतिसुपापिनां च

मूर्तिं भजन्तु मम नित्यमथेष्टभाजः॥96॥

वृन्दावनं सकलदिग्गतसज्जनानां

वृन्दावनं परमपावनमत्र नित्यं।

मन्दाकिनीजनीजनकदेवसदायनं तत्

कन्दाशनायनमिदं प्रणमेत भक्त्या॥97॥

मद्दत्तपुत्रं मत्पुत्रं मज्जीवितकलत्रिणम्।

मत्प्रसादात्प्रवृत्तिं तं मा त्यजस्त्वं स मामकः॥98॥

अयन्तु ब्राह्मणः शुद्धः सत्यवादी जितेन्द्रियः।

अस्य स्वप्ने मया प्रोक्तं विश्वासान्नात्र संशयः॥99॥

वेदवेद्य वदस्व त्वं आगतेषु जनेष्विह।

ब्राह्मणस्वाप्नपद्यार्थं प्रसिद्ध्यर्थं ममात्र च॥100॥

| |
|---|
| शिलस्थां करु विप्रेश वचनान्नात्र संशयः।<br>आचार्यत्वं मया दत्तं त्वया चापि प्रदीयताम्॥ 101॥ |
| सम्भावनार्थं विप्रस्य श्रृणुष्व वचनं मम।<br>ब्राह्मणश्चाल्पसन्तोषी मम सन्तोषभूरयम्॥ 102॥ |
| एवं वृन्दावनाख्यानं श्रुत्वा सुजनवृत्तयः।<br>यात्रां कुर्वन्तु मद्भक्त्या यच्छन्तु सदुपायनम्॥ 103॥ |
| याचयन्तु वरं तस्मात्तद्वरं प्राप्नुवन्तु ते॥ 104॥ |
| नैवेद्यं मृष्टमन्नं मे यावन्नक्रियते द्विज॥ 105॥ |
| तावत्कुरुष्व त्वं नक्तव्रतं निरशनं मम।<br>भुङ्क्ष्व विप्र प्रसन्नोऽस्मि व्रतादनशनात्तव॥ 106॥ |
| व्रतेनानेन निष्पापः त्वमभूर्नात्र संशयः।<br>मम मन्त्राधिकारोऽभूत्तव पापक्षये सति॥ 107॥ |
| इतः परं ग्रहाण त्वं मनुं दिव्यमनुत्तम्।<br>दास्यामि मम पादाब्जगतिं तव न संशयः॥ 108॥ |
| मा त्यज त्वं हि विप्रेन्द्र नित्यं भारतकीर्तनम्।<br>चामरं वीजय त्वं हि मम वृन्दावने सदा॥ 109॥ |
| आदिपर्वं वदस्व त्वमनुक्रमणिकां विना।<br>वेदवेद्यस्य पादाब्जान्निसृतं तीर्थमुत्तमम्॥ 110॥ |

| |
|---|
| मम पादोदकं विद्धि यतस्तद्देहगो ह्यहम्।<br>वेदवेद्य जयस्व त्वं दुर्मतं दुर्मतीरितम्॥111॥ |
| मध्वराद्धान्तोक्तपद्यैर्मत्कृताभिश्च सूक्तिभिः।<br>वेदवेद्य तव वेद कोविदः कोविदत्वमिह को नरो भुवि॥112 |
| त्वन्मुखेन तु जयामि मायिनं प्रीणयामि कमलापतिं हरिम्।<br>वेदवेद्य तव वेद कोविदः कोविदत्वमिह को नरो भुवि॥113।<br>जय मदान्धपरवादिदन्तिनं सिंहविक्रम मदीरितयुक्तिभिः।<br>कुरु सुमध्वसमयस्य निर्णयं मत्प्रसादविभवाप्तसुमत्या॥114॥ |
| तोषयस्व सुजनांश्च मायिनः खेदयस्व परमात्मभाविनः।<br>शेषाद्रिपण्डितस्यापि वक्तव्यः स्वाप्नवैभवः॥115॥ |
| व्यासराजाख्यभक्तस्य तथा तदनुजस्य च।<br>तैः श्रुतं चेदिदं सर्वं त्रैलोक्यं श्रुतमेवहि॥116॥ |
| वेदवेद्य प्रेषय त्वं तयोर्दूरगयोरपि।<br>श्रुत्वा वृन्दावनस्यास्य कुर्वन्तु मम दर्शनम्॥117॥ |
| तेषां त्रयाणां दास्यामि भुक्तिं मुक्तिं हरेः सदा।<br>पालय ब्राह्मणं त्वेनं मद्बुद्धिं मत्परायणम्॥118॥ |
| स्वप्ने च मम वाग्भूतिविलासस्याश्रयं परम्।<br>एतदन्यत्र नैवाहं वदे श्लोकेन कुत्रचित्॥119॥ |
| सर्वे कवित्वं जानन्ति न जानाति ह्ययं द्विजः॥120॥ |

| |
|---|
| अस्य स्वप्ने मया चोक्तं प्रत्ययार्थं न संशयः।<br>स्वाप्नदैविकमद्येषु लोकभिन्नेषु दोषधीः॥121॥ |
| न कर्तव्या यतो देवा अशरीरा भवन्ति हि।<br>शरीराणामयं दोषः छन्दोभङ्गादिरेव हि॥122॥ |
| अशरीरस्य वाक्येषु न दोषायेति सम्मतम्।<br>अहं जानामि तत्सर्वं यदुक्तं दुर्जनैरिह॥123॥ |
| इदमेवोत्तरं तेषां यदुक्तं तु मया पुरा।<br>अङ्गीकृत्य मया प्रोक्तः परिहारः सुदुर्मतेः॥124॥ |
| कुत्र छन्दोभङ्गदोषः वर्तते दुष्ट तद्वद।<br>वाग्वैखर्येण शून्यस्य ब्राह्मणस्य मुखेन तु॥125॥ |
| वृन्दावनस्य विभवमुक्तं वै लेशतो मया।<br>असम्भावितमेतच्च नित्यं स्वप्नेरितं मया॥126॥ |
| इतिहास्यं प्रकुर्वन्ति ये जना मम रोषिणः।<br>यद्वक्ति ब्राह्मणः श्लोकैः तत्सर्वं सत्यमेव च॥127॥ |
| तत्कर्तव्यमवश्यं तु मम शासनमेव  च।<br>मम रोषात्सर्वपुण्यैश्चवन्ते नात्र संशयः॥128॥ |
| पितृभिः सह मज्जन्ते नरके पुण्यसङ्क्षये ।<br>तस्माद्घोरे कलौकाले ह्यलमेतावता द्विज॥129॥ |

| |
|---|
| वेदवेद्य मम सत्सु सत्कृते पादपद्म युगले सदा कुरु।<br>ते मतिं मम कृतिं तथास्मनि त्वं कुरुष्व तव भूतिदां सुत॥ |
| त्रिवाचापि मया प्रोक्तं तव बुद्धिर्यथा तथा।<br>कुरु विप्रस्य वचनं न मृषेति विचिन्तय॥ 131॥ |
| सकृदेवोपदेशेन सकृद्ग्रहणशक्तिनम्।<br>करोमि त्वां च विप्रेन्द्र मम पादाब्ज सेवकम्॥ 132॥ |
| ब्राह्मण ब्रह्मतेजस्विन् मत्सेवां मां त्यजस्व ह।<br>मत्प्रसादाप्तमत्या च नित्यं कीर्तय भारतम्॥ 133॥ |
| मत्सेवया सुसम्पूर्णं दापयिष्येऽत्र भोजनम्।<br>मत्सेवया शुभगतिं दापयिष्येऽत्र जिष्णुना॥ 134॥ |
| इतः परं तव स्वप्ने न च वक्ष्ये निरन्तरम्।<br>कदाचिदेव वक्ष्यामि कार्येतु प्रस्तुते सति॥ 135॥ |
| सुखी भव त्वं विप्रेन्द्र ममाशीर्वचनेन च।<br>त्वया चिन्ता न कर्तव्या शिशोः क्षीरं भविष्यति॥ 136॥ |
| शेष घोषय पोषय त्वं दोषशून्यां तु मेकृतिम्।<br>शेषशायि हयग्रीवं तोषय त्वं च भूषय॥ 137॥ |
| रथोत्सवं नेत्रमनोरथोत्सवंतथोत्सवं भोक्तृजनस्य भोजनैः।<br>कुरु त्वमर्थोत्सवमर्थिनां तु नेत्रोत्सवं प्रेक्ष्य सज्जनानाम्॥ 138॥ |

| |
|---|
| एवं पञ्चोत्सवं कृत्वा पञ्चरूपधरम् हरिम्।<br>सम्पूज्य पञ्चबाणं तं पञ्चत्वं चैव त्वं जहि॥139॥ |
| इमां मम कृतिं विप्र प्रेषयस्व ममात्मजम्।<br>अन्यथा त्वं च मद्द्रोही कुर्विदं तु तवाज्ञया॥140॥ |
| ब्राह्मण त्वं तत्रगत्वा वदस्व स्वाप्नवैभवम्।<br>इदं तु मद्वैभवन्तु मद्भक्तेन तु कीर्तितम्॥141॥ |
| श्रुणोति मद्भक्तिरतो मद्भूतिं लभते नरः।<br>शेषाय वद मत्पुत्र दोषायनतरं मम॥142॥ |
| तोषाय तव विप्रस्य प्रेषय स्वाप्नवैभवम्।<br>सशेषः शेषवद्दक्षः श्रुत्वा कार्यं करिष्यति॥143॥ |
| अशेषं मम शेषस्य हयग्रीवस्य तोषकः।<br>भविष्यत्यानिशं तस्य योगक्षेमं करोम्यहम्॥144॥ |
| पुत्रलाभश्च भविता मत्प्रसादान्न संशयः।<br>श्रीशस्य भक्तिकोशस्य सेशस्य दासस्य मे॥145॥ |
| तोषस्य कोशभूतस्य शेषस्य वद मत्कृतिम्।<br>ब्राह्मण  त्वं तत्र गत्वा वद स्वाप्नीं तु मत्कृतिम्॥146॥ |
| मद्भक्तियुक्त मनसो मम संस्थानदस्य च।<br>अद्यैव गच्छ विप्रेन्द्र हृदिस्थोऽहं भवामि ते॥147॥ |

| |
|---|
| अद्यप्रभृति ते शान्तिं दास्यामि च न संशयः।<br>मयोक्तमम्भसि क्षिप्तकाञ्चनेषुर्यथा तथा॥ 148॥ |
| अभूत्स्वाप्नप्रमेयं तु कुरु त्वं सार्थमेव तत्।<br>शेषाशेषञ्च मत्कार्यं शेषशेष प्रदं तव॥ 149॥ |
| अकर्तुः कर्तुरप्ये तत्कुरुष्व त्वं सुखी भव।<br>ममात्मजं वेदवेद्यं मम संस्थानसंस्थितम्॥ 150॥ |
| मत्कलापूर्णमनसं पालयस्व सुमानिनम्।<br>अहो ममाज्ञां करु वेदवेद्य ख्यातिर्मम स्वाप्नकृतेर्न किञ्चित्॥ 151॥ |
| जातास्तयोः प्रेषय भक्तियुक्तयोःसीतापति व्यास सनामधेययोः।<br>श्रुत्वा तौ मत्कृतेः सम्यक् ख्यातिं चात्र करिष्यतः॥ 152॥ |
| विप्र त्वमेव गत्वाच मत्कृतिं तु तयोर्वद।<br>नामैकदेशग्रहणे गृहीतं पूर्णमेव च॥ 153॥ |
| तयोर्नाम तथा शास्त्रे चोक्तं विद्वद्भिरेव च।<br>अस्यातिशुद्धबुद्धेश्च यस्य सद्धर्मपद्धतेः॥ 154॥ |
| मद्बुद्धिनिधिरत्रासीदहो विधिबलं महत्।<br>अयं तु ब्राह्मणश्चात्र मामेव शरणं गतः॥ 155॥ |
| वृन्दावनकृतेः पूर्वं स्वस्याभीष्टं निवेद्यमे।<br>कृत्वा वृन्दावनं चेति प्राक् श्लोकद्वितयेन च॥ 156॥ |

अतस्त्वं मे मया प्रोक्तं तत्सत्यं समभूदहोवेदवेद्य मम शेषसत्कृतं

तत्सशेषगिरिपण्डितं वद।

त्रिदशदोषरहितैः सुपूजित कदशनार्थिबिरनादृतरूपां ॥157॥

सुत मदूर्जितपदे च सुस्थिरः त्वं च सर्वसुरसत्तमदेवभूः।

तदुभय प्रभवाय को महान् त्वां ऋते पुरुषभूषण तद्वद॥

एतच्छ्लोकद्वयस्यार्थं ब्राह्मणस्य मुखेन तु।

जानीहि त्वं यतश्चास्य मयार्थोऽप्यनुवर्णितः॥159॥

त्रिंशच्च कवितादोषाः विदुषां ज्ञानिलक्षणे।

तैर्विहीनाश्च विद्वांसो नेतरेति सतां मतम्॥160॥

असूया परनिन्दा च परेषां च प्रतारणं।

निर्दोषायां परकृतौ दोषदूषणमेव च॥161॥

परत्वबुद्धिः स्वस्मिंस्तु परेषां हास्यमेव च।

स्वस्य शाठ्यं तत्वमतावहङ्कारित्वमेव च॥162॥

इत्याद्या बहवो दोषाः विदुषां च प्रकीर्तिताः।

तैविहीनाश्च विद्वांसो नेतरे च कदाचन॥163॥

एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥164॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवस्तु तेषां कन्दाशनाज्ञया॥165॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्त्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥ 166॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्त्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराजपूज्यचरणोदित स्वप्नवृन्दावनाख्याने दशमोऽध्यायः समाप्तः॥

## ॥अथ एकादशोऽध्यायः॥11॥

ओं अलौकिकायां मम सत्कृतौ च नदोषबुद्धिः कुशलैश्च कार्या।
अर्थे च दृष्टिः क्रियतां न शब्दे यतश्चैषा स्वाप्नकृतिर्हि वासिनी॥1॥

वासनात्मकशब्दानां अर्थदर्शनमेव च।
सत्यं न शब्द सत्यत्वमेवं हि स्वाप्ननिर्णयः॥2॥

लौकिकस्य तु वाक्यस्य बुद्धिपूर्वं कृतस्य च।
शब्दार्थोभयसत्यत्वं ग्राह्यमेव न संशयः॥3॥

पूर्वानुभवसंस्कारात्तादृशार्थांस्तु पश्यति।
श्रुणोति च तथा शब्दान् पूर्वसंस्कार कारणात्॥4॥

अयं तु ब्राह्मणः पूर्वं मम शिष्यः सुबुद्धिमान्।
तत्संस्कारवशादेव स्वप्ने वक्ष्याम्यहं द्विजम्॥5॥

अहं जानामि तत्सर्वं पूर्वसंस्कारकारणम्।
जातिस्मरणशीलोऽहं हयग्रीवस्य चाज्ञया॥6॥

| |
|---|
| दुर्वादिगर्वहर पुत्र सुखी भवस्व गुर्वादिराजकृपया सुमतिं भजस्व।<br>शर्वादिदेववरवन्द्यहरिं भजस्वचोर्व्यां सुकीर्तिमथ मेऽत्र च ख्यापयस्व॥7॥ |
| इमां कृतिं यां लिखतिस्मलेखिका वाचापि पुण्यं लभते न संशयः।<br>वृन्दावनालङ्करणेन धातुभिः सम्मार्जनाभिर्बहुपुण्यभाजिनी॥8॥ |
| आरार्तिकाभिर्बहुचित्रिकाभिः सन्नामसङ्कीर्तनसंस्तवैश्च।<br>उपादिराहित्यवता सुसेवां करोति साचापि मम प्रियोभूत्॥9॥ |
| मद्भागवतमुख्यांस्तु त्रीन् दासान् वै सहोदरान्।<br>मा त्यज त्वं हि मत्पुत्र ते वै मम प्रियाः सदा॥10॥ |
| नागशयनहनूमन्तौ तौ सदा वै मम प्रियौ।<br>अहं जानामि तद्भक्तिं नागशयनः सुबुद्धिमान्॥11॥ |
| वेदवेद्य सुबुद्धस्त्वं दुर्बुद्धिं दुर्धरेरिताम्।<br>त्यजेमां सुजनश्रेष्ठ मज्जनप्राणहारिणीम्॥12॥ |
| ममाशीर्वचनेनैव चिरं जीव सुखी भव।<br>हयास्याराधनेनैव ममानन्दप्रदो भव॥13॥ |
| वृन्दावने दन्दशूकधारिणं दास्यधारिणम्।<br>मन्दारमालिनां शान्तिशालिनः कमलात्मनः॥14॥ |
| इति मां विद्धि सद्बुद्धिं हयग्रीवकृपोदधिम्।<br>वेदवेद्य सदाराध्यं शुद्ध मत्पट्टवर्धनम्॥15॥ |

व्यासेन सीतापतिना शेषेणापि नः श्रुतम्।
तैः श्रुतं चेदिदं सर्वं त्रैलोक्यं श्रुतमेव हि॥16॥

इति पूर्वं मया प्रोक्तं अनुसन्धत्स्व बुद्धिमन्।
त्रीनुद्दिश्य मया प्रोक्तं त्वां विशेषान्न संशयः॥17॥

अतस्त्रयाणां भक्तानां तेषां प्रेषय मत्कृतिम्।
नैवेद्यं नैव गृह्णामि तावत्पर्यन्तमेव ते॥18॥

वृन्दावने मदनमर्दनरुद्रहृद्यं सद्भिः प्रवन्दितपदं मदनाभिरामम्।
वृन्दारकेन्द्रमरुदंशसुमर्दिताङ्गं रक्षो विदार्य वरदं प्रणमामि रामम्॥19॥

अरसभूपचिरपट्टवर्धन परशुचापधरदुष्टमर्दन।
निरशपापहरशिष्टशोधन परसुपापकरदुष्टसूधन॥20॥

रथोत्सवस्य भारोऽयं तावकः पावकप्रभः।
कालोऽयं मम सेवायाः बालोऽयं मम पुत्रकः॥21॥

अन्तरायाः कुतो ह्यस्य शान्तरायाश्च शत्रवः।
भविष्यन्ति न सन्देहो मम विघ्नकराः सदा॥22॥

एतत्पद्यत्रयं शेष वदस्त्व त्वं च भूपतेः।
यतस्त्वं पण्डितः शौण्डस्तन्मण्डनपरो भव॥23॥

सर्वं वक्तव्यमुक्तं च कृतार्थोऽहं न संशयः।
मद्वेतनेनैव तु यश्च जीवति मन्नामधारी मदनुग्रही च।
पठेत स्वाम्नीं मम सत्कृतिं च  नो चेददण्ड्यस्य करोमि तीव्रम्॥24॥

| |
|---|
| एवं मद्भक्तिमन्तश्च सर्व एव पठन्त्विमाम्।<br>ख्यातां कुर्वन्तु लोकेषु नो चेन्मद्रोहिणश्च ते॥25॥ |
| पठतां शृण्वतां चापि ख्यातामुर्व्यां प्रकुर्वताम्।<br>सर्वेष्टानि भविष्यन्ति हयग्रीवस्य चाज्ञया॥26॥ |
| यो मनांसि तनुमर्पितवान्नमैतत् सर्वं धनं कनकपूर्णमथाभिषेकम्।<br>यश्चाकरोद्विततभक्तियुताय तस्मै गत्वा वदस्व मम सत्कृतिमाशु विप्र॥27॥ |
| व्यासाय भक्ति कोशाय दासाय मम नित्यशः।<br>वैष्णवस्नेहपाशाय तोषाय वद मत्कृतिम्॥28॥ |
| तस्यानुजस्य मयि सर्वसमर्पकस्य भक्त्यादिमुख्यगुणसङ्ग्रहणस्य तस्य।<br>पूर्वं हयास्यचरणस्मरणोत्सुकोऽपि दुर्विप्रनिग्रहवतो वद मत्कृतिं च॥29॥ |
| वेनवद्वेतनान्नं च यस्य भुङ्क्ते सुदुर्मतिः।<br>तस्येष्टदेवस्मरणे महत्कोपादभूदहो॥30॥ |
| इदं सर्वेऽपि जानन्ति तद्वेषान्नोच्यते मया।<br>सोऽपि मत्पादमापन्नः शापभीतो न भक्तिभाक्॥31॥ |
| ब्राह्मणं मानिनं मानं हित्वा मत्पादसेवनम्।<br>कुर्वाणमनिशं विद्वन् मा त्यजस्व ममायिनम्॥32॥ |
| मद्वेतनान्नं भुञ्जानाः ये वै कुजनबुद्धयः।<br>तेष्वेकोऽपितु मत्पद्यं तदर्थं वा न वक्त्यहो॥33॥ |

| |
|---|
| मत्कृतिं वदतां पुत्र तदर्थं वदतां तथा।<br>मद्वेतानां ददस्व त्वं अन्यथा मा ददस्व भो॥34॥ |
| मद्वेतनेन शून्येऽस्मिन् विप्रे जातः पराग्रहः।<br>जनेषु वक्ति मत्पद्यं तदर्थं मयि भक्तिमान्॥35॥ |
| अहं शपे सुपापिनं कुपात्रसादभूद्धनम्।<br>मयात्र जीवितं बहु सुपुत्र मा ददस्व ह॥36॥ |
| ब्राह्मणं गुणमणिं शृणु पुत्रचारुवीजितसुचामरपाणिम्।<br>पुण्यपूर्णगुणभूषणकीर्तेरग्रजत्वमिमंमा त्यज तूर्णं॥37॥ |
| ब्राह्मणं गुणवन्तं च ऋणवन्तं गुणार्णवम्।<br>जानीहि गुणिनः फणिनो वदस्वस्य च तद्दणम्॥38॥ |
| ऋणान्मुक्तिश्च विप्रस्य साक्षान्मुक्तिर्न संशयः।<br>भोज्यवित्तं प्रदत्ते हि भक्तेर्नास्ति ततोऽधिकम्॥39॥ |
| मद्वाचं नन्दन त्वं हि सर्वथा मा वृथा करु।<br>मन्मठस्याधिपत्येतु विठ्ठलं पट्टवर्धन॥40॥ |
| स्फुटं कार्यपटुं मत्वा पट्टपच्छोटिकां दिश।<br>पूर्वं प्रामादिकी बुद्धिः स्यात्तस्य नतु साहजा॥41॥ |
| निर्वेदनामिदानीं तु सम्प्राप्तश्चन संशयः।<br>रथोत्सवस्य भारं तं धर्ता तर्ता स एवतु॥42॥ |

तदन्यः को भवेत्पुत्र समर्थः कार्यसाधने।

नागशयनस्य मनसः सङ्कल्पं सम्प्रपूरय॥43॥

अहं जानामि तद्भक्तिं नागशयनः सबुद्धिमान्।

मद्वाक्यं मानसं सिद्धं सर्वसङ्ग्राह्यमेव हि॥44॥

चोद्यानर्हे तु मद्वाक्ये चोद्यं कुर्वन्पपत्यधः।

भावनात्मकशब्देषु ज्ञातव्यो भाव एव च॥ 45॥

अहमाविष्टवान्विप्रे कदाचिन्न कदाचन।

मत्कृतौ दोषशङ्का चेद्दोषे परिहृते सति॥46॥

भवतां मातृदोषोपि स्याद्व्यभीचारशङ्कया।

पातिव्रत्यात् न दोषश्चेत् अशरीरत्वतस्तथा॥47॥

प्रकृतेऽपिनदोषः स्यात्प्रतिबन्दी दुरुत्तरा।

जनाः सुपापिनः सर्वे कलिनाविष्टचेतनाः॥48॥

कत्थनं वावदूकास्ते कुर्वन्ति मम सन्निधौ।

कदने चोद्यताः सर्वे वदने भस्मवासिनः॥49॥

मयि जीवति सर्वेऽपि मत्प्रिया इव मत्कृतिम्।

पठन्त्यर्थं वदन्त्येते मत्प्रतारणबुद्धयः॥50॥

इदानीं स्वाप्नपद्यं मे तेष्वेको पि न वक्त्यहो।

अहं नैवेति दुर्बुद्ध्या जाने सर्वमनोगतम्॥51॥

यो न वक्ति च मत्पद्यं तदर्थं वा मदाश्रयी।

तस्याशुभं भवत्येव पश्य मे तपसः फलम्॥ 52॥

इमां कृतिं मम स्वाप्नीं आदराद्यस्तु वक्ष्यति।

तस्य श्रीशः प्रसन्नः सन् शुभं दास्यत्यसंशयः॥ 53॥

सत्यं सत्यं पुनः सत्यं त्रिवाचापि मयोच्यते।

शृण्वतां पठतां चापि सर्वसम्पद्भविष्यति॥ 54॥

पुत्र ते सुप्रन्नोऽस्मि मत्प्रसादाप्तसुप्रभ।

मित्र ते सुप्रतापोऽयं कृत्रिमो न प्रदृश्यते॥ 55॥

हयास्यं ब्रह्मणोपास्यं मयोपास्यं च भूरिषः।

प्रसन्नास्यं सदा वश्यं उपास्य त्वं सुखी भव॥ 56॥

एवं श्रुत्वा विप्रवर्यात्सुगूढमाश्चर्यभूतं मम वैभवंतु।

पुत्र चैतत्सुप्रसिद्धं कुरु त्वं मित्रो यथैवान्धः कारस्थमर्थं॥

पुत्र त्वं विप्रवर्यस्य सुप्रसन्नो भव प्रभो।

प्रभुत्वात्त्वत्प्रसादोऽयं विप्रे स्यादैहिक प्रदः॥ 58॥

गुरुत्वात्कुरु कारुण्यं विप्रस्याज्ञानहारिणम्।

मत्पुत्रेणादरार्थोक्तं मत्कृतेरर्थमञ्जसा॥ 59॥

श्रुणु सीतापते भक्त्या सत्पते ते शुभाप्तये।

त्वामागतमहं जाने चिरादागतवानसि॥ 60॥

करादागतवानस्मि सुरलोकात्सुपर्वसु।
चिरं जीव चिरं जीव सुखी भव सुखी भव॥ 61॥

ममाशीर्वचनेनैव हयग्रीवपरो भव॥ 62॥

सुत सुतत्वमत सन्मते कुतः कुमतिरत्र तव मत्प्रसादतः।
विततभक्तियुत मत्पदे सदा कृतसमस्तशुभसत्कृते हरेः॥ 63॥

द्विजेति गरुडस्यापि सम्यक्सम्बोधना कृता।
पुत्रेति नरकोत्तारं हरिं प्रत्युक्त वानहम्॥ 64॥

शेषेति भूधरं शेषं व्यासेति व्यासमेव च।
सीतापतेति रामं च भूपेति भूवराहकम्॥ 65॥

भूपेति भूमेरुद्धारं वराहं चोक्तवानहम्।
तस्माद्ग्राह्योभयार्थश्च मत्कृतेरर्थबुद्धिभिः॥ 66॥

सुत सुसूक्ष्ममतिमन् कृत कृत्यस्त्वं समस्त यतिषूत्तमकीर्ते।
मत्कृतिं विततयुक्तिसत्कृतिं सत्सु व्याकुरुत तत्र कीर्तय॥ 67॥

पुत्र मत्पुत्रिकां युक्तिमल्लिकाख्यां तवानुजाम्।
कुरु सत्पात्रदानं ते कन्यादानफलं लभेत्॥ 68॥

मद्युक्तिभाषणैर्भासि त्वद्व्याख्यानसुवासिनी।
नानापुष्पोल्लसत्केश बन्धिनी भावगन्धिनी॥ 69॥

वेदवेद्य द्रौपदीव भात्यनेकावराप्यहो।
तस्माद्व्याख्यानसन्मन्त्रैर्दानं कुरु वरेषु ताम्॥ 70॥

| |
|---|
| त्वमेव तत्पिता माता पितृहीनां तु मा कुरु।<br>अहो ममात्मजां युक्तिमल्लिकेति ममात्मजं॥ 71॥ |
| वव्रे तीव्रेणभावेनाप्यग्रजं व्यग्रगामिनी |
| अप्पण्णः कृष्णभट्टश्च शष्पण्णः परिकीर्तितः॥72॥ |
| पुरुपवल्लघुबुद्धिश्च कपटी मत्पदे सदा।<br>मत्पुत्र सुप्रसङ्गे तु स्वप्रसङ्गं करोति यः॥73॥ |
| तत्प्रसङ्गं त्वहं सम्यक् कुप्रसङ्गं करोम्यहम्।<br>मत्पुत्रे कृतपाण्डित्ये पण्डितैर्मण्डिते सति॥74॥ |
| षण्डकैः क्रियते डम्भात्स्वपाण्डित्यं हि डिम्भवत्।<br>अयं तु कुमनाः कृष्णो ह्यप्पण्णः फणिबुद्धिमान्॥75॥ |
| शुनवत्कत्थनं कुर्वन्नन्दनाग्रे मनाक्क नः।<br>मन्नन्दनपदं ध्यात्वा श्रुत्वा तस्य सुधामयीम्॥76॥ |
| गां तं वै गोमुखव्याघ्रं त्यज शीघ्रं दुराग्रहम्।<br>सोऽपि मत्पादभक्तश्चेध्वित्वा स्वकृत दुष्कृतिम्॥77॥ |
| मत्कृतिं पुत्र शिष्येषु सम्यग्व्याख्यां करोत्वहो।<br>तद्वेषात्तुन भाषेऽहं शेशशायिपदे शपे॥78॥ |
| रागद्वेषविहीनोऽहं हयग्रीवस्य चाज्ञया।<br>इति प्रोक्तं मयाप्रोक्तमनुसन्धत्स्व बुद्धिमन् ॥79॥ |

| |
|---|
| व्याख्यानगौरवादेव वक्ष्यामेष सुबुद्धिमान्।<br>नन्दन त्वं तु सन्मानं कुरु व्याख्यानकारिणे॥80॥ |
| पतन्तमम्बरात्सन्तः कुम्भिनीं प्रति शम्भुना।<br>कुम्भराक्षसभङ्गे तु दृष्ट्वा च स्तम्भितो मया॥81॥ |
| ध्वजस्तम्भो द्विजश्रेष्ठ भुजस्थम्भे धृतो मया।<br>सुजनान् भजकान् विष्णूत्सवः पातु ममात्मजान्॥82॥ |
| कुञ्जरायुत सत्वोऽहं कञ्जनाभप्रियेच्छया।<br>मञ्जुमत्पाणिना धर्ता कञ्जलोचन सन्निधौ॥83॥ |
| अधस्तादुपविष्टोऽहमिति मा चिन्तय द्विज।<br>त्वदन्तर्यामिणं मामप्यधस्थं विद्धि बुद्धिमन्॥84॥ |
| मत्कृतश्चात्र सन्मानो वाङ्मात्रेण कुतोऽभवत्।<br>पच्छोटिकाऽपि नो दत्ता तव विप्र ममाग्रतः॥85॥ |
| ऋणान्निष्कृतिरप्याशु न कृता तव शोभन।<br>भोज्यवित्तं प्रदत्वातु ऋणान्मुक्तः शनैः शनैः॥86॥ |
| भोजनार्थं मधुकरवृत्तिं कुरु यथा पुरा।<br>मत्कृतिश्चाप्यश्मगता न कृता पश्य तन्मते॥87॥ |
| तस्मात्तवैवाहिका भावेऽप्यमुत्रार्थो भविष्यति।<br>मत्प्रसादान्न सन्देहो विश्वासं कुरु सर्वथा॥88॥ |

| |
|---|
| ऐहिकोपि यथा काले किञ्चित्किञ्चिद्भवष्यति।<br>श्रीशप्रसादादावासोऽप्यत्रापितु भविष्यति॥89॥ |
| अहं तु गत्वा चायास्ये चिरं जीव सुखी भव।<br>द्विजसभाजन सज्जनप्रिय कुजन भञ्जन ममात्मज भोज।<br>द्विजवरस्य ऋणजां सुरुजं वै सुजनजेष्ठ हर मज्जनैर्द्विजैः॥90 |
| वेदान्तवेद्य मम सान्द्रदयानिधेऽद्य।<br>त्वं वेदवेद्य पदपद्मसुधारसाब्धौ॥91॥ |
| धीमन्द्रेण मथिते सति भावचिन्ता |
| रत्नं गृहीष्व तव भागदशोत्तराच्च॥92॥ |
| वेदान्तवेद्य सुजनाब्धिसुपूर्णचन्द्र |
| त्वं कुण्डमण्डलसुदर्शनतो भवाद्य।<br>त्वं वेदवेद्य कुमुदस्य प्रमोदकारि |
| मत्पट्टदिव्यसरसीतटजस्य कामम्॥93॥ |
| त्वां वेदवेद्यमपि वां सहितौ च दृष्ट्वा |
| सन्तोषसन्ततिरभून्मम ज्येष्ठपुत्र।<br>पूर्वं यथा च सुरवर्यरघुप्रवीरम् तस्यानुजं दशरथस्य बभूव मोदः॥94॥ |
| रथोत्सवस्य विघ्नानि यानि कानिचिदप्यहो।<br>स्तन्भ प्रपातनादीनि तानि वारितवानहम्॥95॥ |

मद्भयात् कृद्ध विघ्नानां पुनरुद्धरणं बुध।

नैवेति सुमनोज्ञोऽहं क्लीबशब्दं प्रयुक्तवान्॥ 96॥

एतत् सर्वं स्वाप्नद्येन गर्वं

हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान्

दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥97॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥98॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥99॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकश्रीवागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराज पूज्यचरणोदित

श्रीस्वाप्नवृन्दावनाख्याने एकादशोऽध्यायः समाप्तः॥

## ॥ अथ द्वादशोऽध्यायः ॥12॥

ओं मत्प्रसादाच्च भूपेन शिबिकारोहणं कृतम्।

तव विप्र न सन्देहश्चेत्सर्वं हि निदर्शनम्॥1॥

मत्प्रसादाच्च शेषेण कृतो यत्नस्तवाप्तये।

वृत्तेर्नचान्यथा विप्र चिन्तय त्वं सुखी भव॥2॥

| |
|---|
| मद्दत्ताचार्यनाम्ना तु यः कश्चिद्वा नराधमः।<br>ब्राह्मणं न भणन्त्यन्त्यः कुणपेन किमन्तरम्॥3॥ |
| वृन्दावनपदोपेत तन्नाम्नैवाह्वयत्विमम्।<br>ये चेमं न भणन्त्यन्त्याः ते च मद्द्रोहिणः सदा॥4॥ |
| लक्ष्मीपतिः सूक्ष्ममतिः श्लक्ष्णवाक् मत्कटाक्षतः।<br>भोक्ष्यतीक्षाफलं सूक्षं मत्कृतिं वक्ष्यतु त्विमाम्॥5॥ |
| लक्ष्मीपते सूक्ष्म मते मत्कथामृतवारिणा।<br>सतामाध्यात्मिकाद्यग्निं शमय त्वं सुखी भव॥6॥ |
| अहो ममात्मजा युक्तिमल्लिकाख्या ममात्मजम्।<br>वव्रे तीव्रेण बोधेनाप्यग्रजं व्यग्रभामिनी॥7॥ |
| अग्रजाद्रमणीभूत्वा जाता सा भावगर्भिणी।<br>सुषाव पुत्रं भावाख्यं विदुषां तु मतं तथा॥8॥ |
| अथापि दोषशून्याऽभून्निस्सङ्गस्यात्मजा यतः।<br>यां तु श्रुत्वा तु सत्सङ्गी निःसङ्गो जायते पुमान्॥9॥ |
| तस्मान्निस्सङ्गतावाप्तौ तत्सङ्गाच्छृणुयादिमाम्।<br>को वा त्वयि दयाशीलो वर्तते मत्सुतोपमः॥10॥ |
| ऋणमोचयितारां ते मत्पुत्रं शरणं व्रज।<br>यश्चाक्षेपं करोत्यत्र मत्कृतौ दोषशङ्कया॥11॥ |

| |
|---|
| तत्प्राणस्यैव चाक्षेपं मुख्यप्राणः करोत्यहो।<br>सत्यं सत्यं पुनः सत्यं त्रिवाचापि मयोच्यते॥12॥ |
| विप्रान्तर्यामिणा चेयं सत्कृतिश्च मयाकृता।<br>अयं तु ब्राह्मणः श्रीमानपणे चातिपापिना॥13॥ |
| आतपे स्थापितः कामं देवरेण वणिग्भृता।<br>दिजान्तर्यामिणं मामप्यातपस्थं चकार सः॥14॥ |
| पुत्र त्वं शीघ्र तस्तस्मात् ऋणान्मोचय मारणात्।<br>पुत्र मद्वचनं सत्यमेकं कुरु  च कीर्तये॥15॥ |
| अहं दास्यामि मद्दास्यं शश्वदृणविमोचने।<br>विप्राय प्राप्तकामाय निर्विघ्नं कुरु तत्र च॥16॥ |
| मत्कार्यमपि भूदेव किञ्चिदप्यतिलङ्घितुम्।<br>न शक्यं न कृतं तच्च तव कार्यं तु किं पुनः॥17॥ |
| इतः परं तु मत्कार्यं तव वा विप्रवर्ययत्।<br>न वक्ष्ये कुर्विति व्यर्थं दैन्यं मम न रोचते॥18॥ |
| तव कार्यं तु विप्रेश प्रागेवोक्तं मयानघ।<br>भोज्यवित्तं प्रदत्वा तु ऋणान्मुक्तः शनैः शनैः॥19॥ |
| इति पूर्वं मया प्रोक्तमनुसन्धत्स्व बुद्धिमन्।<br>सत्पात्रे दानशीलस्य मत्पात्रे चान्नदो द्विज॥20॥ |

| |
|---|
| मत्करे चोदकं दत्वा सत्करं प्राप्नुयादिह।<br>ऋणमोचयिता ते च मरणं नैति शीघ्रतः ॥21॥ |
| शरणं व्रज मत्पुत्रं करुणाकरमञ्जसा।<br>विप्रस्य पुत्रलाभोऽयं भवतीति मयोदितम्॥22॥ |
| तत्सत्यं समभूत्पुत्र कुत्र ते संशयो वद।<br>एवं मयोदितं सर्वमैहिकामुष्मिकं च यत्॥23॥ |
| तत्सत्यं नात्र सन्देहो विश्वासं कुरु सर्वदा।<br>सुजनाम्भोज तेजस्विन् कुजनाम्बुजराज ते॥24॥ |
| स्वजने चास्तु सौजन्यं द्विजराजे च सर्वदा।<br>एवं मदीरितां कीर्तिमार्तिनाशकरीं पराम्॥25॥ |
| आदाय ते चानन्दाय चानन्दी भव नन्दन।<br>हरौ कुरु गुरौ भक्तिभारं धीर परात्मरे॥26॥ |
| घोरसंसारपारं त्वं तितीर्षुश्चेत्कृपाकरे।<br>कुजनं त्यज दुर्बुद्धिं भुजगं तु जनो यथा॥27॥ |
| मया यदुच्यते तद्वै हित्वा चान्यत्वयोच्यते।<br>करणापाटवं विप्र मरणार्तिसमं तव॥28॥ |
| गुणाधमानिति प्रोक्ते बलाधिकानिति त्वया।<br>प्रोच्यते विप्रवर्येह तव मौढ्यमहो बत॥29॥ |

स्वप्नसत्यत्ववादेन चेतुमिच्छन्ति वादिनम्।

ये तत्ववादिनः सर्वे त्वङ्गीकुर्वन्तु मत्कृतिम्॥30॥

हे पुत्र विप्रवर्योऽयं कुत्र यास्यति मत्प्रियः।

सत्रार्थं तव सत्पात्रं सकलत्रः सपुत्रकः॥31॥

श्रोत्रियः शास्त्रवेत्ता च कृपापात्रो ममात्र तु।

गात्रे कृशतरः पुत्र कुत्र यात्रां करिष्यति॥32॥

भोज्यवित्तं ऋणान्मुक्त्यै दत्तवान्मम वाक्यतः।

भोजनार्थं तु किञ्चिद्वा नास्ति चास्मैदयां कुरु॥33॥

मच्छिष्यैर्दापय त्वं व  पुत्र किञ्चिद्ददस्व ह।

मद्वाचा नन्दन त्वंहि सर्वथा मा वृथा कुरु॥34॥

किमत्र बहुनोक्तेन ममैकोक्तिः शतोक्तिका।

तस्माद्ज्ञापय मच्छिष्यैर्मदाज्ञेति निवेद्य तान्॥35॥

इदं तु सर्ववृत्तान्तं वद सीतापतेः सुत।

श्रुत्वा सन्तोषवन्तश्च तं विना वद तान् मुने॥36॥

मात्रा विहीनः पित्राच भ्रात्रा मित्रास्तथैव च।

मामत्राश्रितवान्विप्रः सत्पात्रं किमतः परम्॥37॥

स्वामित्वेन सखित्वेन बन्धुत्वेन सुहृत्त्वतः।

मामत्राश्रितवान्विप्र सत्पात्रं किमतः परम्॥38॥

किमत्र बहुनोक्तेन विप्रे मत्प्रीतिरञ्जसा।

जायते त्रायते कामं कियज्जन्मरणं मुने॥39॥

वृद्धः शुद्धः सदाभक्तिबद्धः सद्धर्मपद्धतिः।

श्रद्धासमुद्धतो विद्वन् धत्ते मद्बुद्धि बन्धितः॥40॥

शरणागतविप्रं तं करुणाकरमञ्जसा।

मरणार्तं हरिष्यामि परिणामं गतेऽप्यहो॥41॥

तस्मात्पुत्र गतिः का वा मया त्यक्ते द्विजोत्तमे।

त्वमप्यमुं ममावासं मानयस्व सुवाससा॥42॥

शश्वद्विस्मृतिशीलस्य कस्मृतौ विस्मृतिर्भवेत्।

अमृतिं तव विप्रेन्द्र कामतिं त्यज मां भज॥43॥

विप्रनन्दनमन्यं वा धनिनं मनसाऽपि वा।

कार्पण्यं न वदस्व त्वं शरणं व्रज मां मुनिम्॥44॥

कार्पण्यं तव विप्रेश मम सन्तोषकारणम्।

त्वदन्तर्यामिणो विद्वन् न भवेत्पुण्यमूर्तिनः॥45॥

यावदीश्वरदत्तं वा वित्तं गृह्णीष्व पोषणम्।

कुरु पुत्रकळत्रादि मित्राणां सत्र कर्मणि॥46॥

अन्ते सुत्रामलोकोऽयं कान्तस्तव भविष्यति।

शान्तिस्तव भवेद्विद्वन् मां तातं शरणं व्रज॥47॥

| |
|---|
| मन्नन्दनपदं धन्यं धनधान्यादिकं दिने।<br>दिने ममेति जानीहि कानीहिर्नोच्यते मया॥48॥ |
| मातृत्वेन पितृत्वेन भ्रातृत्वेन च मित्रतः।<br>त्रातुर्मे पुत्रतां प्राप्तः सत्पात्रं किमतः परम्॥49॥ |
| तस्माच्छरण्यं शरण मरणं शरणार्थिनाम्।<br>भरणं मम मन्त्रेण गुणिनं व्रज ब्राह्मणम्॥50॥ |
| एवं मद्बुद्धिबद्धस्त्वं शुद्धमद्धर्मपद्धतिम्।<br>मुग्धबुद्धिं विना श्रद्धा समिद्धो बुद्धिगां कुरु॥51॥ |
| मा त्यजस्त्वं ममावासं कामवास्यं तु  यास्यति।<br>हित्वैनं तत्ववेत्तारं मत्तोन्मत्तं त्वितः परम्॥52॥ |
| मम कीर्तिधरं कीर्तिं ख्यापयन्तं सतामिह।<br>आर्तिनाशकरीं सार्थीकुरु देहं तु मा त्यज॥53॥ |
| शब्द् जालानि मद्बुद्धिलोलानीति मयाच माम्।<br>नमन्ति तावकानीति संस्तब्धा मुग्धकानि च॥54॥ |
| प्रकृति प्रत्ययौ मह्यं स्वकृतौ सत्यमूर्तिनौ।<br>साचिव्यं कुरुतः सम्यग्व्यवहर्तुं परान् प्रति॥55॥ |
| तस्माच्छब्दस्य दोषोऽयं नास्ति नः शाब्दिकोत्तम।<br>सास्ति निर्दोषता कात्र तोषिता मम भूषण॥56॥ |

| |
|---|
| यत्र प्रतीतार्थबाधस्तत्रान्तर्यामि सङ्ग्रहः।<br>कर्तव्यः सततं विष्णुः स्मर्तव्यः सोऽपि मत्कृतौ॥57॥ |
| अहं द्विजस्य सत्तेजः कारयिष्ये स्वसिष्यकैः।<br>यथाऽमुत्रापि कामैश्च तथाऽत्रापि सुमानवैः॥58॥ |
| यदि वा नैव कुर्वन्ति तर्हि सर्वं यशः श्रियः।<br>आयुष्यं च हरिष्यामि पश्यन्तु तपसो बलम्॥59॥ |
| लक्ष्मीपते च गत्वा त्वं सौक्ष्मीं वार्तां वदस्व मे।<br>मत्पुत्रं तत्र चात्याप्तं नाम्ना सीतापतिं मतम्॥60॥ |
| नो चेत्तवापि दण्डश्च भवेन्मन्मण्डनं विना।<br>पुण्डरीकाक्ष बञ्जिष्ठाः भाण्डीरक गतिर्यथा ॥61॥ |
| विप्र स्वार्थं वदत्येवं तेजः श्लोकं स्वकल्पितम्।<br>इति जानन्ति मां विप्राः स्मर्तव्या नैव ते मम॥62॥ |
| विप्र त्वं लज्जया युक्तो मज्जातं न वदेः कुतः।<br>कुब्जापतेः प्रियं भक्तं सद्ज्ञानं मत्प्रियेरतम्॥63॥ |
| लक्ष्मीपतिश्च मद्भक्तो वक्ष्यत्येव मदाज्ञया।<br>त्वं च तूष्णीं च तिष्ठस्व मत्पादस्मरणे रमन्॥64॥ |
| तेजसा मे जिता लोकाः को जितो न भवेदिह।<br>ऊर्जिताभयसो मह्यं पूजिताश्च नमन्त्यहो॥65॥ |

इति मत्वा तु तां कीर्तिमार्तिनाशकरीं तव।
सार्थीकरु ममाज्ञां तां कीर्तिस्तव भविष्यति॥66॥

विप्रश्च मनसा वाचा कर्मणा वा गुणार्णव।
न काङ्क्षति स्म सुक्षीणोऽप्यत्यन्ताशावशो नहि॥67॥

तस्मात्त्वमेव सन्मानं ममेवेति कुरुष्व तम्।
तवैव प्रीतिरत्यन्तं ममैव च भविष्यति॥68॥

मन्दस्मितधरं सान्द्रानन्दसन्दोहमन्दिरम्।
शतानन्दगुरुं सान्द्रं हयसत्कन्धरं स्मर॥ 69॥

लक्ष्मीपतेः तव सुतं मम नामयुक्तम् कृत्वा करोषि विततां रतिमेव चात्र॥

सीतापतिं मयि सुभक्तिमतां प्रशस्तं मत्पुत्रमप्यभिमतं वद् मन्निरूपम्॥70॥

तव नन्दन कर्णस्य स्वर्णयुक्तश्च सन्मणिः।
ब्राह्मणे क्षणगश्चासीत् जनानां नयनं विना॥71॥

तच्चापि मत्प्रयत्नेन चासीत्काङ्क्षितमीक्षया।
भोक्ष्यतीक्षाफलं सूक्ष्मं तत्प्रत्यक्षमभूत्तव॥72॥

दक्ष प्रत्यक्षमित्युक्ते तत्समक्षमिति त्वया।
लक्ष्मीपतिं समुद्दिश्य तत्पक्षीकृतमक्षत॥73॥

विचार्यैव वदस्व त्वं तवाचार्यत्वमञ्जसा।
ममाचार्यं मतं पृच्छ किमाचार्यत्व सत्फलम्॥74॥

| |
|---|
| अच्युतं स्मर विप्रेश कश्श्रुतिं न त्यजेदिह।<br>स्वच्छमूर्तिस्मृते विद्वन् पृच्छ मामेव तं प्रभुम्॥75॥ |
| इदं वृन्दावनाख्यानं मम वृन्दावने सदा।<br>सद्वृन्दानां वदस्व त्वं मद्वृन्दावन वैभवम्॥76॥ |
| अहं प्रत्यक्षतश्चापि वक्ष्ये सूक्ष्म मते सुत।<br>को दक्षश्चक्षुषा द्रष्टुं मत्तेजः साक्षिगोचरम्॥77॥ |
| विप्र प्रत्यक्षमेवेतत्सर्वप्रत्यक्षमेवच।<br>प्रत्यक्षसिद्धं प्रत्यक्षं ग्राह्यं ते साक्षिणं विना॥78॥ |
| तत्प्रत्यक्षेऽपि प्रत्यक्षान्तराकाङ्क्षाभवेदिह।<br>तत्प्रत्यक्षेपि प्रत्यक्षान्तरबुद्धिश्च जायते॥79॥ |
| एवं चेदनवस्थस्यात्ताप्यवस्थाप्यवस्थिता।<br>न जायते प्रजानां तु जाने कुब्जापतेः प्रियम्॥80॥ |
| त्वां तु मा तात बुद्ध्यात्वं सत्रकर्म सदाकुरु।<br>अहं विमानमारुह्य चामानवसमन्वितः॥81॥ |
| कुमानवगतिं हित्वा सुमानवसमीपगः।<br>ततोऽवरुह्य तस्मात्तु तमूह्य ब्राह्मणोत्तमम्॥82॥ |
| तत्कर्णे स्वर्णसङ्कीर्णाभरणे वच्मि विविच्य ताम्।<br>श्लोकान् वै पञ्च वा सप्त नव वा दश वाष्ट वा॥83॥ |

| |
|---|
| त्रीन् वैकं पञ्चदश च द्वादशादि क्रमादिह।<br>ततोऽन्तर्धानमासाद्य सीमाद्यन्तं गतोऽस्म्यहम्॥84॥ |
| स्वर्गादि भर्गलोकानां गर्गादिमुनिभिः सह।<br>पूर्वं मद्भूत स्रग्गन्धशुद्धगन्धं च जिघ्रति॥85॥ |
| श्रुद्धा समिद्ध सद्बुद्धौ धैर्याद्धत्ते मदीरितम्।<br>एवं स्वप्नक्रमं विप्रे मानिन् जानीहि त्वं सदा॥86॥ |
| कानीह सुकृतान्यस्य त्वन्तु मानादिकान् कुरु।<br>श्रीमद्वागीशसञ्जातवादिराजाख्य सन्मुनेः॥87॥ |
| गतिर्नाजाता चात्रैव भ्रमते श्रवतेऽनिशम्।<br>इति जानन्ति ये मर्त्याः पतिता नात्र संशयः॥88॥ |
| पतन्ति पितृभिः सार्धं वितते नरके सुत।<br>स वै महानुभावैश्च मोदते विष्णुमन्दिरे॥89॥ |
| इति जानन्ति ये मर्त्या अप्यमर्त्यत्वगामिनः।<br>मोदन्ते दिव्यलोकेषु नाकादिषु न संशयः॥90॥ |
| एवं शश्वत्सुप्रसन्नोऽस्मि पुत्र सत्प्रेक्षा ते जायते कात्र शङ्का।<br>मत्प्रेक्षणात्प्राणनाथप्रियेऽस्मिन् कृष्णे भक्तिं कुरु मन्त्रेण पुष्णन्॥91॥ |
| हे पुत्र तव पापानि चापानीव नमन्ति च।<br>दिने दिने कलावृद्धिर्वदने मदनं विना॥92॥ |

जायते कायतश्चापि मापते त्वायते क्षण।

तव पापानि कर्माणि वर्माणि धृतवानसि॥93॥

मत्कृपापात्ररूपाणि वैरिणां मारकाणि च।

तस्मात्तव न भीतिर्वा मम वा नास्ति पार्थिवात्॥94॥

मानं वै जायते कामं मानिं स्तव न चान्यथा।

तस्मान्मम पदे नित्यं भक्तिं कुरु सुतोत्तम॥95॥

विततां कीर्तिमाप्नोति सततं च भवानिति।

वादिराजाग्रतः क्षुद्रराजकार्यं कुतःसुत॥96॥

वादीभमृगराजोऽहं वादिराजो हरिं भजे।

राज्ञां कार्येण मे कृत्यं प्राज्ञ किं वद मद्विधेः॥97॥

ईश्वरस्यैव सङ्कल्पो यथा चास्ति तथा भवेत्।

तस्माल्लोकस्य वार्तां मां न श्रुणुश्चाद्य गच्छतु।

राज्ञां पापात्मनां वार्ता सता मार्तिप्रदा ध्रुवम्॥99॥

तस्मात् त्वं ब्राह्मण श्रीमन् वद मद्गुणवैभवम्।

वक्ष्यामि गुणसम्भूतिं शृणु त्वं गुणिनां वर॥100॥

पुनः पुनः प्रवक्ष्येऽहं तद्गुणौघानपि द्विज।

शनैः शनैः शृणु त्वं हि मदन्तर्यामिणो हरे॥101॥

अथापि न प्रवक्ष्यामि ह्यविश्वासात्मनः कलेः॥102॥

मिथ्यामतिः स्वरूपत्वात्तन्नैवेति प्रवक्ष्यतिः।

कापुरुषहृन्मध्यस्थः कोप एव भविष्यति॥103॥

शापं तदा प्रदास्यामि पापपूरुषरूपिणः।

एवं सर्वं जगन्नष्टं कष्टात्कष्टं च यास्यति॥104॥

स्पष्टात् स्पष्टतमं लोके नारकं याति दारक।

तस्मात्कलियुगे घोरे सौरेर्लोकं तु यास्यतः॥105॥

पश्यतो दुःखरूपाणि नीराणीति च तान् प्रति।

न वक्ष्ये सूक्ष्म वृत्तान्तं ध्वाङ्क्षवृत्तिं च काङ्क्षतः॥106॥

साक्षिसिद्धं तु प्रत्यक्षायोग्यं काङ्क्षितमीक्षया।

वक्तव्यमेव वक्ष्यामि नावक्तव्यं कदाचन॥107॥

एतत सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादि देवान्।

दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥108॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥109॥

इदमर्पितमेवस्तु हयशीर्षस्य पार्षदात्।

समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥110॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्त्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराजपूज्यचरणोदित स्वप्नवृन्दावनाख्याने द्वादशोऽध्यायः समाप्तः॥

## ॥ अथ त्रयोदशोऽध्यायः ॥13॥

वादिराजाख्य भट्टन्तु स्पष्टं वद सुतुष्टिद।
पुष्टगात्रं च मद्दत्तात्सुष्ठुपाटवसंयुतम्॥1॥

काष्ठभारस्य चोद्धारे कष्टात्कष्टकृतिं शठम्।
पट्टवर्धनशुण्ठाग्र्यं मत्कृतिं च पठेति तम्॥2॥

एतत्पद्यत्रयं विद्वन् वदस्वाद्य सदा बुधम्।
वेदवेद्य सदाराध्य शुद्ध मत्पट्टवर्धनम्॥3॥

अहं पालितवानेतद्दिनपर्यन्तमेव च।
इदानीं तु हरिष्यामि तद्धनं मानवर्धनम्॥4॥

पुत्र पुत्र तवार्याणां बुद्धिरेव विवर्धते।
तत्र तत्र च मत्कार्यं शुद्धबुद्धिगतं कुरु॥5॥

वृद्धं बुद्धिमतां श्रेष्ठं बद्धभक्तिं च मत्पदे।
शुद्धं कृद्धं च दारिद्र्यात् दारदिषु च मा त्यज॥6॥

एवं नीतिं मया नीतां सीतां मा तात ततां त्यज।
त्राताहं त्वां सदा कान्त मां तातं शरणं व्रज॥7॥

मनुष्याधम ते शङ्कां सुनिश्शेषां त्यजस्व च।
भविष्यस्यन्यथा प्रेतः त्वं न शिष्यसि सर्वथा॥8॥

| |
|---|
| कुमतिं त्यज जीव त्वं सुमतिं भज सर्वथा।<br>सत्कुरु द्विजवाक्यं तु तत्कुरुष्वमयोदितम्॥9॥ |
| अन्यथा नरकं यासि सुरकम्पितदेहवान्।<br>क्रकचैर्दार्यते त्वं हि सुकृतैर्हीनतां व्रजेः॥10॥ |
| जीव जीव कुतो यासि नरकं नरकम्पनम्।<br>जीव जीव हरेर्भक्त्या इहैव शरदां शतम्॥11॥ |
| जीव जीव गुरौ भक्त्या मयि कारुण्यविग्रहे।<br>जीव जीव स्वपुण्येन कर्मणा शरदां शतम्॥12॥ |
| मनुष्याधम ते वाचा त्वाचार्योऽयं न भीतियुक्।<br>स्वचारित्र्यं च मे सर्वं विचार्यैवं वदिष्यति॥13॥ |
| तस्माच्छृणोषि चेद्दत्तं श्रृणुष्व त्वं द्विजोत्तम।<br>नो चेद्गच्छस्व दूरं तु दारुणं नरकं तथा॥14॥ |
| स्वर्गं वै गन्तुकामश्चेद्वर्गलोकं सुखोत्कटम्।<br>निर्गतो न भवस्व त्वं सर्गान्मद्वचनस्य तु॥15॥ |
| परलोकप्रवृत्तेश्च प्रवक्तृत्वे प्रभोर्मम।<br>प्रभुत्वं चास्य मे दत्तं विप्रस्याशु प्रगृह्णतः॥ 16॥ |
| तस्माद् द्विजीन सुजनैः प्रजानां हितकाम्यया।<br>समाजे सज्जनानां च श्रोतव्यं निजमीप्सुभिः॥17॥ |

| |
|---|
| हे जीव जीव सकलेश्वरजीवभेदं जानीहि जीवगतमेव जनेषु धीमन्।<br>को मानवस्तव समानसुमानवेषो ज्ञानादिगूहनपरो न मनोऽनुसारी॥18॥ |
| अहं ज्ञानिप्रियो नित्यं ज्ञानिनोऽपि मम प्रियाः।<br>नैवाज्ञानी मानयुक्तः श्वानयोनिशतं व्रजेत्॥19॥ |
| मम नन्दन विज्ञानं भानुतेजोनिभं शुभम्।<br>शृणु मोहन मत्पुण्यं कारणं कुज नान्यथा॥20॥ |
| प्रत्यक्षसिद्धमेतद्धि तेजसा च प्रकाश्यते।<br>स्थूलं प्रकाशकं सूक्ष्मं नतु तेजः प्रकाशकम्॥21॥ |
| दूरस्थपुरुषस्यापि ज्ञानं सूक्ष्मप्रकाशकम्।<br>क्वचित्कं तेजसः साह्यं बाह्यसाधनमेव हि॥22॥ |
| अन्तरं तु तमः कान्त ज्ञानं तु हरतेऽनिशं।<br>ज्ञानं मानेन चानीतं हीनं विषयमानिनम्॥23॥ |
| श्वान रूपं मुनिं चापि कुरुते च निवर्तनम्।<br>ज्ञानं तु मौनिनां मुख्यं कानने वासिनां मुने॥24॥ |
| श्वानजन्मनि दूराणि स्वयं नित्यं करोति च।<br>तस्मात् ज्ञानी सदा पूज्यः पूज्यात्पूज्यतमः स्मृतः॥25॥ |
| अहं ज्ञानिप्रियो नित्यं ज्ञानिनोऽपि मम प्रियाः।<br>नैवज्ञानी मानयुक्तः श्वानयोनिशतं व्रजेत्॥26॥ |

| |
|---|
| ममोपदेशवाक्यानि श्वासमात्रावशेषिताः।<br>श्रुत्वा खासादि दोषैश्च मुच्यन्ते नात्र संशयः॥27॥ |
| ममोपदेशवाक्यानि सर्वाभीष्टप्रदानि च।<br>श्वानादिहीनजन्मानि निराकुर्वन्ति नान्यथा॥28॥ |
| हे पुत्र वृत्तश्लोकानामन्ते योज्य फलश्रुतीन्।<br>श्लोकान् वै शोकविच्छेदं कुर्वतः सार्थकान् कुरु॥29॥ |
| ब्राह्मणाशनचिन्ता मास्तु अम्भ्रणी तव दास्यति।<br>कामणिं मा भज त्वं मत्पुत्रचिन्तामणिं भज॥30॥ |
| अष्टाध्यायन् कुरु स्पष्टं शिष्ट काठिण्यवर्जितान्।<br>पुष्टार्थानर्थिनोऽभीष्टं ददतः पठतोऽनिशम्॥31॥ |
| ये विष्णुभक्ताः कृतकौतुकाः सदा सीतापतिव्याससुतादयोमम।<br>भक्ताश्च सर्वेऽपि सुतत्ववादिनामङ्गीकृता मत्कृतिरस्तु सर्वदा॥ |
| इतिश्रीत्यादि वाक्यानि मयानुक्तान्यपि प्रिय।<br>प्रत्यध्याये त्वया चान्ते प्रयोक्तव्यानि चाज्ञया॥33॥ |
| समाप्याख्यानमेतद्वै मद्वृन्दावननामकम्।<br>सद्वृन्दानां च मध्ये चानन्दीकुरु द्विजोत्तमम्॥34॥ |
| आचार्यशब्द प्रवृत्तौ निमित्तं चास्ति ब्राह्मणे।<br>ममापूर्वगुणानां तु प्रवक्तृत्वं दिने दिने॥35॥ |

| |
|---|
| श्रोत्रियः शास्त्रवेत्ता च कृपापात्रो ममात्र तु।<br>सत्पात्रत्वं मया प्रोक्तं तदापि ग्राह्यमेव हि॥36॥ |
| सुक्षीणं ब्राह्मणं विद्वन् गुणिनं फणिनं भण।<br>नन्दन श्रृणु मे वाणीं गुणभूषणकारण॥ 37॥ |
| ममाज्ञाधारणेशानं मम प्राण भणाधुना।<br>चिन्तामणे दरिद्राणां प्राणिनां प्राणभूषण॥38॥ |
| शक्तः कस्त्वद्गुणमणीन् वर्णितुं भणमां विना।<br>शेषस्य गुणसम्भूतिवर्णने गुणभूषण॥39॥ |
| गुणज्ञ प्राणते काणो ह्यक्षिणां मनुते नु किम्।<br>तस्मात् त्वद्गुणसम्भूतिमहमेव मुनीश्वरः॥40॥ |
| जानामि मानवे चान्यो न पश्यामि सुमानव।<br>संसारक्लेशतस्तोक श्लोकं त्वं त्यक्तवानसि॥41॥ |
| एवं ते शोकहर्ता को मां विना कोविदो वद।<br>दक्षिणे कर्णरन्ध्रे च तन्द्री न स्यात् यथा तव॥42॥ |
| मन्द्रमध्यमतारैश्च सध्रीयन्ते वचांसि नः।<br>इत्येकं श्लोकमुख्यं मे पुनर्वच्मि शुके यथा॥43॥ |
| पाकशानसलोकं च पुनर्यामि यथागमम्।<br>यत्कर्णे कामणिं त्वं हि धृतवानसि ब्राह्मण॥44॥ |

| |
|---|
| तत्कर्णे दक्षिणे स्वच्छं मणिं त्वं धृतवानसि।<br>पश्य सामर्थ्यमेतन्मे विपरीतं तवाधुना॥45॥ |
| कर्णस्याभरणं विप्र श्रृणु मे वचनं त्वहो।<br>कुतो दक्षिणमत्कर्णे काममणिः कुणपोत्तम॥46 ॥ |
| वामकर्णे धरस्व त्वं काममणिं ब्राह्मणोत्तम।<br>ममोपदेशकर्णे तु सन्मणिं त्वं तु मा त्यज॥47॥ |
| अहं शतं सहस्रं वाप्ययुतं नियुतं तथा।<br>लक्षं लक्षणसम्पन्न वक्ष्ये शिक्षन् जनान् क्षणात्॥48॥ |
| ब्राह्मणोऽयं न गृह्णाति शास्त्राणि सुमना अपि।<br>श्रृणुते चान्नयत्नं च मनुते ऋणमोचनम्॥ 49॥ |
| श्रुणुते लोकवार्तां च भणते स्वयमप्यहो।<br>मयोक्तश्लोकसत्पाके शोकविच्छेदकारके॥50॥ |
| एकं वार्धं च सार्धं वा श्लोकं त्यजति काकधीः।<br>अतो न वक्ष्ये शास्त्राणि सूक्ष्माणि विविधानि च॥51॥ |
| गह्वरेण सुराणां चासुराणां तु तथैव च।<br>ग्रन्थरत्नस्य बाहुल्यात्साफल्याद्वचनस्य मे॥52॥ |
| अयोग्यजनमोहेन स्वयोग्यगतिमिच्छताम्।<br>सुजनानां द्विजश्रेष्ठ कुजनान् भजतां तथा॥53॥ |

न वक्ष्ये सूक्ष्मवृत्तान्तं ध्वाङ्क्षवृत्तिं च काङ्क्षताम्।

गेहं गत्वा स्वदेहं च गूहयित्वा महद्भयात्॥54॥

तेऽपि सूनृतवाक्यं चेद्वदन्ति कुजना अपि।

हृष्टाः पुष्टाः भवन्त्यद्धा मनसा देहतस्तथा॥55॥

पुरुषं चेद्वदन्त्येते कलुषीकृत बुद्धयः।

अहमेतादृशान् वक्ष्ये जनान्नप्रति पुत्रक॥56॥

तस्मादलं तावदेव यावदीश्वरप्रेरितम्।

कारितं चेदनेदं तु तारितुं भवसागरात्॥57॥

मारितुं दैत्यकूटं च पारतन्त्र्याद् द्विरूपतः।

इदं वृन्दावनाख्यानं येन शृण्वन्ति मानवाः।

दानावानां गतिं प्राप्य श्वानजन्मानि यान्तु ते॥58॥

लक्ष्मीपते मम कृतिं नितरां सुतस्य

सीतापतेश्च कृतकृत्यगतेः प्रयत्नात्।

नित्यं तु तत्र गत एव च त्वन्तु हित्वा

कृत्यं तवापि पतितानपि पावयन्तीम्॥59॥

श्रावयाज्ञां मया दत्तां धृत्वा शिरसि पालय।

अवामि त्वां सदा यत्नात्तवायुर्वृद्धिमेष्यति॥60॥

हे दासाःसन्ति लोके च के दासास्तु भवादृशाः।

को दासत्वमवापेह खेदात्सर्वे पुनर्गताः॥61॥

| |
|---|
| मम सङ्गीतलोलाश्च मद्भक्त्या च सुनिर्मलाः।<br>भवतां कमलादेवी गेहे तिष्ठतु लालिता॥62॥ |
| यूयं वृन्दावनाख्यानं ममाख्यानपरान् बहून्।<br>श्लोकान् सङ्गीतसंस्थान्वै ह्यङ्गीकुर्वध्वमञ्जसा॥63॥ |
| इदमेव महत्कार्यं भवतां मम पूजनम्।<br>इदमेव महाप्रीतिसाधनं भवतां मतम्॥64॥ |
| भवद्भिस्तु सुसङ्गीतं मां च श्रृङ्गाररूपिणम्।<br>श्रुत्वागा अपि सर्वेऽपि निस्सङ्गा यान्तु मद्गतिम्॥65॥ |
| हे ब्राह्मण त्वं कुरु चान्नयत्नं मद्वाक्यरत्नं श्रुणुतेन कोऽपि।<br>अनादरान्मद्वचनं सुतोऽपि तृणोपमं तत्कृतवानहोमे॥ |
| मत्सुतानादरं दृष्ट्वा सर्वे कुर्वन्त्यनादरम्।<br>अतो निराशस्त्वं विप्र भवराशिं तरस्व ह ॥67॥ |
| कुटुम्बभरणार्थं च मरणार्तिसमं त्यज।<br>करणं चातियत्नस्य शरणं व्रज मां मुनिम्॥68॥ |
| यावदीश्वरदत्तं वै तावतैव सुखी भव।<br>मावतास्त्वं सदा विप्र तावकस्य वचः श्रृणु॥69॥ |
| मद्वाक्यरत्नमाशु त्वं धरकालान्तरे मम।<br>आलयं यास्यसे विप्रपालकोऽहं सदा तव॥70॥ |

| |
|---|
| वृद्धे बुद्धिमतां बुद्धौ श्रद्धा बद्धे दयां कुरु।<br>कारुण्यं कुरु चारण्यं न वस त्वं मुनीश्वर॥71॥ |
| ब्राह्मणे मत्पदां प्राप्ते शरणं करुणार्णव।<br>स्वस्थचित्तो भवत्वद्य मत्कृतिं सततं वदेत्॥72॥ |
| सतां च शृण्वतां नित्यं सत्यं कुरु मयोदितम्।<br>पुत्र माकुरु लोभन्त्वं सत्रकालोऽयमञ्जसा॥73॥ |
| कुत्र लोभो न निन्दार्हः पात्रपालो भवाशु च।<br>तन्मनस्थमहं वक्ष्ये मन्मनस्थं त्वदग्रतः॥74॥ |
| शृणु ब्राह्मणमुद्दिश्य दातव्यं किञ्चन त्वया।<br>त्वन्नस्थमहं वक्ष्ये शुणुष्वेकामनाः सुत॥75॥ |
| परेण दापयिष्यामि नाहं दास्यामि सर्वथा।<br>इदं त्वद्धृदयं विद्धि मम यद्धृदि संस्थितम्॥76॥ |
| वृन्दावनकृतिं वक्तुं मन्दाशनमिदं कुतः।<br>त्वं दानं कुरु किञ्चिद्वा मन्दानामपि तद्वद॥77॥ |
| इदं हृदिस्थं सद्बुद्धे कुरु चाद्धा बुधेरितम्।<br>क्रोधं मा कुरु वृद्धे त्वं तवायुर्वृद्धिमेष्यति॥78॥ |
| विप्र ते मत्सुतेनैव दापियिष्येऽन्नमुत्तमम्।<br>तदन्तः प्रेरयित्वाहं मदन्तर्यामितां स्मर॥79॥ |

| |
|---|
| मन्नामधार कृशदारधर सुताग्र्य हे धीर पूर्वगिरमौरसपुत्रकेऽपि। माता पिता न वदतस्त्वपरे कुतो नु तत्क्षाम्यतां शुभमतिं भज मत्कृतिं च॥80॥ |
| कृते चानादरे लोके मत्कृतौ च त्वयाप्यहो। अनादरं तु सर्वेऽपि कुर्वन्त्येव न संशयः॥81॥ |
| अतो मया यदुक्तं तु परोक्तमिव नो भवेत्। भव मन्नामधाराग्र्यतावकोऽहं न संशयः॥82॥ |
| तस्मात्कृतिं मम त्वत्र पुत्रवत्पठ पाठक। काठकस्य यथा पाठं कुर्वन्ति ऋषयः सदा॥83॥ |
| ब्राह्मणस्वान्नकामस्य कोऽनुदास्यति मानिनः। अद्याशनेन शून्यस्य तस्यपुण्यमनन्तकम्॥84॥ |
| विप्रान्नसिद्धिपर्यन्तं कुर्यां निरशनव्रतम्। नैवेद्यं नैव गृह्णामि तावत्पर्यन्तमेव च॥ 85॥ |
| अहं मद्भक्तवश्यश्च अभक्तस्याशुभप्रद। भक्तवत्सलदेवस्य स्वभावो भक्तवश्यता॥86॥ |
| अहं विप्रमुखेनैव भोक्ष्ये चान्नं तनौ तथा॥87॥ |
| ममोपदेश कर्णस्य सन्मणिः क्व गतः सुत। जानीहि चापणस्थस्य वणिजः प्राप वै वशम्॥88॥ |

अन्नार्थं ब्राह्मणश्चासौ कर्णाभरणं विसृज्य च।

आपणे वणिजो हस्ते मणिं  दत्वा गुणार्णव॥89॥

आनीतवान् स्वकं गेहं तण्डुलान् कुण्डलेऽत्यजत्।

एतादृशोऽयं सुक्षीणो मणिनान्नं प्रदत्तवान्॥90॥

पुत्रमित्रकळत्राणां स्वयं तु बुभुजे तदा।

मत्कर्णमणिमात्रं वा त्याजयाशु पणार्धतः॥91॥

स्वर्णेन सहितं कर्णे दक्षिणे धारणं त्वयम्।

करोतु पुरुतो विप्रो मम कारुण्यरूपिणः॥92॥

एवं च पक्षपातेन पक्षीकुर्यां अहं द्विजम्।

सुक्षीणं श्लक्ष्णया वाचा मत्कृतौ पक्षपातिनम्॥93॥

स्वर्णेन शून्ये मणिना च दक्षिणे कर्णे न वक्ष्ये तव विप्रवर्य।

मत्प्रेरिता दत्तवती च ते सती निष्कार्धमात्रं मम वृन्दनाग्रे॥

तत्कर्णं स्वर्णसङ्कीर्णं करणाभरणं  च ब्राह्मण।

आपणे वणिजः पाणौ कुतस्त्वं दत्तवानसि॥95॥

तदागमनपर्यन्त न वक्ष्ये दक्षिणे तव।

कर्णे ब्राह्मणते वाणीं पुण्यहीनोऽसि तत्क्षणे ॥96॥

अतः शीघ्रं तदादाय पुनर्धर धरासुर।

गुरोराज्ञां न वैराग्यान्निराकुरु नराधम॥97॥

एतत् सर्वं स्वाप्नपद्येन गर्वं

हित्वा सर्वे विप्रवर्यास्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान्

दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः ॥98॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥99॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतं॥100॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

**इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराज पूज्यचरणोदित स्वाप्नवृन्दावनाख्याने अलौकिकविभागे त्रयोदशोऽध्यायः समाप्तः॥13॥**

## ॥ अथ चतुर्दशोऽध्यायः ॥14॥

सीतापते शुभकृते विततां च कीर्तिंत्वं चात्रमित्रकृतवानसि पात्रपाल॥

सुत्रामपुत्रकृतदुष्कृतहन्तृनाम त्वंसार्थकं कुरु ऋषेऽस्य निषिद्धकृत्ये॥1॥

मया निषिद्धं वृद्धोऽयं क्रुद्धः संसृतिपद्धतौ।

सद्बुद्धिरपि सङ्क्षुब्धः क्षुधया तद्व्यधाद्बुधः॥2॥

मत्कर्णसन्मणि स्वर्णयुक्तं त्याजितवानसि।

वणिजः पाणिगं प्राणिन् सुत्राणं कुरु ब्राह्मणम्॥3॥

| |
|---|
| मणिना विलसत्कर्णे मद्वाणीं दक्षिणेऽनिशम्।<br>भणामि शृणु पुण्यात्मन् गुणमाणिक्यवादिनीं॥4॥ |
| अतोऽपि पुण्यवान् कर्णे मणिं धारितवानसि।<br>ब्राह्मणेन गुणिन् धीमन् सुक्षीणोऽयं न संशयः॥5॥ |
| इतः परमहं वक्ष्ये सुक्षीणो ब्राह्मणोत्तमे।<br>लक्षणं मम सर्वं तु शिक्षन् सर्वान् विचक्षण॥6॥ |
| हे शेष दोषरहित मच्छिष्यवृष पोतक।<br>पोष्य दारिद्र्यतद्दोषं त्वं शेषं शोषयाशु च॥7॥ |
| नरस्तोत्रजदोषं तु नरसिंहस्तु तेनहि।<br>नरोत्तम शृणु त्वं हि नर जन्मानि नैव मे॥8॥ |
| तस्मान्मद्भक्तमुख्यस्य विप्रस्य कुरु सत्कृतिम्।<br>मत्कृतिं सर्वदा वक्तुं तत्कृतं तु ममैव हि॥9॥ |
| विठ्ठल भ्रष्टसन्मार्गदुष्टबुद्धिं च माट भो।<br>काष्ठायां तिष्ठ पापिष्ठ शिष्टद्रोहमिमं त्यज॥10॥ |
| शिष्टलक्षणदुष्टत्वं पूर्वकष्टं तु संस्मर।<br>कपटं हृदि तिष्ठन्तं त्यज विठ्ठल संस्फुटम्॥11॥ |
| एवमेव ह्यविश्वासं कुर्वन्तीति मयेरितम्।<br>पूर्वमेव परं विप्र कुरुवृत्तिं च माधवीम्॥12॥ |

| |
|---|
| लक्ष्मीपते कृतिं सातां सुतं सीतापतिं वद।<br>चरमां वा कृतिं सम्यक् परमां तु तयोर्वद॥13॥ |
| कुरु मापतिभक्तिं च सारमन्नं च दास्यति।<br>एवं शेषस्य तोषार्थं व्यासस्यापि शुभाप्तये॥14॥ |
| श्रीशभक्तस्य मद्भक्तियुक्तस्यापि सदा वद।<br>एवं बुद्धिस्तवापीह शुद्धकृद्धस्तु मा भव॥15॥ |
| श्रद्धां कुरु बुधोक्तौ तु वृद्धे सख्यं सदा कुरु।<br>शतं शतं च पद्यानां प्रत्यध्यायगतं कुरु॥16॥ |
| इति पूर्वं मया प्रोक्तं तत्सत्यं समभूदहो।<br>मम सङ्कल्पसिद्धत्वे ह्यविश्वासस्तवापि च॥17॥ |
| कारणं समभूत्काण सुक्षीणं पश्य ब्राह्मणम्।<br>पुत्र कृत्रिमभक्तोऽयं विप्रो नैव तवापि च॥18॥ |
| ऐहिकाभावमात्रेऽपि ह्यमुत्त्रार्थोभविष्यति।<br>तस्माद्विमानमारुह्य ब्राह्मणोऽयं गुणार्णव॥19॥ |
| मत्समीपमथागन्ता पश्य कालान्तरे सुत।<br>आयुशेषे तथा नीते प्रीते मयि सुताञ्जसा॥20॥ |
| हरौ प्रीते तथा प्रीते त्वियि का सृकुतिः कृता।<br>स्त्रीसङ्गिनः कथं चास्य स्वप्ने वक्तिगुरुः स्वयम्॥21॥ |

| |
|---|
| इति शङ्कापि ते मास्तु निःसङ्गोऽहं न संशयः।<br>अर्भके गर्भसंस्थेऽपि स्वर्भानुग्रस्तभानुवत्॥22॥ |
| तवार्भकः पुमानेव भूसुरेश भविष्यति।<br>विप्र त्वं तव पुत्रं तु मम नाम्ना समाह्वय॥23॥ |
| इति पूर्वं मया प्रोक्तमनुसन्धस्त्वबुद्धिमन्।<br>विप्र तत्कृत्रिमश्लोकैः पुत्र बुद्धिप्रतारकैः॥24॥ |
| शस्त्रक्षतक्षात्रवत्ते कात्र हानिः परत्र वा।<br>तूष्णीं तिष्ठ सुशर्मिष्ठ काष्ठमौनं दृढं कुरु॥25॥ |
| शिष्ट कष्टमतिर्मा ते सुष्ठु त्वं पठ मत्कृतिम्।<br>गुणार्णवं तु मद्वाणीं भण मन्नन्दनं गुणिन्॥26॥ |
| श्रृणु तस्य सुधावाणीं प्राणिनां पापनाशिनीं।<br>श्रेणीं प्राप्नोषि तद्वाण्याः श्रवणाच्छ्रेयसां सदा॥27॥ |
| मन्नन्दनपदं धन्यं ध्यात्वा त्वं तु दिने दिने।<br>कदनं मदनावासं तदनङ्गीकुरु प्रिय॥28॥ |
| मन्नन्दनगृहद्वारि शुनवत्संस्थितो भव।<br>श्रृणु तद्गुणसम्भूतिं भण वृन्दावने कृतिम्॥29॥ |
| इदं मे बुद्धिचातुर्यं क्रुद्धस्त्वाचार्य माभव।<br>वृद्ध श्रुत्वा सदा कार्यं श्रद्धावान् श्रृणु कार्यतः॥30॥ |

| |
|---|
| अहं गच्छामि मच्छापः स्वस्थानां न भविष्यति।<br>कृच्छ्रात् कृच्छ्रतरं यान्तु मच्छापात्कुत्सिता नराः॥31॥ |
| अयन्तु कुजनः कृष्णोऽप्यप्पणः फणिबुद्धिमान्।<br>इति पूर्वं मयाप्रोक्तमनुसन्धत्स्व बुद्धिमन्॥32॥ |
| गालीदानेन चैनं तु तोलयामि पुनः पुनः।<br>ताळकाण्डेन तं विप्रं तोलयामि पुनः पुनः॥33॥ |
| एतत्कृतौ सुदाढ्यार्थं मूढविप्रमुखेन तु।<br>काठिण्यं वच्मि पाठेन सौष्ठवे नैव चात्र तु॥34॥ |
| स्त्रीमुखेनापि कात्रापि शङ्का मास्तु सुपुत्रक।<br>श्लोकान् वक्तुं प्रविष्टोऽहं काकबुद्धौ द्विजोत्तमे॥35॥ |
| तोके लोकापवादेन शोको नास्ति ममेह च।<br>प्रश्नं न कुरुते तत्वे न स्नाति मम तीर्थके॥36॥ |
| अश्नाति मृष्टमन्नं मे शिश्नोदरपरायणः।<br>ज्ञानिन् कटाक्षतश्चोक्तं जानीहि त्वं सुपापिनम्॥37॥ |
| धीमन्नकुरु तद्वाक्यं धीमान् भव सदा बुध।<br>तल्लक्षणं न वक्ष्यामि त्वामाचक्ष्व विचक्षण॥38॥ |
| सङ्क्षेपतश्चोक्तमेतत्कालक्षेपस्य शङ्कया।<br>तद्वाणीं न श्रुणु प्राणिन् प्राणिनः प्राणिनां वर॥39॥ |

श्रेणीं प्राप्नोषि पुण्यानां मद्वाणीं श्रृणुषेति चेत्।
विप्रमुद्दिश्य यत्प्रोक्तं तत्प्रोक्तं च मयैव तु॥ 40॥

तत्प्रोक्तं पापिना तेन विप्र स्वार्थं तदुक्तवान्।
इति तद्वचनं किञ्चिन्न श्रुणु त्वं च नन्दन॥ 41॥

क्रकचच्छेदनं प्राप्य छिन्नभिन्नो भविष्यति।
माददस्वेति यो ब्रूयाद्द्रव्यं गोब्राह्मणेषु च॥ 42॥

स याति निरयं घोरं यावदाभूतसम्प्लवम्।
तस्मान्न श्रृणु तद्वाक्यं मद्वाक्यं श्रुणुषेति चेत्॥ 43॥

एतद्वाक्यमपि प्रेष्ठ द्विजोक्तमिति वक्ष्यति।
सोऽत्यन्तं तव विश्वासी देशीयो ब्राह्मणो ह्ययम्॥ 44॥

कोशार्धमपि दास्यामि दासाय भवसागरे।
जन्मान्तरे कर्मनाशे धर्मान्ते शर्म वर्म च॥ 45॥

कुर्मः कूर्मोऽमृताब्धौ च नर्ममात्रेण धर्मिणाम्।
देवतानां मानवानां दानवान्तक एव सन्॥ 46॥

दत्तवान् मित्रसन्तापं कृतवान् शस्त्रजं भयम्।
जानीहीत्यत्र चानीतं वर्णवैषम्यतः सुत॥ 47॥

जानीहि तस्य वैषम्यात्स्वरूपं त्वं मुनीश्वर।
मद्दत्ताचार्यनाम्नापि कदापि न वदत्यहो॥ 48॥

| |
|---|
| वदाद्य विबुधेशत्वं मदान्धस्य सुपापिनः।<br>साम्ना वच्मि सुसाम्ना यो न भणत्यन्त्य एव सः॥49॥ |
| दाम्ना बध्वानयिष्यामि चाम्नायत्सु)बहिष्कृतः।<br>दूतैर्यमस्य सौम्यत्वं काम्यं वा नास्ति तस्य च॥50॥ |
| स्वाम्यमात्रेण सन्तुष्टो भौम्यसंयमनीपुरे।<br>क्रकचैर्दार्यते पुत्र स्वकचेषु प्रगृह्य च॥51॥ |
| श्वपचैर्नीयते मार्गे प्रपच्येत नराधमः।<br>नाममात्रेण वा तोषं पोषयस्व न शोषय॥52॥ |
| मृषा नहि सुषेणाग्र्यतावदेव प्रहर्षय।<br>ब्राह्मणामरणं वक्ष्ये कारणेन विनाप्यहो॥53॥ |
| पुनर्वाणीं हरिष्यामि प्रेरणामपि मे सदा।<br>तस्मात्प्रतिज्ञाहान्यादिदोषो मम न कश्चन॥54॥ |
| श्रीशपादाम्बुजासक्त सेवके मयि कोऽप्यरिः।<br>नास्ति चास्तिकता चास्ति शक्तिरेव सदा हरौ॥55॥ |
| स्वास्थ्यं च मनसः सम्यक् सदास्ति प्राश्निकोत्तम।<br>अयोग्यश्रवणं न स्याद्यथा चाहं करोम्यहम्॥56॥ |
| वाचने ब्राह्मणमतिं सूचनेऽपि हरामि च।<br>वीतिज्ञानं समुद्दिष्टं ठेति तच्छून्य एव च॥57॥ |

| |
|---|
| लेति तत्पालनं चापि समुद्दिष्टं मठेश्वर।<br>पदार्थः कोऽर्थ इत्युक्ते तं च वच्मि सुलोचन॥58॥ |
| विदा ज्ञानेन ठान् शून्यान् लाति गृह्णाति विठ्ठलः।<br>इति विठ्ठलशब्दार्थं पठन्ति भुवि पण्डिताः॥59॥ |
| पट्टवर्धन काष्ठासु श्रेष्ठ सम्यग्विचारय।<br>एतदर्थानुकूल्येन निन्दावाक्यानि सुन्दर॥60॥ |
| योज्यानि पूज्यसत्पुत्र रागद्वेषौ च नैव मे।<br>तर्हि शापोक्तिरप्यत्र कुत्र ते च प्रयोजिता॥61॥ |
| कृत्रिमश्लोककर्तॄणां पुत्र मे सुप्रयोजिता।<br>तर्हि तत्रापि तद्वेषो भवतीत्यपि मा वद॥ 62॥ |
| पुत्र तत्रापि मे चोक्तिरुपचारेण योजिता।<br>भीषणार्थं सुषेणाग्र्यधिषणा स्यान्न तादृशी॥63॥ |
| इति चोक्ति प्रेषणा मे दोषशोषण श्रृण्वहो।<br>मद्भक्ताः सुखिनः सन्तु शश्वज्जीवन्तु कान्त ते॥64॥ |
| शान्तिं यान्तु ममैकान्ताः स्वान्तस्थ हरिचिन्तया।<br>तस्माद्वा मे तपोहानिर्नास्ति दोषोऽपि कश्चन॥65॥ |
| शास्ति मां शाश्वतीं भक्तिं हयग्रीवः कृपाम्बुधिः।<br>हयग्रीवप्रसादोऽयमीदृशो वर्तते मयि॥66॥ |

| |
|---|
| भवग्रहाच्च मां नित्यं त्याजयामास पूजय।<br>अहमाराधनं तस्य कारयामि त्वयाऽपि च॥67॥ |
| प्रेरयामि सुबुद्धिं ते तारयामि भवाब्धितः।<br>तस्मादाराधनं तस्य नित्यं कुरु मनोरम॥68॥ |
| परमां प्राप्स्यसे सिद्धिं शुद्धिं च हृदि नित्यशः।<br>कस्यापि निन्दा न कृता स्वस्यापि सुकृतं शपे॥69॥ |
| तस्यापि प्रकृतिश्चेयं पश्यापि विकृतां कृतिम्।<br>एवं स्वरूपकथनं कृतं पूर्वं मया मुने॥70॥ |
| स्मृतं दैववशेनेह वृतं चाज्ञानतः प्रिय।<br>यादृशं कपटं तस्य दास्यामीति च विठ्ठल॥71॥ |
| हृदि तिष्ठति ते नित्यं तादृशं त्यज संस्फुटम्।<br>इति समप्रार्थयाम्यत्र कात्र शङ्कापि मा तव॥72॥ |
| त्वदर्थमेव सत्पुत्र सोऽपि मित्रं भविष्यति।<br>तस्माद्रागद्वेषोऽहं शेषशायिपदे शपे॥73॥ |
| विप्रास्याच्चोपदेशो मे नायास्यति कुत सुत।<br>इति ते शेमुषी मास्तु तदास्यादाहरामि तम्॥74॥ |
| गोप्यत्वात्सोऽप्यतीतोऽभूद्भूपतीनां सभापते।<br>क्वाप्यतो नैव मे चोक्तहानिः पश्य सुपुत्रक॥75॥ |

| |
|---|
| सहस्रं वच्म्यहं श्लोकशतं वाप्ययुतं प्रिय।<br>नियुतं प्रयुतं वापि चाहरामि तवास्यतः॥ 76॥ |
| एवं नित्यं च वक्ष्यामि पक्षीकृतमुखेन च।<br>कक्षीकृतप्रमेयं चशक्ष्याम्याहर्तुमेव तत्॥77॥ |
| उक्तं श्लोकेषु शक्तश्च ग्रहीतुं सर्वमेव च।<br>अथाप्ययोग्यजीवानां योग्यं नेत्याहरामि तत्॥78॥ |
| सुत सुलोचन लोकपूजित यतिकुलोचितलोभृपालक।<br>व्रतबालोचित कृत्यलोल ते शतधृतेरपि लोकमलोक्य ते॥ |
| हे पुत्र पुत्र विप्रस्य कार्यं विस्मृतवानसि।<br>हा तत्र तत्र कर्तव्यं यत्र ते वाक्यगौरवम्॥80॥ |
| तूष्णीं स्थिते मयि सुत सर्वथा विस्मृतिर्भवेत्।<br>अतस्तवाहं स्मृत्यर्थं वक्ष्याम्यद्य पुनः पुनः॥81॥ |
| ममाश्रितश्च विप्रोऽयं कामान्वितमतिर्भवेत्।<br>सोमाश्रयाद्यथा रुद्रोऽप्युमाकान्तो गतव्यथः॥82॥ |
| तथायं ब्राह्मणः श्रीमान् त्वया मुक्त ऋणव्यथः।<br>भवेदामरणान्तं च मां तातं शरणं गतः॥83॥ |
| उक्तं मे वितथं जातं शुक्तिरूप्यं यथा सुत।<br>अत्यन्तासत्वतः कान्त भ्रान्तेर्विषयमेव तत्॥84॥ |

| |
|---|
| तद्वदर्थक्रियाकारी न भवदेव मे मतिः।<br>इत्यनादरतः पुत्र कृत्रिमेति च मत्कृतिः॥85॥ |
| विप्रेणैव कृता चात्र नात्र हानिः परत्र च।<br>अकृतेऽपि तदुक्तार्थे स्वार्थं वक्ति द्विजो वृथा॥86॥ |
| कार्तिर्मम कृते चार्थेऽप्यकृतार्थेऽपि वा सुत।<br>इति तेशेमुषी न स्यात्पश्याद्य सुविशारद॥87॥ |
| कस्य वा कृतिरेवेयं स्वस्य वाद्य द्विजस्य वा।<br>हे केशव त्वं तोकस्य स्मारकः प्रेरको भव॥88॥ |
| कार्यं मे कारय क्षिप्रं विप्रस्यापि सुतेन मे।<br>अन्यथा भक्तवश्यत्वं तव न स्यात्स्वदास्यकम्॥89॥ |
| पश्याद्यचक्षुषा स्वेन करुणारसवर्षिणा।<br>अच्छिन्नभक्तिसञ्छन्नः पृच्छन् सल्लाञ्छनं तव॥90॥ |
| इच्छन् सञ्छिन्नबन्धं च त्वामञ्चन् काञ्चनं त्यजन्।<br>ज्ञानवैराग्यभक्त्याख्यसखिभिः सुखमेव च॥91॥ |
| प्राप्नुयां स्वाप्नपद्यैर्मे चाप्नुयाच्छोभनं नरः।<br>विदित्वा मद्गतिं श्रुत्वा कृत्वा भक्तिं मयि प्रिय॥ 92॥ |
| भुक्त्वाभूतिं च मां स्तुत्वा छित्वा संसृतिबन्धनम्।<br>इत्यहं देवदेवेशं वेदे वेदे च संस्तुतिम्॥93॥ |
| कृत्वाकृत्वा प्रार्थयामि दृष्ट्वा दृष्ट्वा तमव्ययम्॥94॥ |

एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्त्यजेन।
श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्टोर्वशीं यान्तु मां मानवेन्द्राः॥95॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।
मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥96॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥97॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

**इति श्रीमत्कविकलतिलकश्रीवागीशतीर्थ करकमलसञ्जात श्रीमद्वादिराजपूज्यचरणोदित स्वाप्नवृन्दावनाख्याने अलौकिकविभागे चतुर्दशोऽध्यायः समाप्तः॥14॥**

## ॥ अथ पञ्चदशोऽध्यायः ॥15॥

ऋणेऽप्यथ शरण्यं तं करुणां त्वयि कारिणम्।
शरणं व्रज कारुण्यात्तस्य संसरणं जहि॥1॥

इति ते बुद्धिरद्धोक्ता वृद्ध कृद्धश्च मा भव।
बद्ध भक्तिर्भव श्रद्धा समिद्धश्च मदङ्गजे॥2॥

शिखां गृहीत्वा वक्ष्यामि सखा त्वं मम सर्वदा।
सुखावासान् प्रवक्ष्यामि मखावासादपि प्रिय॥3॥

मद्वशे सति मध्वेशे मध्वाचार्यप्रिये मयि।
मधुघातकभक्ता ये भक्तिं कुर्वन्ति नित्यशः॥4॥

| |
|---|
| श्रावय त्वं मम श्राव्यं चरितं चरितोऽमृतम्।<br>पावय त्वं पावकाद्धि विशुद्धिर्मुग्ध लोहके॥5॥ |
| यथा तथा वृथा विप्र मा कृधास्त्वं यथा तथा।<br>पृथासुता यथा पार्था कृतार्थाः सत्कथां सताम्॥6॥ |
| वद वृन्दावनेऽमन्दानन्दसन्दोहमन्दिरे।<br>सदा कन्दाशनामन्दानन्ददस्यगदाभृतः॥7॥ |
| भक्तस्य त्यक्तपापस्य सक्तस्य तदपिप्रिये।<br>शक्तस्य भक्तियोगे च रक्तस्य मम सत्कृतिम्॥8॥ |
| एवं चेद्भवति प्रेष्ठ श्रेष्ठवृत्तिरपि प्रिय।<br>ममेष्टनिष्ठात् सत्पुत्रात्सर्वाभीष्टं भवेत्तव॥9॥ |
| पुत्र पूतेन पित्राच पुत्राशा पूरिता मया।<br>पित्रा पूतेन पुत्रेण पित्राशा मेन पूरिता॥10॥ |
| उपकारस्योपकारः क्रियते लोकसज्जने।<br>उपकाराभावतोऽपि ह्युपकुर्वन्ति पूर्वजाः॥11॥ |
| उपकारनिमित्तेन ये कुर्वन्त्युपकारितां ।<br>राजसास्तेच विज्ञेयाह्युपकारार्थिनः परे॥12॥ |
| उपकारनिमित्तेन ह्युपकुर्वन्ति ये परे।<br>सात्विकास्ते च विज्ञेया ह्युपकारनिराशिनः॥13॥ |

उपकारेऽपि ये नैव कुर्वन्ति ह्युपकारकम्।
तामसास्तेच विज्ञेया उपकारापकारिणः॥14॥

लोकनीतिरियं तात शङ्का ते मास्तु सा सुत।
सात्विकस्त्वं मतः साम्यैकाम्यं मे नास्ति सर्वथा॥15॥

तवैव कर्तव्यमेतन्मन्निरूपं परं स्मर।
अहं प्रेरयिता पूर्वराजानंशैवमेव च॥16॥

शैवमुद्राङ्कितग्राममध्यस्थं वामनेरितम्।
सुक्षेत्रमदद्दां पुत्र तत्र दृष्टिं करोति यः॥17॥

सुत्रामलोकसन्त्रस्तो याति सावित्रमेवच।
इह तस्य सुसन्तानं नाशं याति न वै मृषा॥18॥

शनैः मद्रोहतो नाकाच्युतः कीनाशलोकिताम्।
याति तत्रानेकयातानायां नारीकिभिः सह॥19॥

अनुभुङ्के मनोः कल्पपर्यंतं दुःखमेव च।
ततो विष्ठाक्रिमित्वं च काष्ठासु प्राप्यते सुत॥20॥

षष्टिवर्षसहस्राणि श्रेष्ठ तेनैव पापिना।
तस्माद्विप्रस्य या वृत्तिर्नहर्तव्या हितेप्सुभिः॥21॥

विप्रग्रामेषु यो भुङ्के करं राजाधमः क्वचित्।
स याति निरयं घोरं रौरवं सौरिशौर्यतः॥22॥

| |
|---|
| श्रोतव्यं राजभिर्नित्यं मन्निरूपं परात्परम्।<br>करं मह्यं च दत्वा तु त्वरयाऽरौरवाश्च ये ॥23॥ |
| सीतापते मम सुतस्य कृतार्थतां च श्रुत्वा तु मत्कृतिशतैः विततार्थपूतैः।<br>सन्तोषसन्ततिमथ प्रथयाद्य लोकेत्वत्तोषतस्तदितरेऽपि सुतोषिताः<br>स्युः ॥24॥ |
| एवमिष्टत्रयं शिष्ट सुष्ठुकारय प्रेष्ठ मे।<br>काष्ठासु मद्दयादृष्टिः श्रेष्ठ त्वय्येव नैष्ठिकी॥25॥ |
| भवतीह ततो सीतापते कान्तं च मे सुतम्।<br>तातस्य कुरु कृत्यं ते त्वां पाति च स विश्वकृत्॥26॥ |
| इति सम्बोधयाम्बोधिशयनस्य सभातले।<br>भविष्यति सुतस्थानमभयं चापि मद्भटैः॥27॥ |
| शतहायनपर्यन्तं कृतहानिर्न चैव ते।<br>वृतहारावळिं शौरिं मितहारं प्रपूजय॥28॥ |
| मत्पादसूर्यकिरणेन तवान्तरस्थाज्ञानान्धकारहरणं कुरु पुत्रवर्य।<br>मध्याह्नभानुकिरणेन हृदम्बुजं तेचोत्फुल्लपद्मवदतिप्रवणं वरेण्यम्॥29॥ |
| मद्रञ्जिते च हृदये वरदं हरिं तम्संस्थापयाद्यसदनं मदनाभिरामम्।<br>मन्मन्त्रतन्त्रविधिभिः कुरु वारिधौ यः शेते च शेषशयने परमस्य<br>पूजाम्॥30॥ |

एवं तद्ध्यानमानेन गानं कुरु गुरूदितम्।

मा संसारभयं  धीर वरदोऽस्मि तवादरात्॥31॥

मद्वाणीं भण कल्याणिकर्णरन्ध्रे श्रृणु प्रिय।

गुणिनश्चरणे नैव नन्दनस्यापि न त्यज॥32॥

रामो राजीवनेत्रोऽसौ राज्ञः स्वैरं वरं ददौ।

तदग्रजं शरैर्हत्वा तद्वारानसिधारया॥33॥

वृन्दावनहरं स्वस्यैवाग्रतश्चिरसंस्थितम्।

रक्तच्छर्दिमपि ह्यत्र कारयामास वीर्यवान्॥34॥

तदारभ्यामरगणैर्मद्वृन्दावनमार च।

तद्राज्यञ्च ददौ स्वस्य नामधारिण एव च॥35॥

तद्विरोधिनि क्रुद्धः सन् रुद्रः कालान्तकोऽप्यभूत्।

मम नन्दनवाक्येपि श्रद्धाराहित्यवानभूत्॥36॥

तद्वाग्विरोधिनि क्रुद्धः कथं कुर्यादनुग्रहम्।

हितोहितोपदेशस्य कर्ता च गुरुरव्ययः॥37॥

गुरुद्वारा प्रसन्नः सन् भरतीदं रमापतिः।

मन्निरूपितवाक्येषु चैकं वा नैव चाकरोत्॥38॥

राजसेवासुनिरतो नरकं याति दारुणम्।

गुरुरेव हरिः साक्षाद्गुर्वन्तर्यां हरिं हरेत्॥39॥

| |
|---|
| करोति परमं चैवानुग्रहं नरकं हरम्।<br>एतत्प्रमेयं सर्वं तु वद सीतापतेर्मतं॥40॥ |
| मया तस्मै कृतं राज्यं राज्ञे रामानुशासनात्।<br>मम नन्दनसन्मानं करोतु मनसार्पितम्॥41॥ |
| मम वृन्दावने भक्तिं शक्तिपूर्वं करोत्वलम्।<br>एनं चेदायुरारोग्यं राज्यं सुस्थिरमेव च॥42॥ |
| रामस्यानुग्रहेणैव राज्ञः सर्वं भविष्यति।<br>तस्मात्तस्मै वदस्व त्वं गत्वा सीतापते कृतिम्॥43॥ |
| सुतेन मम सन्मत्या मथितं कथितं तव।<br>शेषमुद्दिश्य यत्प्रोक्तं पञ्चपुत्रत्वमत्रतु॥44॥ |
| तन्मिथ्याभूतमेवासीदिति शङ्कापि मास्तु ते।<br>पञ्चवृन्दावनान्येव तत्पुत्रायित कन्दिना॥45॥ |
| मया नन्दन सम्प्रोक्तं श्रृणु सुन्दर सद्गतिम्।<br>पुत्रिणो यां गतिं यान्ति तां गतिं याति निश्चिताम्॥46॥ |
| अत एव हि पञ्चाशद्युगपर्यन्तमेव च।<br>महीयते स विष्णोर्हि लोकेऽपीति मयोदितम्॥47॥ |
| पूर्वजन्मनि राजायं द्विजचक्षुः प्रजेरितः।<br>उज्जहारात्मजे नास तज्जन्य दोषेण चान्धकः॥48॥ |

| |
|---|
| तस्माच्छूकापि शङ्काया मास्तु ते वै सुपुत्रक।<br>काकवाक्यस्य सादृश्यं तोक मा कुरु मत्कृतौ॥ 49॥ |
| पूर्वन्तु सार्वभौमोऽयं कूर्मको नर्मदातटे।<br>शर्मणे नर्मकृत्स्वैरं तदूर्मिगतनौर्गतः॥ 50॥ |
| स्त्रीगणैः सहितः स्त्रैणो ब्राह्मणैः शापमाप च।<br>अणिमाण्डव्यकण्वाद्यैरणिमाद्यष्टसिद्धिभि॥ 51॥ |
| राजसेवासुनिरतो रामस्यानुचराग्रजे।<br>मृते सति करैर्योगे तस्यावरजराज्यहा॥ 52॥ |
| तद्द्रोहतो ह्यभद्रं च यास्यतीति च ते शपुः।<br>इति शप्तस्तत्त्वचैकं विप्रं यत्प्रेरिता द्विजाः॥ 53॥ |
| ददुः स्वपुरतः शापं तं प्रजाभिः समीरितः।<br>कारागृहे रहस्ये तु ह्यासह्यं तं प्रहस्य च॥ 54॥ |
| प्रहस्य स्वहितेनैव सहितो वसुहोत्रकम्।<br>नेत्रस्योत्पाटनं चक्रे पुत्र मन्त्रिनिवारितः॥ 55॥ |
| विप्रद्रोहफलं चैतन्नेत्रयोर्नाशनं मुने।<br>इति पूर्वकृतं कर्मशर्मनाशाय चेह तत्॥ 56॥ |
| अहं धर्मगतिं दास्ये तस्य मर्माणि नो वदे।<br>इत्येकं श्लोकमाकाशे गते मयि गतं द्विज॥ 57॥ |

आदत्स्व तं वदस्वेह मम पुत्रस्य चाग्रतः।

स्वपुरोहितमाराध्य चाग्रजन्माभवत्ततः॥58॥

वृद्धं न त्यज मद्वाचं श्रद्धावान् वदतीह च।

मम पुत्रः कृतार्थःसन् आयातु भरताग्रजः॥59॥

यथा कृत समस्तार्थस्तावद्वक्ताह मत्कृतिम्।

श्रुत्वा तु मत्कृतिं को वा सन्तोषं च करोति वै॥60॥

सुतं विना न पश्यामि मत्कृतौ तोषिणं गुणिन्।

अथापि वक्ष्मे सीतायाः पतेर्नाम्ना वदन्ति यम्॥61॥

तं प्रति प्रकृतिं तस्य जाने मत्कृतिमञ्जसा।

सीतापते मम सुतस्य वशं तु सर्वं

मत्सौभगं तदतिकृत्य विरक्ततां च॥62॥

कृत्वा तु वर्तत इह प्रति नास्ति तस्य

त्वं पश्य कुत्र यतिषूत्तमतास्ति तादृक्॥63॥

एवं कर्तव्यमत्कृत्येऽप्यत्यन्तं वै विरक्तताम्।

करोति प्रार्थय त्वं च कृत्यं कुरु गुरोरिति।

हे पुत्र चित्रं मत्कृत्यमकृत्वागमनं तव॥ 64॥

गतेऽपि कार्यसिद्धिर्वा कथं स्यान्मदनादरात्।

हितार्थं तव वक्ष्यामि सुताद्यः शृणु मद्वचः॥65॥

कृतार्थौ भव तत्कृत्वा मतार्थत्रयमञ्जसा।
नो चेद्धर्मः कथं चेत्स्यान्मामनादृत्य यास्यसि॥66॥

तस्मात्कृत्यत्रयं कृत्वा गच्छ पुत्र सुखी भव।
सीतापते मम सुवाग्निभवस्य भूतिम्।
भूदेवकं तवकरेऽर्पितवानहं च॥ 67॥

त्वं पुत्रवच्च परिपालय वृद्धमेनं शिष्योऽसि चेन्मम वचः श्रृणु प्रीणयाद्य।
इयमेकोक्तिरेवात्र शतोक्तिर्मम सर्वथा॥68॥

वृथा मा कुरुते तोकवत्ते बुद्धिः कृपान्विता।
अन्येषां वचनं नैव श्रृणु विप्रावमानिनाम्॥69॥

पापिनां च प्रसङ्गोऽयं स्मृतः पूर्वकृतो मया।
मया तरङ्गीणीत्युक्ते त्वया चोक्तं निरङ्गिणा॥70॥

सर्वदेत्यन्तरङ्गेण तुरङ्गवदनं स्मर।
मद्दत्तनिष्कपङ्केण गर्वितोऽद्यैव विप्रक॥71॥

पुनः षड्कं च निष्काणां दापये कोपितां त्यज।
पुरुषान्तरतत्वानि त्यज तवं द्विजसत्तम॥72॥

मज्जनेष्वग्रगन्तारं शरणं व्रज तं भज।
पूर्वं शेषो ममाशेषवचनं नैव चाकरोत्॥73॥

तस्य राजापि किञ्चित्वा मद्द्रोहफलमीदृशम्।
ततः स्वदोषतो नष्टौ तावुभौ भूमिभारकौ॥74॥

| |
|---|
| को वा मद्रोहतः कष्टं नानुभूयादिहात्र च।<br>पूर्वं शेषो ममाशेषवचनं नाप्यचष्ट तम्॥75॥ |
| राजानं तेन दोषेण कारागृहनिवेशनम्।<br>नित्यं पुराणवक्तारं ब्राह्मणं च ऋणाद्गुणिन्॥76॥ |
| पुण्ये वृन्दावने स्वस्याप्यग्रतो नैव मोचयेत्।<br>तेन दोषेण महता वित्तापहरणं त्वभूत्॥77॥ |
| मम नन्दन वाक्येषु चैकं वा नैव चाकरोत्।<br>तेन दोषेण महता सर्वाण्येतानि चाभवत्॥78॥ |
| सहस्रलक्ष पर्यन्तं प्रदक्षिणमथ क्षणात्।<br>चकाराक्षिसहस्रेण लक्षितो यो विचक्षणः॥79॥ |
| तदनादृत्य ताराणां शारदानाकरायितम्।<br>हयग्रीवश्च हाराणां भारं मे गौरवाद्ददौ॥80॥ |
| ममोपदेशकर्णस्याप्यादत्स्व त्वं सुकुण्डलम्।<br>तेन ते कार्यसिद्धिं च कुरु विप्र यथोचितम्॥81॥ |
| मत्कर्णकुण्डले चापि तव दास्येति मे मतिः।<br>जायते जायया युक्तो भज मां भुजगेश्वरम्॥82॥ |
| किं करोषि दारिद्रस्त्वं विप्र रुद्रं च मां भज।<br>सान्द्रसौभाग्यवन्तं मे पट्टभद्रं च न त्यज॥83॥ |

| |
|---|
| मत्पुत्रागम पर्यन्तं शौण्ड पद्यानि नो वदे।<br>कुण्डले च ग्रहाण त्वं मुण्डिनं मां सुभोजय॥84॥ |
| त्वदन्तर्यामिणं श्रीमन् सर्वेषां प्राणिनां गुरुम्।<br>ममाभ्यवहृतेः पुण्यं स्यात्तवैवेह ब्राह्मण॥85॥ |
| सीतापते न त्यज विप्रहस्तं तवेह को वा गणयेद्गुणौघान्।<br>नम्रस्य चाम्लानमुखस्य भक्तियुक्त्यादिकान् सन्मतिशान्तिकान्ती॥87॥ |
| कृत्यत्रयं नैव चकार पुत्र त्वं पश्य सीतापतिमात्मकाद्य।<br>अद्यापि विप्रस्य तु कार्यलेशं चकार तेनैव च तोषितोऽहम्॥87॥ |
| अतस्त्वं कुरु भक्तानामग्रणीर्गौणता न ते।<br>अध्यायान् पद्यजातानां वृद्धकार्यं च किञ्चन॥88॥ |
| ग्राह्यं बाह्यगुणानामप्यभिव्यञ्जकपुञ्जवत्।<br>करण्डपिण्डिततनुः कुण्डलीव स पण्डितः॥89॥ |
| प्रचण्डबुद्धिशौण्डोपि ब्रह्माण्डे लण्डसाम्यगः।<br>मम नन्दन सद्बुद्धिमनिशाम्य सुनिश्चिताम्॥90॥ |
| वदने स तु भस्मानि मानयामास वेनवत्।<br>किं करोति स पूर्वेण कर्मणा गतिमीदृशीम्॥91॥ |
| यतः प्रातः समुत्थाय मां गुरुं स्मरतु प्रियम्।<br>वक्ष्येकर्महरं सूक्ष्मं कर्मिणां शर्मदं सदा॥92॥ |

कर्म चारभ्यते पुम्भिर्नैष्कर्म्यज्ञानसाधनम्।

धृतं चैतद्धतः शुद्धिद्वारा दर्दुरजन्म च॥93॥

निर्दलं कुरुते सार्धं गर्दभाद्यपजन्मभिः।

पूर्वजन्मनि यत्कर्मत्विह जन्मनि यत्कृतम्॥94॥

तत्सर्वं नाशयेत्याशु मासि मासि सखिन्! श्रुणु।

तस्मात्सत्कर्म कर्तव्यं कर्णश्राव्यं कविप्रियम्॥95॥

हरिप्रियं हरेर्ज्ञानसाधनं हरते मलम्।

न कर्तव्यं च दुष्कर्म कदापि कुगतिप्रदम्॥96॥

यदि कुर्यात्सविप्रोऽपि कुम्भिनी तं नरं हरिम्।

शंसति ध्वंसितात्मानं नाहं तं सम्भरामि च॥97॥

नङ्द्वयं कुतो विप्र प्रयुक्तं च त्वया त्विह।

एकेन पूर्वपद्यार्थे सिद्धे सत्यपरं कुतः॥98॥

नाहं तं सम्भरामीति मया प्रोक्ते त्वया द्विज।

नाहं तं न भरामीति प्रोच्यते शोच्यता न मे॥99॥

तवापि न स्यात् सावस्था स्वस्थो भव सभासु च।

मदवस्थां वदस्व त्वं मदुक्तश्लोक सञ्चयैः॥100॥

किन्तु त्वत्क्षेत्रविघ्नानि यः करोति नराधमः।

तस्यैव सा शोच्यता स्यान्मयोपास्य हयास्यतः॥101॥

| |
|---|
| त्वच्चिन्तया किं मच्चिन्तां कुरु विप्र तवोच्यता ।<br>वाञ्छितञ्च भवेदञ्चन् मां काञ्चनरतिं त्यज॥102॥ |
| मुञ्च मुञ्चेह दुश्चित्तं मच्चित्तं कुरु सर्वदा।<br>मुञ्च काञ्चनचिन्तां त्वं चिन्मात्रं चाच्युतं भज॥103॥ |
| रामचन्द्र वरभूपति सान्द्र प्रेमवन्द्यचरणो रघुपेन्द्र।<br>ब्रह्मरुद्रमरुदिन्द्र सुरेन्द्राराध्य राज्यवरदोऽसि नरेन्द्र॥104॥ |
| त्वद्दत्तद्राज्यभूतिं कमलालय पालय।<br>तेन सम्पूजितो नित्यं स्वालयं नैव चालय॥105॥ |
| इत्यहं प्रार्थयामीह राघवेन्द्र मुनीन्द्रकम्।<br>मम वृन्दावने नित्यं देवेन्द्रैः सह संस्थितम्॥106॥ |
| मानवानां धने(ऽ)हानिर्मधुसूदनशासनम्।<br>विना नैवास्ति सन्देहो नैव पृच्छ धनागमम्॥107॥ |
| पृच्छ मां स्वच्छतत्वानि कच्छपस्य महात्मनः।<br>स्वेच्छया सच्चरित्राणां प्रायच्छं भक्तिमेव्ययं॥ 108॥ |
| एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥ 109॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥110॥ |

इदमर्पितमेवास्तु हयशीर्षस्यपार्षदात्।

समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥111॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलक वागीशतीर्थ करकमल सञ्जात श्रीमद्वादिराजपूज्यचरणोदित

स्वाप्नवृन्दावनख्याने अलौकिकविभागे पञ्चदशोऽद्यायः समाप्तः॥17॥

## ॥ अथ षोडशोऽध्यायः ॥16॥

मत्पादसेवाविषये ते सिषाधयिषास्तिचेत्।

वृन्दावने शेषपद्यजातानि वद चोषसि॥1॥

नागाह्वयः पण्डितोऽहं  ब्रह्माण्डेऽशौण्डबुद्धिमान्।

इतरः पण्डितः पण्डः त्वमेवेह सुपण्डितः॥2॥

त्वयानुभूतं येत्स्वप्नमन्निरूपितमेव च।

विद्धि बुद्धिमतां श्रेष्ठ वृद्धं मा त्यज सर्वथा॥3॥

इदं वृन्दावनाख्यानं श्रुत्वा लक्ष्मीपतेर्मुखात्।

निस्संशयो भव त्वं च सर्वेषां हर संशयम्॥4॥

पश्यामि ते सुविश्वासं मत्सुते शश्वदत्र हि।

विश्वासिनां समाजे च त्वमप्येकः प्रसन्नधीः॥5॥

त्वमेव धर्मगोप्ता च गोपीनां पतिरव्ययः।

प्रीतः प्रातः समुत्थाय तमेव हृदि चिन्तय॥6॥

| |
|---|
| मद्वृन्दावनगं गोपैः गोपीभिष्च समन्वितम्।<br>गोभिर्गोविन्दनामानं गोपालं हृदि संस्मर॥7॥ |
| गोपाल निर्मिलतनो धर्मपालं तु पालय।<br>तद्बालं च कृपाशीलं तच्चाञ्चल्यं च चालय॥8॥ |
| इत्यहं प्रार्थयामीह गोपालं बालरूपिणम्।<br>श्रीलोलं कालकाले च धर्मग्लानिर्यथा न हि॥9॥ |
| धीमानाचार्यनाम्ना यो दाम्ना बद्धपुमानिति।<br>धीमानाम्नायामानैर्मे प्रेम्णा नायात्सुमानवः॥10॥ |
| तस्मान्निस्सीम एवाहं मत्स्वामि स्वस्य साम्यद।<br>कः स्वामी कस्य निस्सीम त्वं ददौ भस्मलेपवान्॥11॥ |
| मदाधिक्यत्त्वदाधिक्यं स्पष्टमेव च विठ्ठले।<br>कुवादिनो मदैर्हीनाः सन्ति पश्यन्ति देवताः॥12॥ |
| इत्थमेव हरिर्वित्तः वादिभिः कृत्तमूलकैः।<br>उक्तश्च जगतो नित्यं पृथक्त्वेनैव वर्तते॥13॥ |
| कृत्तमूलत्वमप्येषां कथं त्विति न वित्तभोः(च)।<br>अर्भके गर्भसंस्थेऽपि स्वर्भानुग्रस्तभानुवत्॥14॥ |
| तवार्भको दुर्भगो न शुभानां भूर्भविष्यति।<br>इत्येकं श्लोकमुख्यं मे त्यक्तवानसि विप्रक॥15॥ |

| |
|---|
| आकारस्थं लेखनं च कारय प्राज्ञ्मयेरितम्।<br>अहं मे किङ्करस्यापि विस्मृतेः किं करोमि ते॥16॥ |
| न त्वहङ्कारमानी च शङ्करोऽपि निवारकः।<br>सहजा विस्मृतिः केन परिहर्तुं न शक्यते॥17॥ |
| सहसा परिहर्तुं हि हरेरपि न शक्यते।<br>शश्वद्विस्मृतिशीलस्य कः स्मृतौ विस्मृतिर्भवेत्॥18॥ |
| आमृतिं तव विप्रेन्द्र कामतिं त्यज मां भज।<br>इति पूर्वं मयाप्रोक्तमनुसन्धत्स्व बुद्धिमन्॥19॥ |
| वृद्ध श्रद्धान्वितो नित्यं भज मां भुजगेश्वरम्।<br>मानवा मानिनः सर्वे पापिनः कोपिनः सदा॥20॥ |
| शश्वद्विस्मृतिशीलश्च दुःखशीलश्च दुर्भगः।<br>इदं गालीप्रदानं तु नैव चालिपदस्य ते॥21॥ |
| मत्पादाब्जे सदा चाब्जेभवस्य बलमीदृशम्।<br>अलिं त्वं मम पादाब्जे कथं मे वागलम्भव॥22॥ |
| त्वन्मनः सन्निकृष्टं तु मत्पदं सन्निकर्षते।<br>तस्मान्मत्पादकमलध्यानात्ते निर्मलं मनः॥23॥ |
| मम सालोक्यसिद्ध्यर्थं कुरु शीलवतां वर।<br>पञ्चजन्मसु पञ्चास्यवत्समर्थो भव प्रिय॥24॥ |

| |
|---|
| पञ्चास्यवाक्यसन्दिष्टं पुराणं पञ्चलक्षणम्।<br>कुरु शीघ्रं गुरूक्तिं च न त्यज स्वोचितां कचे॥ 25॥ |
| गृहीत्वा वक्ष्यते पक्षपातेन सुविचक्षण।<br>शिखां गृहीत्वा वक्ष्यामि सखा त्वं मम सर्वधा॥ 26॥ |
| सुखावासान् प्रदास्यामि मखावासादपि प्रिय।<br>इति पूर्वं मयाप्रोक्तमनुसन्धस्त्वबुद्धिमान्॥ 27॥ |
| वृद्ध श्रद्धान्वितो नित्यं भज मां भुजगेश्वरम्।<br>ममाभिप्रायमज्ञात्वा प्रेत दूषयसीह मां॥ 28॥ |
| प्रीतवानस्म्यहं तस्मै प्रोक्तवान्यो गुणान् मम।<br>नैव पृच्छेति पूर्वोक्तिर्नैव मानं तवाबुध॥ 29॥ |
| कनकानि समुद्दिश्य शौनकीं ते मतिं त्यज।<br>पूर्वं तु भट्टाचार्यस्य भ्रष्ठबुद्धेः कदाचन॥ 30॥ |
| नष्टासीद्धृष्टिरेकेव वेदाप्रामाण्यशङ्कया।<br>तद्वत्कमलनाभस्य समलस्य सुदुर्मते॥ 31॥ |
| शमनं चास सन्नेत्रं दमनं यास्यते यमात्।<br>अयं न तम्मणणः प्रेम्णा मद्वाणीं भणते गुणीन्॥ 32॥ |
| काणवत्सरणीं यायान्नाणते पूर्णरूपिणम्।<br>तत्फलं प्राप्स्यते पुत्र सत्फलं नैव पश्यति॥ 33॥ |

| |
|---|
| विप्रफल्गुतरश्चायं विप्रलिप्सुर्न संशयः।<br>अनेकरूपवन्तं मां विनैकतररूपिणम्॥ 34॥ |
| मनाक्स मनुते विद्वन् शौनको भुवि जायते।<br>एवं निः श्रीनिवासोऽयं श्रीनिवासाभिधोऽपि सन्॥ 35॥ |
| निःसीमं मां न मनुते सुश्रीमन्तं कदाचन।<br>नित्यं ब्राह्मणसम्बन्धि सत्यं वाक्यं मयोदितम्॥ 36॥ |
| अत्यन्तभ्रान्तबुद्धिश्च मन्तव्या ते न मत्कृतिः।<br>हे ब्राह्मणाधम गुणाधम भूधनाढ्यं।<br>मन्नन्दनं त्वनुदिनं गुणिनं भजस्व॥ 37॥ |
| वृन्दावने मदनगोपसदायने  मद्वाणीं वदस्व वदनेन ददामि चान्नं।<br>मत्सत्रभोजनं भुङ्क्ष्व पुत्रमित्रकळत्रकैः॥ 38॥ |
| तत्र यात्रां न कृत्वा त्वं यत्र चानादरस्तव।<br>इयं ते दिव्यसद्बुद्धिः क्रुद्धो मा भव वृद्धकः॥ 39॥ |
| श्रद्धाहीनं तु मद्वाणीं न वदस्वाद्य चाधमम्।<br>तवोत्तमसतीसूतकाले चित्रं कृतं मया॥ 40॥ |
| पूर्वोक्त वाक्यसत्यार्थं सा पुत्री पुत्रकः कृतः।<br>अंशेन पुंस्त्वसिद्ध्यर्थमहमेव सहासुभिः॥ 41॥ |
| प्रविष्टः प्रतिरुद्धं तु प्रकृष्टे चाप्यमर्पितः।<br>प्रसूतिकाले वायुश्च पुरःस्थित्वा च कर्षति॥ 42॥ |

| |
|---|
| इति मानान्तरादेव प्राप्तं धर्मं करोम्यहम्।<br>कंसेन बद्धदम्पत्योर्यादवानां पतिर्यथा॥43॥ |
| कंसादिदैत्ययुद्धार्थमाविरासीदहं तथा।<br>पूर्वं तु वरदानेन करदानकराय च॥44॥ |
| स्मरदाश्रयदः सोहं सर्वदा नन्दनेऽर्भके।<br>अर्भके गर्भसंस्थेऽपि स्वर्भानुग्रस्तभानुवत्॥45॥ |
| तवार्भको दुर्भगो न शुभानां भूर्भविष्यती।<br>इति पूर्वं मयाप्रोक्तमनुसन्धत्स्वबुद्धिमन्॥46॥ |
| तत्काले तच्छरीरे तु ह्यहमेव प्रविष्टवान्।<br>पुनर्जीवान्तरस्तस्मिन् मत्स्थाने स्थापितस्त्वहो॥47॥ |
| यः कश्चित्पुण्यजीवस्तु सदा मां तपसा चरन्।<br>ब्राह्मणोऽहम् भविष्यामि स तु संस्थापितः शिशोः॥48॥ |
| तेन सम्पूजितो नित्यं अंशतः संवसाम्यहम्।<br>पूर्वेऽपि मम पादाब्जभक्तो यः शूद्रकेपि सन्॥49॥ |
| सम्पूज्य ब्राह्मणं भक्त्या शूद्रेपि ब्राह्मणो भवे।<br>इति पूर्वं प्रमाणं तु ह्यनुसन्धस्त्व बुद्धिमन्॥50॥ |
| रङ्गनाथस्य दृष्टान्तमपि दत्वा त्वहं सदा।<br>निःसङ्गो नात्र सन्देहः सन्देहो नश्यते शमिन्॥51॥ |

| |
|---|
| संशयात्मा नश्यतीति मानसिद्धमिहोच्यते।<br>श्वानयोनिं स यात्याशु संशयी नात्र संशयः॥ 52॥ |
| कृष्णाचार्यसुतः श्रीनिवासाचार्याभिधोऽपि सन्।<br>निस्सीमं मां न मनुते सुश्रीमन्तमहो विधे॥ 53॥ |
| तत्फलं पश्यते पुत्र सत्फलं नैव पश्यति।<br>स्वप्रसङ्गे सुचतुरोऽप्यभिमानी न चात्र भूत्॥ 54॥ |
| मयापि जीविता भूमावनुभूतं ज्वरादिकम्।<br>भवरोगेण ग्रस्तस्य किन्त्विदं ज्वरपीडनम्॥ 55॥ |
| इदानीमौषधं मा सेवस्व त्वं वृद्धविप्रक।<br>शिष्टान्यत्रगतान्याशु ज्वराणि न जरन्ति ते॥ 56॥ |
| अपमृत्युं छिनत्याशु मम पादोदकं द्विज ।<br>विप्रान्तरमुखेनैतच्छृणु चित्रं त्वकृत्रिमम्॥ 57॥ |
| तव ज्वराणि यास्यन्तु तावत्पर्यन्तमेव च।<br>न वदामि सुदामाग्र्य लेखकोऽप्यत्र नास्ति मे॥ 58॥ |
| अद्यैव सोऽपि शीघ्रं तु आगमिष्यति श्रीपतिः।<br>अथापि तव चारोग्यपर्यन्तं नैव कथ्यते॥ 59॥ |
| गवि प्रसवदुःखेन व्यथितायां स वै वृषः।<br>बाधते तां तदा यागीनमां स्पृशतु लौकिकी॥ 60॥ |

| |
|---|
| प्रत्यक्षसिद्धापलापं प्रकुर्वन्ति प्रजाः कलौ।<br>स्वमातृप्रसवारभ्य प्रनष्टःप्राक्सुदृष्टयः॥61॥ |
| मया परोक्षतश्चोक्तं परलोकस्य वैभवम्।<br>परोक्षज्ञानहीनास्ते परिवादं प्रकुर्वते॥62॥ |
| परेषां च श्रियं श्रुत्वा दह्यमाना इवाग्निना।<br>अशक्तास्तां गतिं गन्तु ततो निन्दां प्रकुर्वते॥63॥ |
| जनाः सुपापिनः सर्वे कलिनाविष्टचेतनाः।<br>मनांसि पापकृत्येषु स्वनाशाय प्रकुर्वते॥64॥ |
| अहं परोक्षतस्चैव वक्ष्ये न ह्यपरोक्षतः।<br>देवाः परोक्षतश्चैव वदन्ते नापरोक्षतः॥65॥ |
| परोक्षे च प्रिया देवाः ह्यपरोक्षप्रिया नराः।<br>उभये च प्रिया दैत्या अप्रिया उभये च ते॥66॥ |
| तस्मात्परोक्षनिर्देशे प्रियास्ते देवतांशकाः।<br>अपरोक्षस्य निर्देशे प्रियास्ते नृशरीरिणः॥67॥ |
| उभयेऽपि प्रिया ये वै दैत्यांशास्ते न संशयः।<br>तस्मान्मद्वचने ये च प्रियवन्तः प्रिया हि मे॥68॥ |
| अप्रिया ये च पापास्ते ह्यप्रियाः सर्वथा मम।<br>तस्मान्मम प्रिया ये वै प्रीतिं कुर्वन्तु मत्कृतौ॥69॥ |
| अप्रियं नैव कुर्वन्तु मत्प्रियास्ते न संशयः॥70॥ |

| |
|---|
| यत्र प्रतीतार्थबाधस्तत्रान्तर्यामिसङ्ग्रहः।<br>कर्तव्य इति पूर्वोक्तमनुस्धत्स्व बुद्धिमन्॥71॥ |
| तस्मादुक्तार्थबाधे सत्यन्तर्यामि हरिः स्वयम्।<br>करोति घटनां तस्य शक्तिं दत्वा च तादृशीम्॥72॥ |
| तस्मान्न कार्या शूकापि शङ्कायाः शुष्कबुद्धिभिः।<br>लोकवार्तापरैः काकबुद्धिभिर्नरकाप्तिभिः॥73॥ |
| इयं शङ्का च सर्वत्र कुतो वा जायते नृणाम्।<br>विप्रस्य वा कृतिरियं मम वेत्यज्ञसंशयात्॥74॥ |
| संशयात्मा नश्यतीति मानसिद्धं विनाशिनः।<br>श्वानयोनिं व्रजत्याशु भुक्त्वाकीनाशयातनाम्॥75॥ |
| तस्मादज्ञानिनो हित्वा ज्ञानिभिः सुयशस्विभिः।<br>सन्मानं मम चामुत्र ध्रियतां मनसि स्फुटम्॥76॥ |
| मन्दशङ्कामदान्धानामेव स्यान्नतु ज्ञानिनाम्।<br>ज्ञानप्रकाशने नष्टाज्ञानान्धतमसश्च ते॥77॥ |
| तस्मात् ज्ञानी सदा पूज्यः पूज्यात्पूज्यतमः स्मृतः।<br>नैवाज्ञानी मानबाह्यः कीनाशवशगः सदा॥78॥ |
| अज्ञानीनां प्रसङ्गोऽयं न कर्तव्यः सुखेप्सुभिः।<br>श्वानेन सदृशं मत्वा पापिनं तं महात्मभिः॥79॥ |

लक्ष्मीपते मम कृतिं च सतां सभासु निःशङ्क एव वद सादरमत्र नित्यं।
त्वं नः प्रिये प्रथमतः प्रथितां च कृत्वा मत्प्रीतिमेव कृतवानसि
वाचकेश॥80॥

यस्य देवा न प्रसन्नाः मुनयश्च तपोधनाः।
गुरुःसर्वार्थदश्चैव स हरिः सागरालयः॥81॥

अस्मद्वृन्दावनं तस्मै भस्मनाच्छादिताग्निवत्।
स्वस्मिन्नन्तर्गतं नैव स्वामिनं स्मारयत्यहो॥82॥

शिलामात्रमयं विष्णोः कलाभिश्च समन्वितम्।
फलानि प्रतिदद्यान्मे मलानि प्रहरिष्यति॥83॥

इति न स्मारयत्येतच्छारदाद्रोहिणश्च मे।
चोरवृत्त्या जीवतो वै नरकाननुगच्छतः॥84॥

अयं तु वासुदेवाख्यः कर्मन्दी मम मन्दिरे।
मन्दाराद्रिनिभे वृन्दावने सम्बूज्य मां सदा॥85॥

भीमं हनुमन्तमनन्तलोकाचार्यं जगद्गुरुम्।
आगन्ता मत्समीपं तु भुक्त्वायुष्यञ्च शेषितम्॥86॥

ममावसाने नाहम तु वसामीत्यतिदुःखितः।
सुवासिनी पतिं यद्वद्वासुदेवाभिधो मुनिः॥87॥

तीर्थयात्रां तु कृत्वा च सार्थीकृत्य कलेवरम्।
मामवेक्ष्येत्याशया तु स चायातः शुचार्दितः॥88॥

| |
|---|
| दैवाद्वृन्दावनस्थस्य मानं कृत्वा स वै मम।<br>भीमादिसार्वभौमानां कामादिभिरतन्द्रितः॥89॥ |
| तेन पुण्येन पुण्यात्मा पुण्यां गतिमवाप्स्यसि।<br>शाणावलीढमाणिक्यवत्सगौणीमवात्यजत्॥90॥ |
| अचिन्त्याद्भुतमाहात्म्यमहं हयमुखं भजे।<br>महिमा तस्य केनेह वर्णितुं शक्यते विना॥91॥ |
| तादृशं हरिमाराध्य सर्वाराध्ये मयि द्विज।<br>करादिस्पर्शने तेन कृते सति च मूर्धनि॥92॥ |
| किमसम्भावितं पूर्वं चोक्तं सम्भावितं ततः।<br>असम्भावनया तस्माद्वैभवं न पराहतम्॥93॥ |
| हेऽपाप पुरुषाः सर्वे मारिषं मां विजानथ।<br>सौरेर्विषार्दिता यूयं पुरुषेण भविष्यथ॥ 94॥ |
| एको वा वक्ति चेत् श्लोकं त्वेकं मत्सम्मतार्थकम्।<br>तर्ह्ययं पुत्र तद्गेहे जलाद्याहरणं चरेत्॥95॥ |
| एकस्मिन्नहनि श्लोकसहस्रं मदनुग्रहात्।<br>वक्तव्ययं वाक्सहायेन ममेह प्रहरामि तत्॥96॥ |
| आहमप्यत्र वक्ष्यामि श्लोकान् यः कश्चनाधम।<br>वदन्निति वदेद्विप्र सदृशस्तु भवेदिह॥97॥ |

| |
|---|
| कृत्रिमश्लोककर्ता यो ह्यसूयासुपरो नरः। मरिष्यत्यमरैः शप्तो निरये स चरिष्यति॥98॥ |
| तस्मात्कुवादो दुर्वादिन् न कर्तव्यस्त्वयाधुना। यदा विधिभलं जीर्णं तदा कर्तव्य एवते॥99॥ |
| तस्मादत्यद्भुतार्थानां श्लोकानां तु प्रवर्तकम्। करोमि शारदासन्निधानं जिह्वागतं त्वहो॥100॥ |
| हे वृद्ध विदुषां मध्ये श्रद्धारहितपूरुषम्। विद्धि तल्लक्षणं वक्ष्ये मुण्डवद्विधवार्दितः॥101॥ |
| विधवादर्शनाद्भीतस्तथैक द्विजदर्शनात्। धवळास्नानमप्यस्मद्बृन्दावनसुदर्शने॥102॥ |
| त्यक्तवान् वित्तलाभार्थं कृत्वा पाण्डित्यमप्यहो। अत्यन्तं मानितो नासीत् कुजनैर्हास्यतां गतः॥103॥ |
| त्रिलक्षगणितं कृत्वा दक्षवन्मत्प्रदक्षिणम्। आशुशुक्षणिवत्पूर्वकर्मकक्षं क्षिणोत्यसौ॥104॥ |
| तत्पाण्डित्यभयादेव हृदि कम्पितवादिनः। दिक्षु धावन्ति ते शुष्कवदनाः कदनं विना॥105॥ |
| राजानो नैव जानन्ति मानं तस्य न चक्रिरे। मम नन्दनपाण्डित्यानन्तरं स तु पण्डितः॥106॥ |

मम नन्दन वैदुष्यं तद्वैदुष्यं तथैव च।
भविष्यत् ज्ञानिनां पोष्यं मया सत्सु न संशयः॥107॥

एतत् सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।
श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥108॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।
मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥109॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्रशीर्षस्य सूक्तस्य पुरुषात्कृतम्॥110॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थ करकमल सञ्जातश्रीमद्वादिराजपूज्यचरणोदित
स्वाप्नवृन्दावनाख्याने अलौकिकविभागे षोडशोऽध्यायः समाप्तः॥16॥

## ॥ अथ सप्तदशोऽध्यायः॥17॥

[अयं विप्रः सुप्रशस्तं मम पादाब्जमुत्तमम्।
पश्यति स्वप्नकाले तु नित्यं निर्मलचेतनः॥1॥

स तेन लब्धातिशयः शेषशायिप्रिये मयि।
मन आवेश्य काश्यां च मृतस्तत्पुण्यमाप्नुयात्॥2॥

तस्माद् विप्रः प्रशस्तोऽयं प्रमृष्टज्ञानवान्मम।
प्रकृत्या यत्प्रदातव्यं तदस्मै सम्प्रदीयताम्॥3॥

| |
|---|
| मयोक्तश्लोकार्थमपि न जानाति ह्ययं द्विजः।<br>अर्थं बुद्ध्वा तु वाक्यं तु करोतीह कवीश्वरः॥4॥ |
| तस्माद्विप्रकृतिर्नैव मत्कृतिः सर्वथा सुत।<br>सत्कृतिश्चास्य कर्तव्या त्वत्कृतिश्चाग्रपङ्क्तिका॥5॥ |
| ममाश्रितमयादत्तमाचार्यत्वं समाप्य च।<br>मम वृन्दावनस्यैव नाम्ना समनुवर्तितम्॥6॥ |
| भोजनायान्नमेवात्र नास्तीति जनता मनाक्।<br>मनुते किंत्वन्नहीनेनाचार्यत्वेन नन्दन॥7॥ |
| नागाख्यपण्डितस्यापि स्वप्ने चोक्तं मया सुत।<br>तेनापि किञ्चिन्न कृतं मृषावाक्यपरोऽभवत्॥8॥ |
| तस्मात्त्वं चान्नमात्रस्य यत्नं कुरु सुमानव।<br>नोचेत्समाधवीं वृत्तिं करिष्यत्येव नान्यथा॥9॥ |
| अहं विप्रस्य सौचित्यं करिष्यामीति मन्मते।<br>सौचित्यं कुरु कल्याण गुरोर्वाक्यस्य गौरवात्॥10॥ |
| हे नन्दन त्वं मम नन्दने वने वृन्दावने कन्द फलाश मन्दिरे।<br>सुनन्द नन्दादिभिरिन्दिरापतिः स्वानन्ददो यद्वदिहाऽभवप्रियः॥11॥ |
| तवेह को वा गणयेद्गुणौघान्विना तु मां नास्ति सुनामधेय।<br>यथा सुरेन्द्रस्य करीन्द्रगस्यगर्वोऽपि सर्वापहरं सुतेह॥12॥ |

औदार्य शस्त्रेण विदार्य विप्रदारिद्र्यवृक्षं करदैरिह त्वम्।
धरासुराद्यैः परमादरेण त्वाराधितः सन् धरणीं वृणीश्व॥13॥

पिता पुत्र स्तुतिं कुर्याद्भर्ता भार्यास्तुतिं गुरुः।
शिष्यस्य संस्तुतिं कुर्यात्स्वामी भृत्यस्तुतिं तथा॥14॥

तदन्तर्यामिणं श्रीमन्नादाय परमार्थतः।
कुर्यात् स्तुतिं न दोषाय न तु देहाभिमानिनः॥15॥

तस्मान्नन्दन ते चान्तर्यामिणः कन्दिना मया।
क्रियते गणवृन्देन मम वृन्दावने यथा॥16॥

मयि जीवति यच्चोक्तं मम वृन्दावनं सुत।
भविष्यति प्रसिद्धं तदनुसन्धत्स्वबुद्धिमन्॥17॥

तत्प्रसिद्ध्यर्थमेवात्र तन्नामापि द्विजस्य तु।
मया दत्तं त्वया तस्मान्निग्राह्या न वदन्ति ये॥18॥]

(इति शेषप्रकरण)

हे विप्राद्याशनं नास्ति पुत्रमित्र कलत्रकैः।
कथं करोषि चान्नार्थं कुरु वृत्तिं च माधवीम्॥19॥

प्रतापत्रयमध्ये तु ह्येकं वाप्यस्मदीयकाः।
न प्रयच्छन्ति सच्छास्त्रवक्रे तव न संशयः॥20॥

अगन्तागन्तुकामस्त्वं घोषपर्यन्तमेव च।
अशक्तः सन् कथं पुत्र पोषणं तु भवेदिह॥21॥

तवान्नसिद्धिपर्यन्तं न वक्ष्ये मानवोत्तम।

मानं तत्याज माधव्या मानो हि महतां धनम्॥22॥

मयोदितं वचः सत्यं तस्य गेहे च पश्य वै।

श्रीपते श्रीमतो वाक्यं शृणु मे गुणभूषण॥23॥

विप्रहस्ते प्रतापोऽपि नास्ति तद्गेहगा अपि।

तण्डुलाश्च न सन्तीति वासुदेवमुनिं वद॥23॥

विप्रहस्ते प्रतापोऽपि नास्ति तद्गेहगा अपि।

तण्डुलाश्च न सन्तीति वासुदेवमुनिं वद॥24॥

श्रीपते श्रीनिवासस्ते प्रसन्नोऽस्तु प्रभुः प्रियः।

ब्राह्मणस्यान्नयत्नं त्वं प्राप्तवान् वै ममान्नदः॥25॥

विप्र त्वं मासपर्यन्तं वासुदेवाभिधं मुनिम्।

स्मरन् भुङ्क्ष्व करं तस्मै दातुं तव न विद्यते॥26॥

मम नन्दनधर्मेण चान्नं त्वं प्राप्तवानसि।

पुण्यं भवेत्तस्य पुत्रकलत्रैः सह भोजनात्॥27॥

तस्यागमनपर्यन्तं तातहीनसुतोपमः।

ब्राह्मणोऽसि सदागण्यं गुणं मां स्मर रक्षकम्॥28॥

तवोदरे वेदनादिर्व्याधिर्निस्सारितो मया।

त्वत्पुत्रीं प्रति तत्रापि मर्दितश्चित्रमेव तत्॥29॥

| |
|---|
| तस्मात्सदानुसन्धानमेवमेवास्तु ते बुध।<br>कदा यास्यति मे पुत्रश्चेति चिन्तां त्यज द्विज॥30॥ |
| संसाराब्धेश्च यन्नेतृ होतृवत्कर्मवारिधेः।<br>क्षेत्रवत्पुत्र पौत्राणां नेत्रं सत् ज्ञानमुच्यते॥31॥ |
| तन्नष्टमासीद्भ्रष्टे च शिष्टवल्लोकवञ्चके।<br>तर्हि भट्टस्य दृष्टान्ते दार्ष्टान्तिकविरुद्धता॥32॥ |
| इति चेन्न च तत्रापि दृष्टिशब्देन सौष्ठवात्।<br>विठ्ठलज्ञानमेवाग्र्यं स्पष्टं ग्राह्यं न संशयः॥33॥ |
| उभयाभिप्रायतश्च नेत्रशब्दार्थ उच्यते।<br>उभयार्थेऽपि वाण्येकविषये वा तथैव च॥34॥ |
| प्रामाण्यं मम वाक्यस्य ग्राह्यं लोके विचक्षणैः।<br>निर्गुणैः पुरुषैः पुरुषवाक्यैर्न श्रुणु दूषणम्॥35॥ |
| अत एव पदं नेत्रं गृहीतं नयनादिकम्।<br>न गृहीतं पदं विद्वन् उभयार्थस्य सङ्ग्रहे॥36॥ |
| तस्मान्न कार्या शङ्का च वञ्चकानां दुरात्मनाम्।<br>शुनकात्ममतस्थानां अतर्क्याणां दुरुक्तिभिः॥37॥ |
| हे तम्मण्ण श्रृणुष्वाद्य भणस्व त्वं गुणाधम।<br>मद्वाणीं श्लोकसुश्रेणीं ब्राह्मणेन च वर्णिताम्॥38॥ |

| |
|---|
| नो चेत्त्वां प्रतियास्यन्ति शीघ्रं तु यमकिङ्कराः।<br>मद्द्रोहकरमाराद्वै शरणं व्रज मां ततः ॥39॥ |
| रदनैर्लोहितश्मश्रुकराळवदनैरपि।<br>दमनैर्भीषयन्तस्त्वां दमनैर्भ्रष्टमानसम्॥40॥ |
| तदा मोचक एवाहं सूचकैरिति दोषिणम्।<br>कीचकादतिदुर्बुद्धिं शोचकं मामकं द्विजम्॥41॥ |
| तस्मान्मदुक्त मर्यादां मात्यज त्वं द्विजाधम।<br>वृन्दावनगतं नित्यं भज मां भुजगेश्वरम्॥42॥ |
| हे भूप भक्त शुभदेऽत्र भवे भवे च |
| भक्तिं कुरु त्वमपि ते च सुसौभगाय।<br>वृन्दावने कदनकोविद चेति पूर्वं |
| केदारकाख्यमपि घोषमिह त्यजस्व॥43॥ |
| एवं चेत्तव चायुष्यवृद्धिर्हि भविता सदा।<br>समृद्धिर्धनधान्यं च गजवाचिनृणामिह॥44॥ |
| तवाग्रजेन दत्तं वै धारापूर्वं द्विजस्य च।<br>द्विजेन मम दत्तं च सम्मत्या तेऽग्रजन्मनः॥45॥ |
| स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालने।<br>परदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥46॥ |

स्वदत्तां परदत्तां वा यो हरेत वसुन्दराम्।
षष्टिवर्षं सहस्राणि विष्ठायां जायते क्रिमिः॥47॥

इतिपूर्वं प्रमाणाभ्यां मद्वाक्यस्य च गौरवात्।
त्यज राजन् सुभीरुः सन् न भारं तव चावनम्॥48॥

भज राज्यं धराभारं हन त्वं कनकं नया।
कोशां कोलाहलेनैव कुरु वृद्धिं समृद्धिमन्॥49॥

वैरिभिः पौरवृद्धांस्त्वं पूजयादत्स्वतैर्जयम्।
भजत्वं द्विज सार्धं च श्लोकद्वयमनुत्तमम् ॥50॥

त्यक्तवानसि तच्छोकच्छेदकोऽहं न संशयः।
तस्मादालस्य हेतोस्तु बहु हातुं त्वमिच्छसि॥51॥

समस्तधर्मरक्षार्थी राघवो राज्यहा परैः।
विप्रक्षेत्रापहारं च मा कुरु त्वं करानपि॥52॥

नादत्स्व तव नाथश्च राज्यं ते रक्षयिष्यति
हे शुण्ठ विप्र तव कण्ठगतं च प्राणं।
शौण्ठामि कुण्ठितगतेरहमेव शीघ्रं
मन्मण्टपं तव हृदन्तिकमञ्च मात्र
मौत्कण्ठ्यतो यदविकुण्ठगतेः प्रियं तत्॥53॥

तस्मात्प्राणं निः सरन्तं वारयामि वरेण्यकम्।
मरणं प्रहराम्येवं शरणं व्रज मां मुनिम्॥54॥

शुण्ठेत्यत्र सुशब्देन शोको ग्राह्यः शुभस्य ते॥ 55॥

ठेति तच्छून्य एवायं कृष्णभट्टाभिधः पुरा।
उच्यते मुच्यते रोगाद्दुःखेन सुचरित्रिणा॥56॥

प्रोच्यते चोत्तरग्रन्थः सौचित्तेन मया ततः।
पुरेति गुरुणैवेह मया दत्तं नरैर्न ते॥57॥

आचार्यत्वं स्थिरं तस्मात् सर्वैरप्यनिवारितम्।
हे सूर्यनामधाराध्य सूर्यवत्सुप्रभान्वित॥58॥

सूर्यवन्मम गूढार्थकृतिं सूरिजनेष्विह।
प्रकाशय विकासान्ते मतयस्ये सकाशतः॥59॥

वराका अपि शोकार्ताः निश्योकाश्च भवन्तु ते।
लक्ष्मीपते वदस्व त्वं भूसुरोत्तम सूरणम्॥60॥

कारणं पुण्यराशीनां वचनं मम जानताम्।
उपेन्द्र भट्ट तां शिष्ठ कामधेनुरिति स्फुटम्॥61॥

सर्वभीष्टानि दातुं मे पद्वीं मत्कृतिकां पठ।
उपेन्द्रनामधेयाद्य कामधेनुरिव प्रिय॥62॥

सर्वाभीप्सित धात्रीं मे वृन्दावनकृतिं वद।
कनकाकृष्ण भट्टोऽपि कनकार्जनतत्परः॥63॥

मनसा तृप्तिहीनःसन् मनाग्दच्छति गच्छति।
हिरण्यभट्ट एवाऽयं हिरण्यार्जन तत्परः॥64॥

| |
|---|
| हिरण्य इव कारुण्यविषयोऽत्र बभूव ह।<br>सरसा भारती या वै तस्या नामधरोऽपि सन्॥ 65॥ |
| विरसोऽपि भवेदत्र नरसिंहो नराधमः।<br>दाम्बलौ पित्तमौली द्वौ हरिनारायणावपि॥ 66॥ |
| ब्राह्मणाचार्य नामापि युक्तं वृन्दावनेन च।<br>न वदन्तौ सुधान्तेषु ग्रन्थेषु कुशलाविव॥ 67॥ |
| मदवन्तौ मदान्धौ तौ मत्कृतौ भक्तिबाह्यकौ।<br>इतः परं जनाः सर्वे चौदासीन्यपरा मयि॥ 68॥ |
| मत्कृतिं न वदन्त्यत्र पश्यन्तः पुत्र तत्फलम्।<br>महापुण्यं गुणाढ्यस्य भवतीह दिने दिने॥ 69॥ |
| लेखनाद्वाचनाल्लक्ष्मीपतिभट्टस्य नन्दन।<br>हे विप्र तव पुत्रस्य चरणाद्रौप्यभूषणम्॥ 70॥ |
| स्त्रीवशं प्राप तद्धस्तादन्तकस्य वशं गतम्।<br>इतःपरं न वक्ष्येऽहं लौकिकं चाप्यलौकिकम्॥ 71॥ |
| मत्तोकागमपर्यन्तं काकबुद्धिजनान् प्रति।<br>एको वदति विप्रस्य कृतिरेवेति सर्वथा॥ 72॥ |
| वरतो गुरुमुख्यस्य तं वरं प्राप्नुयाम्यहम्।<br>पुनरेको वदत्येव लौकिकं ब्राह्मणोदितम्॥ 73॥ |

| |
|---|
| अलौकिकोक्तिमात्रं तु गुरुणैवोदितं हि तत्।<br>अयं तु तम्मण्णो वक्ति बाणवत्प्राणघातकः॥74॥ |
| ब्राह्मणोऽयं स्वकार्पण्यं कुतो वक्तीति निर्गुणः।<br>सर्वे वदन्ति दातारं स्वकार्पण्यं कदाचन॥75॥ |
| नादातारं कुतः श्रेयो हानिं तु पुरुषे वृथा।<br>तस्मान्न निन्द्यं त्वार्षेयं पुरुषैः परुषोक्तिभिः॥76॥ |
| असूयाऽकारिभिः श्रोयोऽहारिभिः पापभीरुभिः |
| हे श्रीपतेत्वं च श्रमान्वितोऽसि |
| श्रीदेवी ते सुप्रसन्नास्तु शश्वत्।<br>सुतो न आयास्यतु तेन सूक्ष्मं |
| वासोऽवश्यं दापयिष्ये सुशिष्य॥77॥ |
| अयं वृद्धः स्तब्द एवातिव्याधिस्तब्धश्चासीन्मुग्धभावोऽपि तेन।<br>हे बुद्धिमन् मत्कृतेः सुप्रसिद्धिस्त्वया जाता विबुधेषु प्रधाना॥ |
| मत्सरव्याद्विप्रदेहे तु मुख्यप्राणः स्थितोऽभवत्।<br>सखा सार्धं मयाप्यत्र सुखावहगतिप्रदः॥79॥ |
| तस्मात्प्राणावधिर्विप्रे त्वेकश्चासीत्सुपुत्रक।<br>द्वितीयावधिपर्यन्तमहं वक्ष्येऽथवा न वा॥80॥ |
| यदि वा नैव वक्ष्यामित्वलम्बुध्या कलौ युगे।<br>तर्हि प्रतिज्ञाहान्यादि दोषो मम न विद्यते॥81॥ |

| |
|---|
| प्रथमावधिमादाय प्रतिज्ञार्थोपपत्तितः।<br>तस्मात्प्रतिज्ञाहानिर्वाप्यन्यं वा मम दूषणम्॥82॥ |
| नास्ति नास्ति न सन्देहो मधुसूदनशासनात्।<br>तस्मान्निर्दोष एवाऽहं यो दूषयति दोषयुक्॥ 83॥ |
| ब्राह्मणस्य कुतो मानस्तदन्तर्यामिणो मम।<br>शृणु लज्जाविहीनस्त्वं कृणु मानं द्विजोत्तमे॥84॥ |
| इदं तत्पुरतः श्लोकं लोकस्य च समक्षतः।<br>भेकवद्वद तच्छ्लोककारणं शतवारतः॥85॥ |
| श्रवणानन्तरं चित्रं सुवर्णं निकषाश्मवत्।<br>निर्णीयते सुयोग्यत्वं चरणीयं रजो भज॥86॥ |
| मद्भूमिं यो वहे द्विद्वन्वपि शीघ्रं तु नश्यति।<br>इत्युवाच यमः श्रीमान् प्रतिमार्ताण्डिरात्मनः॥87॥ |
| तस्माल्लक्ष्मीपते भूमिं याम्यां आदत्स्वसाधिताम्।<br>कदापि कोविदस्त्वं हि मा त्यजस्व बुधोदिताम्॥88॥ |
| मम पुत्रोऽपि मद्वाक्य विश्वासेन महामतिः।<br>मया दत्तेन सन्मानात्समाह्वयति ब्राह्मणम्॥89॥ |
| अयं तु दाम्बलः पित्तमौळिरास्यात्प्रदूलिकः।<br>चन्द्रमौळिर्गले यद्वद्धृदि हालाहलान्वितः॥90॥ |

| |
|---|
| नारायणाह्वयोऽपीह तज्जिह्वा नाह्वयत्यहो।<br>मदुक्ताह्वयमप्यस्मिन्नदह्येतासह्यवादिनी॥91॥ |
| भरण्यामागतोऽसि त्वं धरण्यां सातिनिन्दितः ।<br>स्मरणीयश्च मत्पादो मरणार्तिहरस्तव॥92॥ |
| चिन्तामण्याह्वयाचार्यः चिन्तामणिसमप्रभः।<br>चिन्तामात्रेण तत्वार्थवेत्तारश्छन्दसामपि॥93॥ |
| श्रान्ताश्चाप्यरयस्ते वै भयात्कान्तारमाश्रिताः।<br>अद्यापि मरणे चक्रुरापणं पापकर्मणाम्॥94॥ |
| सर्वोपकरणं तच्चाप्याचरच्च ऋणं विना।<br>एतादृशविनोदेन व्याख्यानादेन चान्विताः॥95॥ |
| तादृशानां नन्दनो नो वृन्दावनकृतिं वदेत्।<br>लक्ष्मीनारायणाह्वऽयमंहोमुग्वचनं मम॥96॥ |
| सिंहवद्वदतु ह्यत्र विनातेन च को महान्।<br>हे कृष्ण तात पुष्णामि भक्तो विष्णोर्मम प्रियः॥97॥ |
| निष्णाता यस्य तृष्णापि संसृतेर्नास्ति चोष्णता।<br>तस्य सीतापते त्वं हि जाड्यता कामतिर्न ते॥98॥ |
| भक्तिर्मे मत्कृतौ चास्ति गोपतेस्त्वत्सुतो यतः।<br>तस्मात्त्वं जीवलोकेऽस्मिन् सञ्जीव शरदां शतम्॥99॥ |

मञ्जीरध्वनि संयुक्तः सञ्जाघटि सुतस्तव।

हे विठ्ठल श्रेष्ठभृत्यः पट्टभद्रस्यमे स्फुटम्॥100॥

स्वेष्टं सुष्ठु करोषि त्वं ब्राह्मणेष्टं न चेष्टसे।

ब्राह्मणोऽयं प्रेत्य जातस्त्वपमृत्युं हराम्यहम्॥101॥

तस्याभीप्सितकृत्यं त्वं कुरु तच्च भवेन्मम।

एवं चेदायुरारोग्यं स्यात्काये तव सर्वदा॥102॥

आये निर्विघ्नता स्यात्ते मायेव स्त्री भविष्यति।

इत्येकं श्लोकमुख्यं मे त्यक्तवानसि विप्रक॥103॥

आकरस्थं लेखनं च कारय प्राञ्मयेरितम्।

शिष्येषु संस्थिताऽशेष गुणान्येव मनीषिणः॥104॥

पोषयन्ति तथा दोषरूपिणं दूषयन्ति च।

तस्माद्गुणिषु वक्तृत्वं गुणानां दोषरूपिणाम्॥105॥

अहं परमहंसोऽपि जनानां राजहंसवत्।

अंहोवेत्ता दुर्जनानां सज्जनानां निरंहताम्॥106॥

क्षीरे च सारमेवाहं नीरे चासारमेव च।

राजहंसो यथा वेत्ति तथा पारमहंस्यगः॥107॥

भो सारासारयोर्मौनीन् वेत्तृत्वं नतु दूषणम्।

प्रत्युतास्य गुणःश्रेष्ठः तद्वन्मम न दूषणम्॥108॥

मम सत्सु च सन्तोषो जायते न त्वसत्सु च।
हंसस्य मानसे यद्वत् न वायससरस्यहो॥109॥

सन्तः स्मत्सु प्रमोदन्ते न त्वसत्सु कदाचन।
असत्सु च त्वसंतश्च प्रमोदन्ते न सत्सु च॥ 110॥

तस्माद्रागो भाग्ययुक्ते दरिद्रे द्वेष एव च।
विद्रावितौ मया मूर्ध्नि तथाते मत्पदे सदा॥111॥

तस्मादरागद्वेषोऽहं विष्णोः पादपरागभाक्॥112॥

एतत्सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।
श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान्धृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥113॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।
मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥114॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।
समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥115॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलक वागीशतीर्थकरकमलसञ्जात श्रीमद्वादिराजपूज्य
चरणोदित स्वाप्नवृन्दावनाख्याने अलौकिकविभागे सप्तदशोऽध्यायः ॥

## ॥अथ अष्टादशोऽध्यायः ॥18॥

इदं सर्वं शर्वगुर्विन्द्र पूर्वै-र्गीर्वाणेन्द्रौर्गर्वराहित्यवद्भिः।

सर्वोत्तमः पर्वणि पार्वतीयैःमौर्व्या दर्व्याराधितस्तत्कृतं मे॥1॥

मौर्वा दर्व्याराधितश्चेत्यस्यार्थं बुद्धि शौर्यताम्।

गुर्व्यामुर्व्यां विनाको वाक् शौर्यवानपि वाचकः॥2॥

विद्वत्सु बुद्धिचातुर्यरहित स्वहितोऽपि यः।

नन्दनस्तु ममानन्दं करिष्यन् व्याहरिष्यति॥3॥

अस्यार्थं पश्यतां स्वस्य विदुषां कस्य वश्यता।

हयग्रीवस्य सास्तीह तस्य सेवासु सत्फलम्॥4॥

तस्माद्वै विदुषां मध्ये विद्वान् मन्नन्दनस्य च।

सदृशो नास्ति सादृश्यं मम वृन्दावने यथा॥5॥

आयातु मम पुत्रोऽसौ कायात्सुपरिणामवान्।

माया तस्य सहाये च त्वायात्वर्थप्रदायिनी॥6॥

नन्दनस्तादृशोऽसौ मे वृन्दावनकृतिं त्विमाम्।

मुकुन्दजनतासेव्यां मन्दानामपि तुष्टिदाम्॥7॥

षोडशाध्यायिकां कृत्वा एद्मानद्विडर्पिताम्।

करोतु जाड्यराहित्यं जनानां गौडदेशिनाम्॥8॥

कर्णाटकजनानां च कर्णश्राव्यं करिष्यति।

अर्णवोत्थमणिर्यद्वदर्णवे शायिनः प्रियाः॥9॥

| |
|---|
| औत्तराणां जनानां तु संसारोत्तारणं भवेत्।<br>उत्तमश्लोकगेहस्य चोत्तमद्वारयापकम्॥10॥ |
| चोलमण्डलदेशीयैर्बालकैरपि नन्दन।<br>काले चाभ्यस्तमेवैतत्पालयिष्यति तानपि॥11॥ |
| नानादेशजनैरेवं नानाविद्याविशारदैः।<br>नानाविधतया व्याख्या नानाशिष्येष्वधिष्ठिता॥12॥ |
| भविष्यति सुषेणाग्र्य मृषा नहि कुरुष्व तत्।<br>षोडशाध्यायि निर्दोषं पोषयस्व ऋषेर्वचः॥13॥ |
| आषाढमास पर्यन्तं षोडशाध्याय मालिका।<br>अस्तु श्रौषडिति प्रोक्त क्रतुकोटिफलप्रदा॥14॥ |
| षोडशाध्यायपाठं तु यः करोति स तुष्टिभाक्।<br>सिष्टः स तु ममेष्टश्च मृष्टान्नं लभते नरः॥15॥ |
| द्वादशाध्यायपाठं वा यः करोति द्विजोत्तमः।<br>सोऽप्यविद्यानपि स्वर्गे त्रिदशैः पूज्यते सदा॥16॥ |
| अष्टाध्यायस्य पाठं तु यः करोति ममेष्टकृत्।<br>स विठ्ठलप्रियैः  सर्वैरभीष्टैः पुष्टिमान् सदा॥17॥ |
| इदं सर्वं  वद वृन्दावनाग्रे मन्नन्दने कन्दमन्दाशनस्य।<br>वृन्दावने प्रीयतामिन्दिरेशो मन्नन्दने चाहमेव द्विजाद्य॥18॥ |

| |
|---|
| इदं तु नान्दीपद्यं मे मन्दानामपि नन्दन।<br>श्रुतमानन्दं नृणां नान्दीकर्मणि नान्यथा॥19॥ |
| इति श्रीत्यादि वाक्यानि मयानुक्तान्यपि प्रिय।<br>प्रत्यध्याये प्रयोक्तव्यानीति संस्मर बुद्धिमन्॥20॥ |
| ब्राह्मण श्रुणु संवादं मुख्यप्राणस्य मे गुणिन्।<br>तन्मतं देहमुत्सृज्य गमिष्यामीति मन्मतम्॥21॥ |
| मामेति माधवेनोक्तो मत्कृतेर्माधवस्तदा।<br>मासि मासि महात्मा सः मातृवत्त्वां न तु त्यजेत्॥22॥ |
| ऊर्ध्वं प्राणं चोन्नमयत्यपानं प्रत्यगस्यति।<br>मध्ये वामनमासीनं विश्वेदेवा उपासते॥23॥ |
| इति पूर्ववदेवायं देहस्ते मत्कृतः कृतिन्।<br>मया जीवित एव त्वं मत्कृतिं स्मर विप्रक॥24॥ |
| कर्तुं चाकर्तुमप्येवमन्यथाकर्तुमेव च।<br>समर्थोऽहं न सन्देहश्चेश्वरस्य सदाज्ञया॥25॥ |
| इति पूर्वं मया प्रोक्त मनुसन्धत्स्व बुद्धिमन्।<br>अन्यथा देहहानिं तु पश्यसि त्वं न संशयः॥26॥ |
| तत्ते मद्दत्तमायुष्यं वृद्ध त्वं जीव तेन च।<br>वृद्ध त्वां जीवयानीह दग्धमौत्तरगर्भगम्॥27॥ |

| |
|---|
| परीक्षितं कुरुक्षेत्रे यथा लक्ष्मीपतिः क्षितौ।<br>क्षणाद्रक्षितवान् पक्षपातेन सुविचक्षणः ॥28॥ |
| मद्दत्तजीवनं यद्वद्दणबन्धनिमोचनम्।<br>भविता मे नन्दनस्य चरणद्वन्द्ववन्दनम्॥29॥ |
| वराभ्यां शिरसाप्यत्र कुरु विप्र सुगौरवात्।<br>वराभ्यां वरसारं तमिहामुत्रार्थदं गुरुम्॥30॥ |
| तस्माद्दणविनिर्मुक्तो मरणेनापि ब्राह्मण।<br>स्मरणं मे चरणयोः पौराणिक सदा कुरु॥31॥ |
| अहं संयमनीं गत्वा दमनायसुपापिनाम्।<br>कमनीयं तु मां तेषां सुमनोभिः समन्वितम्॥32॥ |
| दर्शयित्वा च तत्पापं कर्षयित्वा सुदर्शनैः।<br>परशुच्छेदनं तेषां मर्शयित्वा सुकर्शये॥33॥ |
| एवं संयमनीवासं दमनीयसुपापिनाम्।<br>शमनाय तदा तेषां गमनाय मनस्त्वभूत्॥34॥ |
| यमोऽपि मां तदा प्राह त्वां ये निन्दन्ति मानवाः।<br>तान् नैव मुञ्चामि धीमन् ब्रह्मकल्पक्षयेऽप्यहं॥35॥ |
| वृन्दावन कृतौ चोक्तमहिमा घटते न ते।<br>इति ये कथयन्तीह न मुञ्चाम्याततायिनः॥36॥ |

| |
|---|
| येन वृन्दावनाख्यातिर्जाता चात्र दिने दिने।<br>तस्मै नन्दन धान्यं वा धनं वा किं न दीयते॥37॥ |
| मत्करादागतं वित्तं तस्मै दत्त्वा तु पोषय।<br>तोषयाद्यदिनारभ्य यद्वा पुण्यदिने मम॥38॥ |
| हे विप्र कविवृत्तेन श्लोकेन तु ममाग्रतः।<br>नृत्तङ्कुरु सुवृत्तेन वित्तं तव भविष्यति॥39॥ |
| एवं क्रमेण चाध्यायानागतः कुरु नन्दन।<br>पूर्वस्मिन् वै परिच्छेदे शीघ्रं पञ्चदशैव तु॥ 40॥ |
| पूर्वं दिग्विजयं कृत्वा भीमसेनो यथा मखम्।<br>चकार राजसूयं च कुरुनन्दन एव च॥41॥ |
| तद्वद्दिग्विजयं कृत्वा चाग्रतः  कुरु नन्दन।<br>अध्यायांस्तव तद्वत् स्याद्राजसूयफलम् महत्॥42॥ |
| इत्यभिप्राय तत्वोक्तिं कुरु नन्दन तत्पदं।<br>यत्फलं भीमसेनस्य तद्वैस्यात्तव नान्यथा॥43॥ |
| हयकन्धर सन्नामधर विद्वद्धुरन्धर।<br>कर्मन्दीश्वर मद्वृन्दावनमन्दिरगं हरिम्॥44॥ |
| भज तद्भजकं मां च त्यज दुर्जनसङ्गतिम्।<br>द्विजे सुजनतां पश्य भजते निजसेवया॥45॥ |

| |
|---|
| वृन्दावनकृतौ चोक्तमहिमा घटते न वा।<br>इति ते संशयो माऽस्तु यमोक्तं श्रृणु तत्र च॥46॥ |
| हयकन्धर नामधेय जयविद्वज्जयाङ्कुरु।<br>दुर्वादीभमहासिंह दुस्सिद्धान्तं च दुस्सहम्॥47॥ |
| हे हयग्रीव कर्मन्दिन् तव सुन्दरविग्रहः।<br>मम सन्दर्शनादेव ह्यभूदानन्दविग्रहः॥48॥ |
| अहं जानामि ते नाम मम नाथस्य मानितम्।<br>तेन मन्नन्दनादीनां मान्यस्त्वं नात्र संशयः॥49॥ |
| मम वृन्दावनाख्यानं तव सुन्दरकर्णतः।<br>मन्नन्दनवदेव त्वं नन्दयन् मां श्रुणुष्व तत्॥50॥ |
| तेन ते भविता श्रेयः के न यास्यान्त्युपस्थितम्।<br>हे पयःफेनवच्छुभ्रकीर्तिमन् मे मनःप्रिय॥51॥ |
| विप्रोऽयं त्वत्करे दत्तो मया पुत्र इव प्रियः।<br>तच्छिश्यो क्षीरपानार्थं गां तु दापय भूपतेः॥52॥ |
| स्वस्य पुत्रोऽपि नास्त्यत्र कस्य वक्ष्ये रुजं द्विजे।<br>पश्य विप्रोऽद्यान्नशून्यो नश्यते चास्मदाश्रयी॥53॥ |
| मत्पुत्रागमपर्यन्तं त्वत्पुत्रोऽयं न संशयः।<br>तत्पुत्रक्षीरपानार्थं सत्प्रभो गां प्रदापय॥54॥ |

| |
|---|
| एवं चेत्तव चायुष्यवृद्धिर्हि भविता सदा।<br>कविता विप्रके नास्ति सविता वेत्ति सर्वदा॥55॥ |
| नारसिंह नरश्रेष्ठ यथा सरसभारती।<br>तवजिह्वाग्रगा तद्वत् वृन्दावन कृतिर्भवेत्॥56॥ |
| नारसिंह नरश्रेष्ठ नरके रविनन्दन।<br>आह यद्वचनं चाग्रे हयग्रीवमुनिं वद॥57॥ |
| भूपोऽस्मद्धनमादाय पाप्मानं पोषयत्यहो।<br>दोषोऽपि मम  नास्त्येव शेषशायिपदे शपे॥58॥ |
| शेषाद्रिपण्डितः पापशेषात्स्वस्य सुचक्षुषः।<br>शोषकस्त्वयमेवासीत्त्वेद्रोहाच्च विशेषतः॥59॥ |
| यथा च द्रुपद द्रोणद्रोहतः समुपद्रुतः।<br>सुभद्रापतिना दृप्तस्तद्रथोपरि मर्दितः॥60॥ |
| तच्छिष्यैरेव पाञ्चालः शोषितस्तृषितो यथा।<br>तद्वत् त्वच्छिष्यतश्चायं शेषाद्रिः शेषितस्त्विह॥61॥ |
| तस्मात्त्वमेव तं पापं मोचयाद्य सुशोच्यताम्।<br>गतः कुचोद्यकृद्भिश्च ह्यनाथं च समुद्धर॥62॥ |
| अहं जानामि ते मानिन् तेन जातमनादरम्।<br>सुना समानतां प्राप्तः कुमानवगतिं मनाक्॥63॥ |

ब्रह्मधिक्करणात्ते वै निम्नं दुःखमवाप्तवान्।

द्युम्न धृष्टो यथा द्रोणविरोधामृतिदुःखभाक्॥64॥

व्यत्यस्तनामतस्तस्मिन् मतिव्यत्यास एव च।

गृहीतस्तद्वदेतस्मिन् व्यत्यस्तमतिरप्यभूत्॥65॥

तथा हि लोके मर्त्यानां कलिनाविष्टचेतसाम्।

विनाशकाले सम्प्राप्ते तन्मतिश्चालिता भवेत्॥66॥

तस्मात्तत्कलिना सर्वं कृतमन्तर्निवासिना।

स्वाज्ञानादिति मत्वा च ह्यनाथं तं समुद्धर॥67॥

हयास्यनामधेयिनो प्रकाश्यमेव मे प्रियम्।

वृथास्य नोच्यते वचः कृपास्य जायते तव॥68॥

अतो मयोदितं हि यत्सुतोदितं यथा तथा।

वृथा न जायते कृतिन् भवत्यवश्यमेव तत्॥69॥

सुतोऽपि मे प्रवक्ष्यते तवानुमत्यनुव्रतः।

इहागतः श्रुतं ममेह सन्मतं कुरुष्व तत्॥70॥

इत्थं मयोक्तमेवैतत् न विप्रोक्तं कदाचन।

कथं ते भविता चित्ते विप्रोक्तिर्मम वा कृतिः॥71॥

संशयं वद विद्वंस्ते मदवज्ञानतो भवेत्।

सदवज्ञा महत्पापं त्रिदिवात्पातयत्यधः॥72॥

| |
|---|
| स्वैरं गुरूक्तं कुरु मारदूर धीरत्वरन् पौरजन प्रियार्थम्।<br>स्मरन् मुरारेः परमार्थसारं न तत्कृतं संस्मर सज्जनाग्र्य॥73॥ |
| हे मौद्गल नारसिंह तव सन्ततसेवया।<br>माभूत्कलत्रपुत्राणां हरिष्ये म्लेञ्छबन्धनम्॥74॥ |
| मुग्देति सम्बोध्य मया दुग्धवारिधिरीरितः।<br>दग्धजिह्वदेवत्वं स्तब्धवृद्धेति भाषसे॥75॥ |
| किं करोमि तवाज्ञाद्याहं करोम्यज्ञतान्तकः।<br>अहङ्कारेण हीनं त्वां यं करेणाभिमर्शये॥76॥ |
| मत्करस्पर्शनं विप्र त्वच्छिरस्यतिसत्कृतम्।<br>तत्कृच्छ्रं हरते नित्यं यत्कृतं त्वज्ञतार्पकम्॥77॥ |
| द्वे सहस्त्रे च पद्यानां खद्योतोपम तेजसाम्।<br>देहिनां बोधनोद्दामसाधनं तु भविष्यति॥78॥ |
| तावत्पर्यन्तमेवाहं वक्ष्ये पक्षीकृतद्विजात्।<br>यावत्पद्यसहस्त्रे द्वे पूर्णे सुत भविष्यतः॥ 79॥ |
| तदनन्तरमेवाहं यथा मन्वन्तरे तथा।<br>अनन्तशयनं दृष्ट्वाह्यनन्तं सुखमाप्नुयाम्॥80॥ |
| तत ऊर्ध्वं प्रवक्ष्यामि न वक्ष्याम्यथ वा क्षणम्।<br>न शिक्षयामि प्रेक्ष्यावत्प्रवृत्तिं लक्षयाम्यहम्॥81॥ |

हयकन्धरकर्मन्दिन् जगकन्धरभे दिने।

नतकन्धर पद्मानां शतकन्धर ब्राह्मणे॥82॥

स्नेहं कुरु मम स्नेहपात्रे शास्त्रज्ञ सज्जने।

मत्सुतोऽप्यतिसुस्नेहं करोति पुरुषोत्तमः॥83॥

विप्रोऽयं कृत्रिमो भृत्यो मम नैव सुमानवः।

पुत्रवत्पोष्य एवाऽसौ मा त्यज त्वं द्विजोत्तम॥84॥

मत्पुत्रेण विना विप्र तत्र तत्र कृतं महत्।

न शोभते शुभं कर्म दैवं भूदैवतं च वा॥85॥

मन्नन्दनेन कर्मन्दीश्वरेणाद्य विना कृते।

कर्मण्यानन्दरूपेऽपि ममानन्दोन जायते॥86॥

शून्यागारवदेवेदं नगरं शून्यमेव च।

तं विना नगरं यद्वत् दिवा दिनकरेण वा॥87॥

तदागमनसिद्ध्यर्थं मन्मनो रथसारथिम्।

प्रेषयामि तमाहर्तुं शीघ्रगामिनमध्वनि॥88॥

सोऽपि गत्वा तु गोविन्द सङ्कल्परथमेव च।

आरोप्य भूप प्रभृतिभृत्यवागश्वसंयुतम्॥89॥

आनयिष्यति मानार्हं कृष्णं दानपतिर्यथा।

मधुरां सोदरयुतं तद्वत्सोदापुरीं सुत॥90॥

| |
|---|
| द्वारकावासिनं कृष्णं मधुरापुरवासिनः।<br>सदाराः पूजयन्ति स्म सुदामोदारमुक्तिदम्॥91॥ |
| तद्वन्मन्नन्दनमपि  नन्दनैः सहिता नराः।<br>निन्दन्तश्चात्मपापानि सानन्दं पूजयन्त्यहो॥92॥ |
| सोदापुरे वसन्तो ये सदाराः प्रत्युपस्थिताः।<br>उदारगुणसम्पन्नाः सदा रयिविवर्धकाः॥93॥ |
| इत्थं मम सुतेऽप्यत्र चागते स्वागतोक्तिभिः।<br>पूजयिष्यन्ति सन्तस्ते तान् दृष्ट्वा तोषितोऽस्म्यहम्॥94॥ |
| एवं सङ्कल्प सिद्धं मां कल्पयन्ति मनीषिणः।<br>स्वल्पापराधोऽपि मम महापापाय कल्प्यते॥95॥ |
| तस्मात् मन्नन्दनं मां च नैव द्रुह्यथ मामकाः॥ |
| दामोदरप्रियं मत्वा कामतिं त्यजथाशु च॥96॥ |
| तस्थिवांसीति मे प्रोक्ते तस्थुषांसीति चोच्यते।<br>विप्र स्वस्थांश्चतेऽस्थीन् वै करिष्ये शिथिलानहम्॥97॥ |
| ममास्थिनिचये विप्र क्लीबशब्दः प्रयोजितः।<br>तवास्थिष्विह पुल्लिङ्गशब्दः प्रायः प्रयोजितः॥98॥ |
| कोवाऽभिप्राय इत्युक्ते वक्ष्येऽभिप्रायमञ्जसा।<br>ममास्थीन्यपि कृष्णस्य शङ्खचक्राङ्कितानि च॥99॥ |

पुनः संसृतिदातृत्वशक्तिहीनानि मानव।

जातान्यत्यन्तशैथिल्यात् क्लीबशब्दः प्रयोजितः॥100॥

एतस्य वैपरीत्येन तवास्थिनिचयेऽपि च।

पुनः संसृतिदातृत्वसामर्थ्यात् पुंस्त्वमेव हि॥101॥

अतः पुल्लिङ्ग शब्दस्तु प्रायो विप्र प्रयोजितः।

यद्वा शब्दद्वयेनापि वाच्यत्वं तूच्यते मया॥102॥

नैघण्टिक श्रृणुष्वाद्य विद्वत्कण्ठीरवेण च।

अतोऽज्ञतापि नास्त्येव मम मानव धीमतः॥103॥

कामतिं त्यज ते विद्वन् भज मत्पादमेव च॥104॥

एतत्सर्वं स्वाप्नपद्येन गर्वं

हित्वा सर्वे विप्रवर्यास्त्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान्

दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥105॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥106॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥107॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्त्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थ करकमल सञ्जात श्रीमद्वादिराजपूज्य चरणोदित श्रीमत्स्वाप्नवृन्दावनाख्याने द्वितीय प्रमाणावधौ प्रथमाध्यायात्मकः अष्टादशोऽध्यायः समाप्तः॥18॥

## ॥ एकोनविंशोऽध्यायः ॥19 ॥

हे ब्राह्मण त्वं श्रुणु मे सुवाणीं कार्पण्यभावं न भणाद्य धीमन्।
गुणैर्विहीनस्य गणाद्धि चान्नं गृहाण सद्ब्राह्म सद्गृहस्थैः॥1॥

भोज्यवित्तं प्रदत्त्वा तु ऋणान्मुक्तः शनैः शनैः।
भोजनार्थं मधुकरवृत्तिं कुरु यथा पुरा॥2॥

इति पूर्वं मया प्रोक्तं अनुसन्धस्त्व बुद्धिमन्।
वृन्दावने च मत्सेवां मा त्यज त्वं द्विजोत्तम॥3॥

लज्जाविहीन कुब्जायाः पतेर्नाम्नः प्रभञ्जन।
त्वज्जातिधर्ममनृतं मा त्यजाद्यापि दुर्जन॥4॥

वृन्दावनाचार्य नाम्ना त्वं निन्दावचनादिना।
तथा लक्ष्मीपतिर्नापि कवितां वेत्ति सर्वथा॥5॥

सविता चेत्ति तत्सर्वं कर्मसाक्षी तवाप्यहो।
मम मातुःकृते श्राद्धे भोक्तात्वं गर्भिणीपतिः॥6॥

वैपरीत्येनोभयतः श्रीवत्सं धृतवानसि।
अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति॥7॥

पुण्यक्षेत्रे कृतं पापं कृष्णक्षेत्रे विनश्यति।
कृष्णक्षेत्रे कृतं पापं वज्रलेपो भविष्यति॥8॥

| |
|---|
| तादृशो कृष्णगेहे त्वं मृषा वचनमब्रवीः । <br> इत्याद्याः बहवो दोषास्त्वयि सन्ति कृतान्तकः ॥9॥ |
| अत एव हि सन्तानरहितोऽसि कुलान्तक। <br> काकोदरेत्यादिश्लोकत्रयेणोक्तान् सुदुर्गुणान्॥10॥ |
| गुणाधम शृणुश्चाद्य तूष्णीं तिष्ठ ममाग्रतः। <br> इदमाप्यनृतश्चोक्तं कुमतिर्नतु तेऽप्यहो॥11॥ |
| सुमति स्वमते नास्ति सुमतं मम जानते। <br> तासां स्त्रीणां यथायोग्यं फलं भवति ब्राह्मण॥12॥ |
| रथरोधन कर्तृणां पूर्वकर्मानुरोधनात्। <br> प्रत्येकं फलवक्तृत्वे तत्तत्कर्माख्य शैवलैः॥13॥ |
| स्त्रीनीराणि परिच्छिन्नानीति तद्वानि नैवहि। <br> अतः सामान्यतो योग्यं फलं भवति नान्यथा॥14॥ |
| कामान्यथा विना पुत्रं  स्त्रीणां श्रीमान् यथा श्रिया। <br> ममैवं दैविकं ग्रन्थं हृदयग्रन्थिसंयुताः॥15॥ |
| ये न गृह्णन्ति तान् सर्वान् गृह्णन्ति यमकिङ्कराः। <br> ममाख्यान प्रवक्तारं यमाज्ञया गता भटाः॥16॥ |
| ते मया वारिताः सर्वे कोवा मत्सदृशो यतिः। <br> हे वृन्दावगः स्वामिन् ममानन्दं कुरु प्रभो॥17॥ |

| |
|---|
| अन्नं ददस्व विप्रस्य मन्नन्दनमुखेन च।<br>नोचेत्तव करं विप्रे वितरार्यं हरे गुरोः ॥18॥ |
| शरणागत संसरणं मरणार्तिं हर प्रिय।<br>एकवाक्यप्रतिष्ठापनाचार्याद्य त्वयोदितम्॥19॥ |
| गां दापयामीति भूपात्समं कुरु यथेष्टतः।<br>त्रिवाचापि मया प्रोक्तं तव बुद्धिर्यथा तथा॥20॥ |
| कुरु विप्रस्य वचनं न मृषेति विचिन्तय।<br>अनृतं तु प्रवक्तारो वैराग्यरहिताश्च ये॥21॥ |
| चरणं तच्छिरसि ते कुरु तामरसोपमम्।<br>श्रेयांसि तव दास्यामि हयास्याराधनं कुरु॥22॥ |
| आशां ते यान्ति पापानि स्वाशां त्यक्त्वा त्वयि प्रिय।<br>समागतोऽसि श्रीपते त्वमागतः सरोवरम्॥23॥ |
| सुमानसं यतीश्वरं प्रमां वदाशु मत्कृतेः।<br>हयास्यनामदेयिनो मयास्य चोदितो मनुः॥24॥ |
| कुहास्यवर्जितो मुनिः सुहासमिश्रिताननः।<br>मानसं राजहंसीव मत्सरोवरमागतम्॥25॥ |
| मत्कथा क्षीरपानं तु मामकं तं प्रकाशय।<br>हे हयग्रीव कर्मन्दिन् मन्दाराद्रिनिभं मम॥26॥ |

| |
|---|
| वृन्दावनं पश्य सान्द्रानन्दयुक्तो भवाशु च।<br>मत्सरोवरमायासी राजहंसीव मानसम्॥27॥ |
| मत्कथाक्षीरपानं त्वं स्नानं कृत्वा कुरु प्रिय।<br>हंसो यथा क्षीरपानं कुरुते नीरकं विना॥28॥ |
| तद्वद्दंहोनामनीररहितं मत्कथामृतम्।<br>पिब पापहरं कोपरहितश्चेत्सुपावनम्॥29॥ |
| तपसा पापपूगं त्वमपाकुरु पुरो मम।<br>नन्दनायं मन्दबुद्धिः कन्दाशनकृतिं पराम्॥30॥ |
| वृन्दावने सान्द्रभक्त्याह्यधरः स्यन्दनादिना।<br>दिने दिने वदत्येवं कदनेन विना जनैः॥31॥ |
| मदनेनापिहीनोऽयं सदनं तस्य दापय।<br>त्वत्करेचार्पितोऽयं तु मत्करं तस्य दापय॥32॥ |
| सत्कारं कुरु विप्रे च मत्कृतिं प्रार्पकेऽत्रच।<br>कृष्णाचार्यसुतश्चायं निष्णातो हरिपादयोः॥33॥ |
| पुष्णाति वेदशास्त्राणि तृष्णाथापि गता नहि।<br>सोऽत्यन्तं तृष्णया युक्तः कृष्णसङ्कल्पतः सुत॥34॥ |
| वैष्णवब्राह्मणांश्चोष्णाकरवत्परितापितान्।<br>कुरुते निष्ठुरवचः किरणैः स्मरणं विना॥35॥ |

| |
|---|
| ब्रह्मधिक्करणं चास्य मरणार्तिसमं भवेत्।<br>अयं ग्रामो बहुलब्राह्मणेभ्यो नाम्ना सम्पेसरुरित्थं प्रदत्तः।<br>राज्ञा दत्तः शेषहस्ते स शेषस्तदाज्ञया दत्तवान् विप्रहस्ते॥36॥ |
| यस्मिन्न दत्तं दानमानन्त्यमेव ददाति पुण्यस्य च किञ्चनापि।<br>तस्मिन् दिने श्रवणद्वादशीति शसानस्थं प्रददौ द्विजेभ्यः॥37॥ |
| वामनेनेक्षितुं ग्रामं शासनस्थं मुनीश्वर॥38॥ |
| न प्रयच्छन्ति विप्रेभ्यो राजानः  के वदस्व तान्।<br>हाहा कोपीह राजानं त्यज ग्रामं द्विजातिनाम्॥39॥ |
| इति पुण्योक्ति मुत्त्वातु ब्राह्मणार्थं न जीवति।<br>ये जीवन्तीति विप्रार्थं ते जीवन्त्येव नेतर॥40॥ |
| स्वार्थं जीवन्ति कान्तारे किराताः किं न निर्दयाः।<br>तस्मात्त्यजेति राजानं द्विजाग्रामं तु सज्जन॥41॥ |
| त्यज जीवसमाजे त्वं भज सत्पुण्यसञ्चयम्।<br>वाङ्मात्रेण च तत्पुण्यराशिं पश्य गुणार्णव॥42॥ |
| त्वं मेरुणा समं पुण्यमाददत्स्वकृणुष्व तत्।<br>श्रीपतेः श्रीनिवासोऽयं वृथा गालीं प्रदत्तवान्॥43॥ |
| तां श्रुत्वा यतयोऽपीह मूकीभूता अहो विधे।<br>कालीय स्वविषज्वालाज्वलितं यमुनाजलम्॥44॥ |

| |
|---|
| चकार निर्मलं काले गोपालेनैव चालितः। <br> तद्वद्गोपालकष्णेन मद्बृन्दावनगेन च॥ 45॥ |
| सद्वन्दनादिभिः शून्यं वन्दनं भुवि निन्दितम्। <br> तस्मिन् ब्रह्मन् ब्रह्मनिन्दादोषेण ब्रह्मराक्षसः॥ 46॥ |
| बह्वीः समा महावह्निसन्तप्त इव तप्यते। <br> बह्वीः समा इति श्रुत्या चांहो नाशं करिष्यति॥ 47॥ |
| असह्यमपि यच्छ्रीनिवासो गह्वरमध्यगः। <br> तत्कृत ब्रह्मनिन्दायाः मद्बृन्दावन सन्निधौ॥ 48॥ |
| कन्दाशनेन्द्रमनसो दन्दशूकं प्रधारिणः। <br> अर्पितं शल्यमासीत्सन्तर्पितं रक्त पानतः॥ 49॥ |
| न्यत्कृता सा च विद्वद्भिः धिक्कृतः सोऽपि निन्दकः। <br> ब्रह्महिंसासमं पापं ब्रह्मधिक्करणे ऋणिन्॥ 50॥ |
| मरणार्तिसमं नृणां करणं तस्यमानव। <br> कृतिश्च ब्राह्मणस्येयमिति चिन्तामणेः सुत॥ 51॥ |
| प्रमाणं कुरु मद्बृन्दावनाग्रे त्वं प्रणश्यसे। <br> सप्तमेऽह्नि न सन्दोहो नैवाबद्धं वदाबुध॥ 52॥ |
| यद्वा करिष्यते विप्र त्वं पश्याद्यैव तज्जयम्। <br> तस्मात्कृत्वा पणं चोभौ प्रमाणं कुरुतो द्विज॥ 53॥ |

| |
|---|
| चिन्तामणिसुतश्चायं ब्राह्मणोऽयं ममाश्रितः।<br>जयायापजयायापि पापबुद्धिं त्यज द्विज॥ 54॥ |
| मम कोपो भवेत्तापो भविता ते सुपापिनः।<br>करोम्यहं प्रमाणं चेत्युक्तिमात्रेण काण भोः॥ 55॥ |
| प्रमाणकरणे नृणां यत्पापं तद्भवेत्तव।<br>चिन्तामणिसुतासह्य लक्ष्मीनारायणाह्वय॥ 56॥ |
| ब्राह्मणस्य कृतिश्चेयमिति ते नन्दनं स्पृश।<br>अलौकिकं मया प्रोक्तं लौकिकं विप्रवाक्कृतम्॥ 57॥ |
| इति संस्पृश मत्मादं दह्यसे मम तेजसा।<br>लक्ष्मीनारायण श्रीमान् ब्राह्मणो वा करिष्यति॥ 58॥ |
| गृहाण वृन्दावनाग्रे प्रमाणं प्राणघातक।<br>यद्वा मद्वृन्दावनाग्रे कुरु सद्वन्दनायुतम्॥ 59॥ |
| सकृद्वा तद्वचः प्रायश्चित्तं कर्तुं द्विजाधम।<br>नमस्कारः प्रतीकारः संरम्भेऽम्बरचारिणाम्॥ 60॥ |
| स्वकुमारापराधोपि पिताऽनुस्मरते नु किम्।<br>अलमलं सुकृतवान् कलौ युगे कलिमलेन कलुषे यमालये॥ 61॥ |
| हलहलेन मिलिते च पालया- प्यतुल दोषफलदे मलीमसाम्।<br>मलिमसामागसानि सुधासागरशायिनः॥ 62॥ |

| |
|---|
| सुधायनसहायेन देहागारनिवासिनः।<br>न प्रियो यद्वदेतानि चाप्रियाण्येव सर्वदा॥63॥ |
| तद्वदेव प्रियं मत्वा मा कुरु त्वं सुतोत्तम।<br>ममागसं वृथा चात्र मदुक्तिर्नैव ते भवेत्॥64॥ |
| कृतोत्तर हठे यद्वच्छठानामेव तत्प्रियम्।<br>मन्मठास्याभिमानं तु नास्ति तत्कठिणात्मनाम्॥65॥ |
| मलीमसामसाधूक्तिः सुधासागरशायिनः।<br>सदाप्रिय बुधाग्र्यस्य ममापीह बलीयसः॥66॥ |
| इति मत्व सतां वृत्तिमङ्गीकुरु सुमङ्गल।<br>रङ्गनाथस्यान्तरङ्गमिदं तव निरूप्यते॥67॥ |
| मलिमसां तु दानानि बुधान्तर्यामिणः प्रभोः।<br>नारायणस्य  सर्वत्र चाप्रियाण्येव सर्वदा॥68॥ |
| ब्राह्मणस्य कृतिश्चेयं नैव नैव मयोच्यते।<br>दैव दैवो हयग्रीवो वेत्ति सर्वं हृदन्तरम्॥69॥ |
| ये त्वविश्वासिनः सर्वे मलीमस इति स्मृते।<br>तस्माद्भूता भविष्यन्ते भस्मीभूता भविष्यते॥70॥ |
| यमेनैव ममाज्ञया मुच्यन्ते नरकाग्निभिः।<br>मुच्यन्ते नरकानेव पच्यन्ते नरकाग्निना॥71॥ |

| |
|---|
| उच्यन्ते मुनिभिर्बोध्यास्ते च्यवन्ते ह्यधोमुखाः।<br>सूच्यन्तेर्नखनेत्राश्च शोच्यन्ते यमकिङ्करैः॥72॥ |
| सिच्यन्ते तप्तसीसाद्भिः स्वच्छं तेषां सुखं नहि।<br>इत्यविश्वासिनः सर्वे निर्वाणाः सर्वमेव च॥73॥ |
| पर्वण्य पार्वणाः प्रेत्य वर्षाणां कर्षणान्विताः।<br>एवं कलङ्किनः सर्वे ह्यलं कीनाशलोकिताम्॥74॥ |
| यान्ति कान्तिविहीनास्ते पापिनः शापिनो मम।<br>निष्कलङ्काश्च सर्वेऽपि निश्कलङ्कादराः हरौ॥75॥ |
| निखिलान् कामितान् यान्ति निखिलागमनिर्णयैः।<br>कुर्यां प्रमाणमित्युक्त्या लक्ष्मीनारायणात्र ते॥76॥ |
| मन्मनो बाणविद्धं यद्यथा स्यात्तद्गुणाधम।<br>कुर्यां प्रमाणमित्युक्त्या लक्ष्मीनारायणात्र ते॥77॥ |
| वर्णानां ब्राह्मणादीनां सांशायिकमतिर्भवेत्।<br>एवं च मम माहात्म्यस्य विषये संशये सति॥78॥ |
| निःसंशयः कोऽपि मद्वृन्दावनं न तु पश्यति।<br>तद्दोषोऽपि तवैव स्यात् शेषशायिपदे शपे॥79॥ |
| माषमात्रं च मद्द्रोहो महादोषाय कल्पते।<br>तस्मादेतादृशी बुद्धिः न स्यात्ते सर्वथा द्विज॥80॥ |

क्षुद्राः मद्द्रोहमापन्ना भज मां भुजगेश्वरम्।
लक्ष्मीनारायण इति नराणां यो गुणाधमः॥81॥

मद्द्रोहेण ब्राह्मणोऽपि विषण्ण हृदयोह्यभूत्।
लक्ष्मीपतिं समुद्दिश्य लक्ष्मीपतिगृहेह्यसौ॥82॥

लक्ष्मीनारायणाह्वोऽपि ह्यलक्ष्मीकं वचोऽब्रवीत्।
महाजने भोजनेऽस्मि न् लक्ष्मीकर महोत्सवे॥83॥

हे मञ्जुकञ्जपत्राक्ष त्वं वा शिक्ष द्विजाधमम्।
पापिनां तु गतिं चास्य दत्वा वै मधुसूदन॥84॥

विश्वासिनि ह्यविश्वासं जनयिष्यति नन्दने।
हे पुत्र क्षिपणासक्तो लक्ष्मीनारायणो मम॥85॥

कृतेस्तच्छिक्षणं चात्र त्वं वा कुरु विचक्षण।
मया तपोहानिभिया शापास्तस्य न दीयते॥86॥

त्वया तच्छिक्षणं कार्यं क्व यास्ये तद्भयादहम्।
हित्वा वृन्दावनं चात्रालङ्कृतं मम नन्दन॥87॥

कन्दाशनैः कृतानन्दैर्मुकुन्देनापि तद्वद।
यावद्वृन्दावनं चात्र मेदिन्यां मम नन्दन॥88॥

तावन्मत्सन्निधानं स्याद्धरण्यां धरणीसुर।
तस्माद्वै दुर्जनैरुक्तनिन्दा कन्दाशनोऽप्यहम्॥89॥

न क्षमे नन्दनानन्दनासिनां मम नान्यथा।

अहं द्युमणिवद्भानुमन्तं सद्गुणसन्ततम्॥90॥

ब्रह्मात्मकौस्तुभमणिं मतं नौम्यगुणान्तकम्।

प्रमाणं करवाणीति दुःखार्णवहरं हरिम्॥91

महामणिधरं नौमि लक्ष्मीनारायणं प्रभुम्।

तालोल्लल्लेति चाश्लीलभाषामालां चकार ह॥92॥

कोलाहलसमूहैश्च मम हृच्छल्यमालिकाम्।

चकार कारणाभावेऽप्याकारेण वृकोदरः॥93॥

बुद्ध्या दर्वीकरश्चायं वादे काकोदराधिपः।

क्षमतेऽथापि मे स्वामी क्षमया सोऽर्णवो हरिः॥94॥

क्षमां पद्म्यां चकारेह क्षमयाकिं न साध्यते।

क्षमया भीमसेनोऽपि काम्यकं वनमाविशत्॥95॥

क्षमया सोमकसुता क्षमया यमपुत्रकः।

क्षमया मघवत्सूनुः क्षमया यमजावुभौ॥96॥

रामोऽपि राजीवनेत्रो रावणान्तकरो हरिः।

राज्ञोराज्ञां पुरस्कृत्य राज्ञां वनमथाविशत्॥97॥

क्षमया क्षेमको राजा क्षमायाः  पालने क्षमः।

बभूव नाक्षमः कोऽपि क्षमायाः पालने क्षमः॥98॥

| |
|---|
| एवं क्षमासमायुक्तो मुनयो मनवोऽपि ये।<br>मनने च समर्थास्ते माधवस्य महात्मनः॥99॥ |
| तद्वत्क्षमा परश्चाहं रमापत्याश्रयोऽपि सन्।<br>कुमारत्वमपि ह्यत्र क्षमावान् भव सर्वथा॥100॥ |
| तादृश क्षमयाहीनः श्रीनिवासाभिधोऽपि सन्।<br>मानं न याति तेनासौ मानवैः कामितं त्विह॥101॥ |
| अधुना विधिना सृष्टा मधुना दुष्टबुद्धिना।<br>अधना निधनाधिष्ठास्त्वष्टधा मधुसूदन॥102॥ |
| धावन्ते तद्वदेवायं द्विजवर्यो द्विजाधम।<br>सद्दशैर्दितिजेन्द्रस्य बाध्यते बाध्यबुद्धिमन् ॥103॥ |
| एतत्सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥104॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥105॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥106॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥ |

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराजपूज्य चरणोदित श्रीमत्स्वाप्नवृन्दावनाख्याने चरम प्राणावधौ द्वितीयात्मक एकोनविंशोऽध्यायः समाप्तः॥19॥

## ॥ अथ विंशोऽध्यायः ॥ 20 ॥

हयग्रीव यतीयौ द्वौ द्विजाग्र्यौ व्यग्रबुद्धिगौ।
समग्रगुणिनौ चापि ग्रीवय चोग्रभाषिणौ॥1॥

लक्ष्मीपतिसदानन्दसञ्ज्ञितौ प्राज्ञ किं वदे।
साऽज्ञता च तयोः सम्यग् ज्ञाननाशाय वै भवेत्॥2॥

तस्माद्विश्वास एवाऽत्र कर्तव्यः सर्वथा नरैः।
अविश्वासो न कर्तव्यः सर्वथा मद्धितेषुभिः॥2॥

एतानि पञ्चपद्यानि सञ्चीकुरु सुलाञ्छनः।
काञ्चनानि तथैवेह प्रपञ्चीकुरु वञ्चके॥4॥

नागाह्वपण्डितेह त्वं मा गां संहर लोभतः।
त्यागान्विता सा गह्वरवाक् त्यागत्संहर्षणं कुरु॥5॥

मासि मासि प्रतापन्ते दास्यामीति त्वयोदितम्।
सत्यं सत्यवतां श्रेष्ठ सत्सु त्वं कुरु सर्वथा॥6॥

अन्यथाऽनृतवाक्येन नृसिंहस्याप्रियेण च।
नृषु त्वं लघुतां यासि नृगवद्धीनजन्मगः॥7॥

इत्थं तव हितायैव वचनं च मयोच्यते।
कुचोद्यं मा कुरु त्वं च विप्रस्य वचनं त्विति॥8॥

| |
|---|
| एकवाक्यप्रतिष्ठापनाचार्याद्य त्वयोदितम्।<br>दास्यामि तत्प्रतापं त इति सत्यं कुरु प्रिय॥9॥ |
| द्विजस्य मा ददस्वेति नन्दनः किं त्वबोधयत्।<br>तव नागाह्वयागास्त्वं मृषावचनभाषणम्॥10॥ |
| प्राणस्यावधिपर्यन्तं ब्राह्मणस्य ददाम्यहम्।<br>इति वाणीमब्रवीस्त्वं प्रवीणस्मर भाषितम्॥11॥ |
| त्वं माभैस्तव सौभाग्यं वितरामि निरन्तरम्।<br>निरामयं श्रीनिवासं शनिवारे प्रपूजयेत् ॥12॥ |
| तस्माद्ददस्व विप्राय सुप्रसन्नो भवामि ते। |
| मत्प्रसादाच्च ते श्रेयः प्राप्तिरेव भविष्यति॥13॥ |
| अहं जीवयितुं विप्रं प्रविशाम्यत्र सर्वदा। |
| त्वमामन्त्रय सत्रार्थमन्नार्थं कुत्र यास्यति॥14॥ |
| हे पुत्र पुत्र पश्य त्वं मयि विश्वाससत्फलम्।<br>विप्रे जीवावधिर्जाता जीवयामि पुनस्त्वहो॥15॥ |
| हे नन्दनाहमानन्दपूर्णोऽस्मि तव दर्शनात्।<br>त्वमप्यानन्दपूर्णोऽसि मद्वृन्दावन दर्शनात्॥16॥ |
| आवयोरानन्दपूर्तावावामेव निदर्शनम्।<br>वागीश वासुदेवौ द्वावन्योन्यं दर्शनाद्यथा॥17॥ |

| |
|---|
| नेतरौ तत्र दृष्टान्तौ अन्योन्यप्रीतिसंयुतौ।<br>तथाऽत्रापि सुपुत्राद्य नेतरौ प्रीतिसंयुतौ॥18॥ |
| तस्मात्तव मयि प्रीतिर्ममापि त्वयि सर्वदा।<br>प्रवर्धते सुत दिने दिने चाहं वदामि ते॥19॥ |
| हे पुत्र ते समीपं तु मन्मनोरथसारथिः।<br>ईश्वरं पृथु सङ्कल्परथमारोप्य यापितः॥20॥ |
| स दृष्टः किं त्वया मार्गे स्पष्टं तं दृष्टवानसि।<br>अन्यथात् दृष्टरूपस्त्वं कथं शिष्टागतो मठम्॥21॥ |
| इतः परं कुरु सुत रथोत्सवमथो हरेः।<br>तथोत्सवं सुतोषेण कुरु त्वं मन्मनोरथैः॥22॥ |
| रथिकस्त्वं रथवरमारोह रविनन्दनः।<br>यथारीन् जयते तद्वदरिषड्वर्गकान् जहि॥23॥ |
| प्रथमं जहि काम त्वं विरथं कुरु कार्मुकम्।<br>धृत्वा वैराग्यरूपं त्वं शरं मुञ्च रथीरितम्॥24॥ |
| एवं कामजयं कृत्वा मदमत्सरमोहनान्।<br>क्रोधलोभौ च वैराग्य कार्मुकाज्जहि तेऽहितान्॥25॥ |
| षड्वर्गनिग्रहपर षद्पद्यानि श्रृणोति यः।<br>षड्वर्गं जायते कामं षद्पदानां च वृत्तिमान्॥26॥ |

| |
|---|
| लेखको नास्ति कोऽपीह तवालेखोऽपि नास्ति च।<br>पाकशासनलोकं तु नीयते नाकिभिः कृतिः॥27॥ |
| तत्रापि लौकिककृतौ लिखि चित्रगुप्तकैः।<br>सन्तप्तत्र पुपूर्णास्यं कृत्रिमेयं वदन्ति ये॥28॥ |
| तप्तपाषाणतपनं तप्तमूषानिपातनम्।<br>पुरीषापूरणं चाऽस्ये महिषासन शासनात्॥29॥ |
| काषायदण्डिनो भाषायां दोषापादुके मम।<br>तेषां न सन्ति मार्ताण्डेभीषाः शास्ति मृषात्मके ॥30॥ |
| तस्मादलमलङ्कृत्य प्रकृत्या त्वं जनाकृतिः।<br>सुकृत्यात्मक सत्कृत्यं सुतं मत्सत्कृतिं वद॥31॥ |
| पुरुषोत्तम पूर्वेषां कीर्तिं सम्पादय प्रिय।<br>यतिवर्येषु त्वं पौरुषादेवेह समन्वितः॥32॥ |
| अलक्ष्मीकस्य लक्ष्मीनारायणाख्या कुतः सुतः।<br>अमङ्गलस्य वारस्य यथा मङ्गळवारता॥33॥ |
| वियुज्यते यथात्रापि ह्ययुक्तं पुण्यनाम तत्।<br>प्रयूज्यते मया शिक्षा नियुङ्क्ता या मनीषिभिः॥34॥ |
| नरके नरसिंहेन हिरण्यकशिपोर्यथा।<br>परकीयस्य पारक्य सुखहीनस्य पापिनः॥35॥ |

| |
|---|
| प्रमाणं करवाणीति वचनं पुत्रिणश्च ते।<br>न युज्यते गुणैर्हीन शरणं व्रज मां मुनिम्॥36॥ |
| सत्य सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।<br>तथ्यं तथ्यं पुनस्तथ्यं कथ्यते तव नान्यथा॥37॥ |
| त्वदुक्तिः सर्वथा चात्र हृदयस्य ममान्तक।<br>कितवायुदसन्दोहसम्मिता नात्र संशयः॥38॥ |
| सफला वागिति प्रोक्ता ह्यलं सन्त्यक्तवानसि।<br>उपलत्वं न सन्देहो ह्यलसत्वाद्द्विजाधम॥39॥ |
| पापादेर्व्यापनार्थं तु धैर्याद्वा बुद्धिशौर्यतः।<br>उर्व्यां त्वमवदः सर्वं वृथा गर्वेण गर्हिताः॥40॥ |
| विद्वत्सुबुद्धिचातुर्ये त्वादृशो नास्ति नन्दन।<br>वृन्दावनपतीनां तु मादृशो नास्त्यभीष्टदः॥41॥ |
| अस्मिन्नर्थे च साक्षी यः सुक्षीणो ब्राह्मणो मया।<br>पक्षीकृतः पुत्र किं वा  वक्ष्यामि पुनरेव च॥42॥ |
| उज्जीवितश्च मज्जात कुब्जापति परायण।<br>त्वज्जातीनां समाजेन पूजितस्त्वं न संशयः॥43॥ |
| नाध्यापयामि चाध्यायपर्यन्तं तव विप्रक।<br>त्वमद्धा स्वाध्यायहीनस्तावदद्यप्रभृत्यतः॥44॥ |

नन्दनेन समीचीनं न दत्तं वस्त्रमप्युत।
कन्दाशनेन्द्र भक्तस्य श्रीपतेः सर्वथात्र तु॥45॥

कन्दाशनेन्द्रभक्तस्य तव विप्र सभाग्रतः।
तस्मादलमलं कृत्या त्वां वृथा श्रमयाम्यहम्॥46॥

हित्वा कलिमलं विप्र वद वृन्दावने कृतिम्।
मन्मध्यस्थ हयग्रीवो ग्रासं ते प्रतिदास्यति॥47॥

वेदाग्र्यं भारतं चापि वद वृन्दावनाग्रतः।
प्रेरयित्वा च मत्पुत्रं तव प्रिय न संशयः॥48॥

कारयित्वा भारतस्य त्वया सेवामपि प्रिय।
श्रीपते श्रेष्ठवित्तं तु न दत्तं पुत्र किं वदे॥49॥

जनानां कर्मजाड्यं सः हरते पाठतः कृते।
यावत्तव शरीरे तु वसाम्यहमिह प्रिय॥50॥

तावज्जीवसि हे विप्र हा गतोऽसि गते मयि।
हे दाम्बल पित्तमौले नारायण गुणाधम॥51॥

कलहं कर्तुमुद्युक्तस्त्वं धिग्बालं तवाधुना।
कनका कृष्णभट्टोऽयं कनकात्तमना अपि॥52॥

मनाक् मज्ज्ञानसम्पत्या मनःकामं प्रयाति च।
हे नन्दन शृणु स्पष्टं शिष्टस्य वचनं मृषा॥53॥

| |
|---|
| नागाह्व पण्डितस्यासीत्तस्याभीष्टं कथं भवेत्। <br> नानृतात्पातकं नास्ति कोऽनृतं वदते बुधः ॥ 54 ॥ |
| सोऽनृतात्मा नश्यतीति श्रीनृसिंहोऽभिजानते। <br> तस्मान्न वक्तव्यमेतदमृतं त्वमृतात्मभिः ॥ 55 ॥ |
| किमृतात्मा वदत्येवं श्रीनृसिंहमतं गतः। <br> अहं न निन्दयामि त्वां स्वभावः कथ्यते तव ॥ 56 ॥ |
| मया त्वया न कर्तव्यः कलहोऽत्र कलिप्रियः। <br> स्वरूपस्यानपायित्वाद्वृथा किं कलहेन ते ॥ 57 ॥ |
| कलहे क्रियमाणेपि स्वरूपं गच्छते नु किम्। <br> अन्यथा मत्कृतिरियं न विप्रकृतिरित्यथ ॥ 58 ॥ |
| प्रत्ययस्ते भवेदत्र भक्तिस्तस्माज्जनिष्यते। <br> दिवा वा यदि वा रात्रौ निद्रायां भद्रमस्तु ते ॥ 59 ॥ |
| वक्ष्येस्वप्नेऽथवाऽस्वप्नेऽप्यहं त्विह दिवाप्यहो। <br> गेहं नास्तीति ते चिन्ता मास्तु देहे वसाम्यहो ॥ 60 ॥ |
| सोऽहं महानुभावस्ते गेहदो मम गेहदः। <br> बलात्कारेण मत्पुत्रं वद लक्ष्मीपते कृतिम् ॥ 61 ॥ |
| कुलान्युद्धर पूर्वेषां दर्शपूर्वान् दशापरान्। <br> हे सुताऽध्यायकरणं कुतो न कृतवानसि ॥ 62 ॥ |

| |
|---|
| बत स्वाध्यायतिथिषु त्वं कुरुष्व प्रियोऽसि चेत्।<br>हिमकोकिल एवाहं वक्तव्यांशेऽपि वा कलौ॥63॥ |
| युगे जलचरायद्वच्चाञ्जल्य निरता नराः।<br>स उच्चकाशे धवलोदरोदरो दध्माय मानःकरकञ्ज सम्पुटे॥64॥ |
| उरुक्रमस्याधरशोण शोणि मा यथाब्जषण्डे कलहंस उत्स्वनः॥65॥ |
| इति भागवतं पद्यं द्रष्टव्यं नन्दन त्वया।<br>वन्दनं मम कर्तव्यं वृन्दावनकृतेरपि॥66॥ |
| तादृशं शङ्खमादाय निःशङ्कोऽहं महामते।<br>दध्मामि तान् प्रपुङ्खानि विस्मितश्चाङ्कजो मुनिः॥67॥ |
| श्वासनिःश्वासहीनं मे भासमानास्यपङ्कजम्।<br>हयास्यदासस्य सोऽयं निशाम्याशु सुविस्मितः॥68॥ |
| अंहो मुग्वचनं हित्वा गह्वरेति त्वयोच्यते।<br>उपह्वरे वदस्व त्वं महिष्ठं न सभासु च॥69॥ |
| त्यागान्विता वदस्व त्वं तद्वागद्य न शोभते।<br>नागाह्वपण्डितं चात्र मद्वागाशु त्वयोच्चताम्॥70॥ |
| निःशङ्क एव श्रीकान्त निरातङ्कं वचो मम।<br>एकान्ते न मृषैकान्तं वद लोकान्ततोऽपि तम्॥71॥ |
| उपरागं हयग्रीव कर्मन्दिन् प्राप्त मग्रतः ।<br>पश्य सुग्रीव मित्राह्व दानं कुरुते ऋतः॥72॥ |

| |
|---|
| नागाह्व पण्डितो यद्वत् मा मृषा गां त्वमब्रवीः।<br>कोऽमृषा वचनं ब्रूते कोविदस्त्वां विनेह च॥73॥ |
| पूर्वं तु मातुलव्याजादहं सकलजीवराट्।<br>भूतले दत्तवानस्मि कालज्ञः सार्धं निष्ककम्॥74॥ |
| अहं त्रिलोकपूजितः कृतान्तलोकनायकः।<br>अहं कुलोद्धतिं ततोऽकरं च सौरिलोकतः॥75॥ |
| वृन्दावनाचार्यकोर्वीं हरते योऽतिरौद्रकः।<br>स मद्वृन्दावनद्रोही ह्यभद्रं च भवेद्ध्रुवम्॥76॥ |
| हरे स्मरे ते चरणे हर मे संसृतिं ऋणे।<br>वरं तव करेणार्य स्पृश मां करुणां कुरु॥77॥ |
| इत्यहं प्रार्थयाम्युग्रं हयग्रीवं महाग्रहम्।<br>निग्राह्य चेन्द्रियग्रामं शीघ्रं नासाग्रलोचनः॥78॥ |
| मम सद्भक्तिसम्भूतिं ये वदन्ति बुधोदिताम्।<br>तेषां सत्सम्पदस्युस्ता मूर्तिमत्योत्रयः सुत॥79॥ |
| दीर्घग्रीवैर्भुक्त रम्भाफलैर्जिह्वा विदार्यते।<br>तद्वद्भुक्तैर्मद्धनैश्च तज्जिह्वापि विदार्यते॥80॥ |
| यज्जिह्वा मत्कृतिं नैव वक्ष्यतीह परत्र च।<br>भार्यामद्भक्तमुख्यस्य यान्तु दुष्कृतिमात्मनः॥81॥ |

| |
|---|
| कार्यात्प्राक्शिथिलां कृत्वानार्याः कीर्तिमुपाददे।<br>स्वित्रीणां मूत्रपानेन तत्पात्रेषु च मज्जते॥82॥ |
| सहस्रधा भवेज्जिह्वा सहस्रांशुसुतेन च।<br>सहस्राक्षसभायां तु सहस्रारेण तप्यते॥83॥ |
| सहस्रवारं विष्ठायां षष्टिवर्षसहस्रकम्।<br>सहस्र चण्डालजातीनां सहस्राण्डानि भक्ष्यताम्॥84॥ |
| सह भाण्डे सुरापीनां पच्यन्ते नात्र संशयः।<br>जायन्ते चाष्टधा चैवं कष्टयोनिषु नान्यथा॥85॥ |
| तस्माच्च मत्कृते पाठं शिष्टाः कुर्वन्तु नान्यथा।<br>इष्टं च तेषां भवति कष्टं नेह परत्र च॥86॥ |
| ये मृषावादिनं मां तु जानन्ति मनुजाधमाः।<br>कीनाश लोकितां यान्ति नानाशोकसमन्विताम्॥87॥ |
| तस्मान्मयोक्तं यत्सर्वं तत्सत्यं नात्र संशयः।<br>मत्सत्यवचनं श्रुत्वा सत्सु तद्वद नन्दन॥88॥ |
| स्वाप्नश्लोकेऽपि यत्प्रोक्तं प्राप्नुवन् तच्चनाऽन्यथा।<br>आप्तवानपि जानाति तापने क्रूरतां दिवि॥89॥ |
| दिवास्वप्नेरितान् श्लोकान् भवाब्धेस्तारकान् सुतः।<br>सुवाग्वैखर्याराशिर्मे तवार्थैः पूरयिष्यति॥90॥ |

| |
|---|
| वेङ्कटेशो मठेशस्य मम वृन्दावनं प्रति।<br>त्रिकूटेशने चायातः काटकेशैः सहर्षिभिः ॥ 91 ॥ |
| तस्माच्च श्रीपतेः श्रीनिवासस्यमनसा कुरु।<br>वासुदेवमुने श्रीमन् शनिवारे सुपूजनम्॥ 92 ॥ |
| मन्दवारेऽपि वाऽमन्द कुरुवृत्तिं च माधवीम्।<br>वृन्दावनपतिं कन्दाशनवन्द्यं सुकीर्तयन्॥ 93 ॥ |
| कन्दाशनस्य मे वृन्दावनं सम्प्रति नन्दन।<br>मन्दाकिन्याः समायातो मुकुन्दो बिन्दुनामकः ॥ 94 ॥ |
| यतोऽस्मद्वृन्दावनस्य दर्शने बिन्दुमाधवम्।<br>दृष्ट्वा मुकुन्दं यत्पुण्यं श्रीनिवासं तदाप्नुयात्॥ 95 ॥ |
| एतत्सर्वं स्वाप्नपद्येन गर्वं हित्वा सर्वे विप्रवर्यास्त्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः ॥ 99 ॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥ 100 ॥ |
| इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।<br>समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥ 101 ॥ |
| यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।<br>भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥ |

इति श्रीमत्कविकुलतिलक वागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराजपूज्य चरणोदित श्रीमत्स्वाप्नवृन्दावनाख्याने (चरम) द्वितीय प्राणावधौ तृतीयाध्यायात्मकः विंशतितमोऽध्यायः समाप्तः॥20॥

## ॥ अथ एकविंशोऽध्यायः ॥21॥

तव कायगतं वायुमायुषो वृद्धिमिच्छतः।
स्थापयामि यतोपायं श्रेयो मत्कृतमेव ते॥1॥

तव पत्न्याश्च हे विप्र यत्नेननैतत्कृतं त्वया।
स्वप्नं दृष्ट्वा च त्वामूचे पुण्यमाप्नोषि तेन च॥2॥

अतस्त्वं धर्मपत्नीं च नैव सन्तापय प्रिय।
अनुवर्तीं सदा विप्र कुदारत्वं नहीदृशम्॥3॥

यादृशं परलोकस्य श्रीधरस्य विदूरताम्।
करोति पुरुषस्येह तादृशं नास्ति त्वत् स्त्रियाम्॥4॥

किंवाऽशक्त त्वतो विप्र त्वत्सेवां न करोति च।
सूतके वायुना ग्रस्ता हरत्यहरहः स ताम्॥5॥

तस्याः प्राणभयं नास्ति स्वमाणवकपुण्यतः।
ब्राह्मण त्वं तथा काण निष्ठूरं न भणानिशम्॥6॥

तस्माद्भयं त्यजस्वेह कलहं तु कलिप्रियं।
हे विद्वांस इह  ध्वान्तवन्तं पश्यध्वमञ्जसा॥7॥

कदध्वानं स्ववध्वा च मणिमद्वदनोदितम्।
वदतेऽयं द्विजो मध्वाचार्याध्वानं विहाय च॥8॥

| |
|---|
| अविध्वान् साध्वसं याति तद्वत्कमलनामकः।<br>मदन्तर्यामिणं ब्रह्माणं सवायुं विहाय च॥9॥ |
| ब्राह्मणोऽयं मणिमतो मतमाश्रित्य वर्तते।<br>हयग्रीवाज्ञया वातविरिञ्चौ स्वं च वैभवम्॥10॥ |
| विना वाणीपतित्वं मे दत्तवन्तौ च किं वदे।<br>यत्र प्रतीतार्थबाधस्तत्रान्तर्यामिसङ्ग्रहः॥11॥ |
| कर्तव्य इति पूर्वोक्तमनुसन्धत्स्वमञ्जसा।<br>तस्मान्मयोक्तं सकलं लौकिकं वाप्यलौकिकम्॥12॥ |
| सत्यं सत्यवतां नाथ सुत तत्वमते कृतिन्।<br>अयं कमलनाभश्च मयः सकल रूपकः॥13॥ |
| स्मयकश्मलमाविष्टो विस्मयं न कुरु प्रिय।<br>कलिः कमलनाभाख्यः पुनर्भूवलयेऽभवत्॥14॥ |
| मिलितः स्वस्त्रियाऽलक्ष्म्यायानिर्माल्यं न मेऽगृहीत्।<br>कलिर्मयश्च मणिमान् मिलित्वा त्रय एवते॥15॥ |
| कलहं कर्तुमुद्युक्ताः कुलाय सदनाभिगाः।<br>तन्निन्दावचनं श्रत्वा सुनन्दन पुरो मम॥16॥ |
| नन्वन्धे पातयाम्युग्रे धून्वंस्तं यमकिङ्करैः।<br>तस्माच्छिखोपवीतार्हो नैव सोऽप्यतिगर्हितः॥17॥ |

| |
|---|
| बहिष्कुरुत तं विप्रमसहिष्णुं ममोच्छ्रयम्।<br>हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥18॥ |
| यथा स्त्रियः पतौ रुष्टे न भ्राता पितरावपि।<br>हयग्रीव निरूपं तं शिरसा वह शीघ्रतः॥19॥ |
| यद्वा विधि निषेधाभ्यामुद्धितं तद्धितं तव।<br>वादिराजाख्यभट्टोऽयं सुतो मे पट्टवर्धन॥20॥ |
| स्वप्ने पटुतरो विप्रः श्रीपतिः कृतिपाठकः।<br>व्यासराजस्तदनुजो जामातातस्य गोपजः॥21॥ |
| तदग्रजः प्रजाकार्यै रञ्जनाज्जनयन् धनम्।<br>वासुदेव मुनिः शान्तः श्रान्तश्च मम पूजय॥22॥ |
| कान्तं मां तातमायाति तत्रैव वसतिर्भवेत्।<br>उपेन्द्र सूरणश्चापि कृष्णः कानक एव च॥23॥ |
| हिरण्यभट्टस्तत्रोक्त कर्मणि प्रथितः सुतः।<br>वालीवालोपपद वेङ्कटाद्रिस्तथैव च॥24॥ |
| एते चान्ये च बहवो बहुमानपुरःसराः।<br>कुहकाद्रहिताः सर्वे सर्वेश्वरमतानुगाः॥25॥ |
| विश्वासिनो ह्यविश्वासं न कुर्वन्तीह सर्वथा।<br>सुश्वास प्रेरको ह्येषां वासुदेवोऽभिजायते॥26॥ |

| |
|---|
| कलिः कमलनाभश्च दम्बलः पित्तमौलिकः।<br>लक्ष्मीनारायणो डोलायितचित्तस्तु तम्मणः॥27॥ |
| एते च प्रायशो ह्यत्र पुत्राविश्वासिनः सदा।<br>मित्रजभृत्य बाध्याश्चामुत्र सत्यं मयोदितम्॥28॥ |
| हरिश्च डाम्बल पुत्र व्यालोलितमनाप्यहो।<br>कुलालचक्रवच्चात्र भ्रमते कल्यबुद्धिमन्॥29॥ |
| अप्पणः कृष्णभट्टाऽयमिदानीं पापमत्यजत्।<br>कोपं च मम हे पुत्र शापं त्याजितमानहो॥30॥ |
| श्रीनिवासाचार्यनामा मानवानां भयानकः।<br>मम मानससम्प्रीतिं तनोतीह न संशयः॥31॥ |
| विठ्ठलाद्यास्मदीयास्मन्मठसन्यासिनिश्च ये।<br>वटबीजवद्देवास्मदुटजानन्दवर्धकाः॥32॥ |
| हे विप्र तव जामाता रामचनद्रोऽपि बुद्धिमान्।<br>विश्वासं कुरु ते चात्र सोऽपि विश्वासिषूत्तमः॥33॥ |
| एवं च त्रिविधाः विप्राः प्रोक्ता पुत्र मया तव।<br>श्रुत्वा कृतार्थतां यासि किं भूयः श्रोतुमिच्छसि॥34॥ |
| नित्य निर्जलनिर्घातैर्दुर्जनाः भर्जितास्त्वहो।<br>खर्जूरवच्चार्जुनस्य बाणनिर्घात मर्दिताः॥35॥ |

| |
|---|
| यथा तत्रैव सुत्राम्णा वृतवृत्रासुरार्थिना।<br>अन्धेषु मार्ताण्डीकृत शिलाभारैः कुलान्विताः॥36॥ |
| बाध्यन्ते  श्राद्धदेवेन श्रद्धारहितबुद्धयः।<br>वृद्ध त्वमद्धा क्रुद्धेषु ह्यपि तेषु वदस्व तान्॥37॥ |
| तस्माद्विश्वासवन्तश्च भविष्यथ कृतौ मम।<br>विश्वस्ताः प्रेत्य मर्त्या ये ह्यमर्त्यत्वं व्रजन्ति ते॥38॥ |
| अहं मध्यन्दिनगत सूर्यवस्तुप्रभान्वितः।<br>मद्वृन्दावन मध्यस्थो वासुदेव मुनेः प्रियात्॥39॥ |
| पूजकस्य तपो योगात् बिम्बे शम्भव दर्शनात्।<br>महोपचारोपहारैः हरिः सुस्थिर एव च॥40॥ |
| इति श्रीत्यादिकं चोक्त्वा समापय न मे कृतिम्।<br>मत्सुतस्य च भागोऽयं समाप्तिः श्रीरमात्मिका॥41॥ |
| अध्यायकरणार्थं च शरणागतवत्सल।<br>द्विरध्यायः प्रीणतो मे वाणीं श्रृणु सुनन्दन॥42॥ |
| हे विप्र मम पुत्रस्य पिब पादोदकं सदा।<br>क्षिप्रं नाशयते तेन शीतोष्णज्वरपीडनम्॥43॥ |
| ब्राह्मणे स्वप्नमद्राक्षीत् कर्णे यक्षी च कश्चन।<br>लक्ष्मीपतिगृहे पक्षीकृतविप्रोऽतिपुण्यभाक्॥44॥ |

| |
|---|
| अन्यथा गुरुराजस्य कथं स्वाप्राधिकारिता।<br>तस्माद्गुरुः शरीरेऽस्य वर्ततेऽमर्त्यविग्रहः॥45॥ |
| इत्यवादीन्मदान्धानामन्धत्वं त्याजयन् बुध।<br>तस्मादप्यधमा बुद्धिसन्धानरहिता द्विजाः॥46॥ |
| हे शव त्वमविश्वासं कुतोऽस्मासु गतोऽस्यहो।<br>के शवस्तव विश्वासरहितस्य सुशासकः॥47॥ |
| शवेति वक्ष्यामि कुतः प्रवक्ष्ये तत्रकारणम्।<br>शवेति सुखमुद्दिश्याप्याश्वसीर्मम शासनम्॥48॥ |
| अथवा कुणपार्थौ वा प्रणिपातप्रियं च माम्।<br>शरणं व्रज ते क्षेमं कृणुयां मम विप्रवत्॥49॥ |
| मया नन्दनमुद्दिश्य नानाविधतयोदितम्।<br>त्वया प्रसन्नीक्रियते नैव सोऽप्यन्नयाचनम्॥50॥ |
| कुरु वृन्दावने सम्प्रत्येव ते चान्नदे शुभे।<br>मन्नन्दन मुखेनैव तदन्नं ते प्रदास्यति॥51॥ |
| मम भोजनसन्तोषं सुजनाम्बुजभास्करम्।<br>कुजनाम्बुजसङ्कोचद्विजराजं ममात्मजम्॥52॥ |
| मदजाड्यरुजाहीनं द्विजाराध्यं भजोद्य तम्।<br>वदन्तं द्विज ते कल्पभुजं मज्जनतां प्रति॥53॥ |

| |
|---|
| मम भोजनसन्तोषं ये वदन्ति द्विजोदितम्।<br>तेषां अन्नानि सम्पूर्णानीति सत्या फलश्रुतिः॥54॥ |
| इति मन्त्रस्त्वया तत्र जप्तव्यः सततं त्विह।<br>कुत्र यास्यति ते पुत्र कळत्रैः सहसा सह॥55॥ |
| इहेति चोच्यते मया प्रियेति चोच्यते त्वया।<br>मया त्वयाप्यहो विधिर्महोदधौ विधिष्यते॥56॥ |
| स यथा वदति ह्यावां मा वाक्ते चान्यथा भवेत्।<br>निर्णयं च प्रपश्यावस्त्वर्णवे मणिराजते॥57॥ |
| इतिहास्यास्पदा ते च शेमुषी शासकोऽस्म्यहम्।<br>मासिमासि शुभावासिभासमानः शशी यथा॥58॥ |
| परसौख्यं त्वन्मुखेन नरसौख्यं यथा च मे।<br>सुरसौख्यं च मे सूर्यकरवच्च प्रकाशय॥59॥ |
| मम सद्भक्तिसम्भूतिं ये वदन्ति बुधोदिताम्।<br>तेषां सत्सम्पदः स्युस्ताः मूर्तिमत्योऽत्रयाः सुत॥60॥ |
| इत्येकं श्लोकमुख्यं मे त्यक्तवानसि विप्रक।<br>आकारस्थं लेखनं च कारय प्राज्ञयेरितम्॥61॥ |
| हे ब्राह्मणान्नमन्त्रत्वं जपन् सम्पश्य माम मुनिम्।<br>शतानन्दमुनेस्तातो ब्राह्मणान्नं यथाऽतनोत्॥62॥ |

| |
|---|
| तथा तनोषि त्वमपि वृन्दावनपतिं जप।<br>मन्त्रेणानेन विप्रेन्द्र शीघ्रं तेऽन्नं ददाम्यहम्॥63॥ |
| पूर्वं त्वमन्नदानं च नाकरः परमे द्विजे।<br>नादत्तमुपतिष्ठेच्च ब्रह्माद्यास्त्रिदशा अपि॥64॥ |
| अतस्त्वं कार्पण्यभावं त्यज ब्राह्मणतर्पणम्।<br>कुरु कृष्णार्पणं तच्च दर्पणे स्वमुखं यथा॥65॥ |
| पश्यसि त्वं जन्म जन्मन्येवं सत्फलसञ्चयम्।<br>मन्ममन्म वयं सर्वेऽप्येवमेव न संशयः॥66॥ |
| मुनिं मन्नन्दनं पुण्यात्मानं पश्यन्तु सज्जनाः।<br>स्नाने च प्रणवध्याने व्याख्याने देवतार्चने॥67॥ |
| पुनर्माध्याह्निके स्नाने भोजने ब्राह्मणैः सह।<br>नितं स वर्तते विद्वान् वेदशास्त्रविनोदतः॥68॥ |
| प्रीणयन् परमानन्दं सदनं मम नाकिनः।<br>नो वृथा क्षणमप्यस्य गतं तोकस्य सात्विकाः॥69॥ |
| पश्यन्तु तपसोऽस्माकं साफल्यं च कलौ युगे।<br>तस्मादयं च तोकोऽपि लोकोपकरकर्मवान्॥70॥ |
| शोकोऽप्यमुत्र नास्त्येव कोपोऽपि समवर्तिनः।<br>गुणान् द्विगुणितानस्मिन् पश्यन्तु गुणिनः सदा॥71॥ |

| |
|---|
| गुणिनश्च प्रमोदन्ते गुणिष्वेह न निर्गुणाः।<br>तस्मान्मम समो मन्नन्दन एव दिने दिने॥72॥ |
| कर्मन्दिनां सदानन्दं तनोतु तनुभृत्स्वयम्।<br>हे वादिराजभट्टार्यानामधार उदार ते॥73॥ |
| सार्थकं कुरुषे जन्म पार्थवान्नात्र संशयः।<br>वृन्दावनाचार्य नाम्नः पुत्रमित्रकलत्रकैः॥74॥ |
| सह तस्य ग्रहं दत्त्वा बृहत्कीर्तिमुपाददीः।<br>प्रतापं तस्य दत्त्वा चामित्रतापं करोष्यहो॥75॥ |
| पत्रतापाख्य रुद्रोऽपि स्वप्रतापं जहाविह।<br>लक्ष्मीपतिप्रतापार्थं दत्त्वा प्रारब्धमप्यहो॥76॥ |
| स्नेनसार्धं च तद्भुक्तापराधं लोकमेष्यति।<br>निष्कद्वयं स दत्त्वातु शुष्कं तत्पापसञ्चयम्॥77॥ |
| किष्किन्धेश्वरवच्चक्रे पुल्कसां जन्मयापकम्।<br>सोऽपि दासो मम व्यासः स्नेहपाशान्वितस्त्वयी॥78॥ |
| हस्ते च श्रीपतेर्निष्कद्वयं प्रापयदाशु ते।<br>तेन ते तात एवाऽसौ माता ते तत्सती द्विज॥79॥ |
| तस्यानुजः पितृव्यस्ते गुरुर्मत्सुत एव च।<br>इत्थं सदानुसन्धानबन्धनान्वित एव सन्॥80॥ |

धन्वन्तरी सदा ध्यायन् किं धनैर्बन्धनप्रदैः।
वर्तस्व समुपास्वेह कार्तस्वरविभूषितम्॥81॥

पार्थःश्चरमणं कृष्णं यथा प्रार्थस्व मामपि।
नन्दनं यतिसन्दोहेनान्वितं तन्मते स्थितम्॥82॥

सन्मतिं जन्मतः कान्तं शान्तं तं समुपास्व ह।
इहामुत्रार्थदं शास्त्रार्थज्ञं तत्वार्थकोविदम्॥83॥

सुत्राम गुरुवत्प्राज्ञं प्रार्थय श्रीपतेः प्रियम्।
औदार्य माधुर्य वाक्ययुक्तं धैर्यान्वितं परैः॥84॥

विवादे क्रियमाणेऽपि गाम्भिर्यैणार्यभाविनम्।
चातुर्यतः पराक्रान्तं मातुर्यस्यास्तपोदयम्॥85॥

प्रातर्युगं तत्पदयोः प्रार्थयंस्त्वं सदा द्विज।
अपां फेनेन नमुचेः शिरो दुश्च्यवनोऽहरत्॥86॥

यथा तपः प्रभावेन हन्म्यहं परवादिनः।
तस्माद्दुर्वादिभिर्भीतिर्नास्ति नास्ति सभासु ते॥87॥

तज्जिह्वा सान्तरैर्बद्धा भविष्यति न संशयः।
अतस्त्वं नन्दन ममानन्ददानन्दसन्मुनेः॥88॥

मतं मनसि सन्धाय तामसान् जहि वादिनः।
धनूरत्नं मनस्तेवै ह्यानन्दमुनिसन्मतम्॥89॥

| |
|---|
| नानायुधनिदानं ते रथिनः पृथुवादिनः।<br>पक्षपातरथं मे त्वं क्षिप्रमारोह काङ्क्षितम्॥90॥ |
| लक्ष्यं लक्षणसम्पन्नं दुष्टपक्षाभिधं बुध।<br>विद्धं कुरु प्रबुद्धेश वृद्धवाक्यं न धिक्कुरु॥91॥ |
| बद्धं कुरु मनस्ते मत्पदपद्मे धृतिं कुरु।<br>तिमिरं समरे रम्यं निमिरेव कुमारकम्॥92॥ |
| अमरं त्वमराराध्यं सोमराट् परमोऽरमत्।<br>अमुचन्नमुचिः कान्चिन्त्वञ्चन् किञ्चनसिञ्चनैः॥93॥ |
| लाञ्छनाञ्छनसञ्छन्नं नाराचान्न शचीपतिम्।<br>एतद्विपद्यभावं मे नन्दनान्मन्दबुद्धयः॥94॥ |
| निबोधन्तु न धुन्वन्तु निधानं भवतां मुनिः।<br>ज्ञानसागरमग्नोऽसौ संसाराग्निप्रतीपिताम्॥ 95॥ |
| तत्पुरैर्भग्नसन्तापादद्भिरग्निमिवाकरोत्।<br>तस्मात् ज्ञाननिधिं प्राप्य सुखिनः सन्तु सज्जनाः॥96॥ |
| विज्ञानकोशादज्ञानं निराकुर्वन्तु सर्वथा।<br>श्लोकद्वयस्य शक्यार्थं तोक त्वं चोक्तवानसि॥97॥ |
| लोके यथा शक्रगुरुः त्वं कविर्वाक्पतिस्त्वहम्।<br>किं ते दास्यामि मद्दास्यं पूर्वमेव त्वमाददीः॥98॥ |

| |
|---|
| तस्मान्मत्साम्यमेवेह चादत्स्वत्स्वसुत सात्विक।<br>मत्साम्ये च त्वये प्राप्ते त्वत्समो नास्ति सत्सु च॥99॥ |
| सत्सतां सम्मतं सत्यं कुत्सिता नामसम्मतम्।<br>जगत्सत्यं यथा तत्ववादिनां न मृषात्मनाम्॥100॥ |
| असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।<br>अपरस्परसम्भूतिं किमन्यत्कामहैतुकम्॥101॥ |
| एतां दृष्टिमवष्टभ्य नष्टात्मनोऽल्पबुद्धयः।<br>प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः॥102॥ |
| इति गितोदितैः श्लोकैः तोक वाक्कायकर्मभिः।<br>लोकनाशकरूपाणां वराकत्वं निरूप्यते॥103॥ |
| तद्वृत्तवोच्चयं दृष्ट्वाह्यसूयन्तेऽनसूयया।<br>सह सर्वे महद्यान्ति ह्यभद्रं रौद्रमेव ते॥104॥ |
| तस्मात्त्वं मत्समे नित्यं कुत्सितानां भयानकः।<br>वत्स त्वं सत्सु सम्पूज्य शश्वदत्र परत्र च॥105॥ |
| एतत्सर्वं स्वाप्नपद्येन गर्वं  हित्वा सर्वे विप्रवर्यास्यजेन।<br>श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥106॥ |
| इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।<br>मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥107॥ |

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥108॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।

भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्रं सुत सत्यमेव तत्॥

इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराजपूज्य

चरणोदित श्रीमत्स्वाप्नवृन्दावनाख्याने (चरम प्राणावधौ) एकविंशोऽध्यायः समाप्तः॥21॥

## ॥ अथ द्वाविंशोऽध्यायः ॥22॥

श्रीपतेः गृहकृत्यं ते बह्वस्ति हित्वा च तत्।

नन्दनाग्रे वदस्व त्वं चरमां वा कृतिं प्रिय॥1॥

तद्वेङ्कटगिरेर्नामधारा पूर्वं त्वयार्जितम्।

कर्म वृन्दावनाश्वत्थसेवापरशुना हन॥2॥

वासुदेव मुनेर्भानोर्यथा तामसनाशनम्।

तथैवसो विनाशोऽभून्माधवान्नस्य भोजनात्॥3॥

पूर्वं कृष्णाकर स्पृष्टमन्नं काम्यवने मुने।

भुक्त्वा च मुनयः सन्न पापास्त्वं माधवान्नतः॥4॥

भुवि पूजाधिकारोऽभूत्तव जातैनसङ्क्षये।

भवजार्तिश्च ते न स्याद्दिवि वा वाङ्मे मृषा॥5॥

अमुचन्न मुचिस्तिमिरं समरेत्यादि पद्यतः।

पूर्वपद्यार्थानुकूल्यादर्थं त्वं चोक्तवानसि॥6॥

| |
|---|
| मत्तात्पर्यं त्वमेवेह जानासि श्रीनाथनामयुक्।<br>को नाम तव सादृश्यं समर्थाः प्राप्तुमञ्जसा॥7॥ |
| उपक्रमादिलिङ्गैश्च मत्तात्पर्यविनिर्णयम्।<br>करोषि पूर्णसादृश्यं गतोऽसि मम सर्वथा॥8॥ |
| उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।<br>अर्थवादोपपत्ती च लिङ्गं तात्पर्य निर्णये॥9॥ |
| इति षड्विदस्तात्पर्यं लिङ्गान्निर्णय एव च।<br>कर्णश्राव्यार्थसारं त्वं व्याकरोषि कुमारकः॥10॥ |
| तस्मान्मे पट्टभद्रेह सन्तु भद्राणि सर्वदा।<br>अभद्राणि विनश्यन्तु क्षुद्रास्ते वैरिणस्तथा॥11॥ |
| हे नन्दन! द्विजोऽयं ते नन्दनस्पन्दनं विना।<br>वृन्दावने च मन्दानां नन्दयिष्यति नन्दनैः॥12॥ |
| तस्य किञ्चित्सहायं त्वं कुरु चान्नार्थमर्थतः।<br>नान्नवत्त्वं कुरु व्यर्थं सार्थकं कुरु शीघ्रतः॥13॥ |
| त्वं ददस्वेति वा मा वाहं ददाम्यन्यपूरुषैः।<br>मन्दस्मित कुरुष्वेह वृन्दावनपतेर्वचः॥14॥ |
| दरिद्रैरपि दास्यामि धनाढ्यैः किं वदे तव।<br>दास्यामीति सुदामाग्र्य मद्दासाय महामते॥15॥ |

| |
|---|
| त्वमपीह धनाढ्योऽसि दृढबुद्धिं सदा कुरु।<br>मृडोऽपि ते मनस्तत्त्वं प्रेरयिष्यति गाढशः ॥16॥ |
| हे विप्र मत्प्रसादेन त्वत्पितृणां त्रिविष्टपम्।<br>त्रिमार्गगावगाहातिपवित्राङ्गयुजामभूत्॥17॥ |
| तथाहि लोके मर्त्यानां कुले जातस्य कस्यचित्।<br>तत्वसम्प्रश्नकस्यर्षेः प्रसादे सति तत्कुलम्॥18॥ |
| सर्वं त्रिविष्टपं चाप नष्टपापं त्रिसप्तकैः।<br>धिक्कृत्य नारकं कष्टं शिष्टानुग्रहतः कृतिन्॥19॥ |
| तद्वन्महानुभावस्य ममानुग्रहस्त्वयि।<br>विद्वन् तत्कुलजाता ये योग्याः यान्ति त्रिविष्टपम्॥20॥ |
| अलं मधुकरान्नं ते छलं मा कुरु दारवत्।<br>कुलं कृतं पवित्रं ते तिलमात्रं न दुष्कृतम्॥21॥ |
| भाषया भीषयस्येव दोषरूपिण एव तान्।<br>काषायदण्डवेषाय चास्त स्वस्त्यविषह्य ते॥22॥ |
| दुर्वादीभमहासिंह तव युक्त्याख्यसन्नखैः।<br>तद्दुर्मत महाकुम्भदलनं कुरु शीघ्रतः॥23॥ |
| वेदवेद्यद्युमणिना मणिमन्मतदुस्तमः।<br>निरस्तं तूदितेनेह नत्पट्टोदयपर्वतात्॥24॥ |

| |
|---|
| हे वेदवेद्य दुस्तर्कतमसोऽर्कप्रभायित।<br>सत्तर्ककुमुदानां च कौमुदीश न ते समः॥25॥ |
| पुरुषोऽस्तीह लोके च पुरुषोक्तिं वदेद्यदि।<br>सर्पपात्सम्मितां वापि कर्षणं यास्यते यमात्॥26॥ |
| वादिराजगुरुनामधराहो मत्कृतिः परमतं निराकरोत्।<br>त्वं कुरुष्व रतिमत्र वेदराट् प्रीयते परमपूरुष एव॥27॥ |
| हे शिष्ट कार्यत्रयमास नष्टं निविष्टमेघैरिव भूतलेष्टम्।<br>स्पष्टं मुनीनां परिहासगोष्ठ्यां तिष्ठत्यजस्रं सुततद्यथेष्टम्॥ |
| त्वत्सहस्रसमा यावत्तावन्मम तुहास्यता।<br>न स्यात्स्वस्यायुष्यवृद्धिमपेक्ष्याहं सदा वसे॥29॥ |
| तस्मात्कार्यत्रयं कृत्वा कृतकृत्यो भव प्रिय।<br>त्रिभिः पुत्रस्य पुत्रत्वं स्मृत्युक्तं सार्थकं कुरु॥30॥ |
| एतावानेव सत्पुत्रः पोतावश्यमिदं कुरु।<br>मातापित्रोश्च शुश्रूषां श्रोता श्रुत्वा दिवं गतः॥31॥ |
| कर्ता यातीति किमुत भर्तारं च सती यथा।<br>स्मृत्वा याति परं लोकं कृत्वा सेवां कुरु प्रिय॥32॥ |
| तस्मान्मत्सेवया जीव सुत त्वं शरदां शतम्।<br>करदानादपि प्रीतिर्मम नैतादृशी भवेत्॥33॥ |

| |
|---|
| तस्मात्त्वं सर्वकार्यं च हित्वा कार्यत्रयं कुरु।<br>आर्यत्वं मयि चेदस्ति तर्हि कार्यमिदं त्रयम्॥34॥ |
| इयं मम कृतिश्चेति न विप्रकृतिरित्यथ।<br>विश्वसस्तव चेदस्ति तर्हीदं कुरु शीघ्रतः॥35॥ |
| सुत सम्पूर्णकामस्य हयग्रीवाज्ञया मम।<br>कामः कुत्रापि नास्त्येव पूर्णकामस्य का स्पृहा॥36॥ |
| अथापि वक्ष्ये ते कामं मम काम्यमिदं त्रयम्।<br>अध्यायात्मक सत्पद्यान्यस्मिन् अस्मत्कृतिः परा॥37॥ |
| अन्नमन्त्रेष्व वैयर्थ्यमेतत्कार्यत्रयं मम।<br>एतत्त्रयं यदि कृतं त्वया पुत्रेह कुत्रचित्॥38॥ |
| मम पुत्रस्त्वमेवेह सुत्राम्णश्चित्रविक्रमः।<br>यथा तथा सुतत्वं मे वृथा मा कुरु मत्स्पृहाम्॥39॥ |
| व्यथा न मे कृतार्थस्याप्यथापि त्वद्धिताय च।<br>हे नन्दन कामधेनुवदेव त्वं धनैरपि॥40॥ |
| वृन्दावनपतिध्यानाद्धन्यं ब्राह्मणमावह।<br>एवं धृतायां ध्रुवमात्मनः कृतिम्।<br>सन्ध्याय स्वाध्याय तिथिस्त्वमुञ्चन्॥41॥ |
| अध्यायकृत्यं कुर्वन्नध्यायकेषु भृत्यैर्युक्तं कुरु कृष्णार्पणं तत्॥42॥ |

लोकेऽप्यवैदिकसभे यास्यत्याभरणं धनम्।
तत्सर्वमप्यहं वक्ष्येऽप्ययमेव ममोद्यमः॥43॥

भ्रान्त मा पृच्छ मां मायामयं जगदिदं त्वसत्।
इति मायावादिनां तु मतमप्यनिशं मृषा॥44॥

लाभालाभौ हर्यधीनौ लोभालोभौ च देहिनाम्।
सुखदुःखे खगपतेरधीनौश्वासदेहिनः॥45॥

मानामानौ जनानां च मोहामोहौ महात्मनः।
जयाजयौ श्रियःकान्तान्मायामाये महामते॥46॥

इत्यादि द्वन्द्वजातानि मध्वसिद्धान्तवेदिनः।
तस्मान्मापृच्छ मां मातापितरौ के तु मानव॥47॥

पृच्छ सच्छास्त्रतत्वानि मयोक्तानि न वै मृषा।
त्वया पृष्टेन वक्ष्यामि हृष्टोऽहं सतं प्रिया॥48॥

स्पष्टं ते स्वेच्छया वक्ष्ये कष्टं तेऽद्य किमागतम्।
लोकवार्तां न मां पृच्छ तोकबुद्धिमिमां त्यज॥49॥

काकवल्लघुतां यासि नाकेशसुतवत्प्रिय।
अतस्त्वप उपस्पृश्य कुपथस्थितपापिनाम्॥50॥

प्रसङ्गात्सुप्रसङ्गांस्तु प्रवक्ष्ये विप्रवर्य ते।
विप्रांतःस्थितसन्तापस्तत्र न प्रज्वरार्दितः॥ 51॥

| |
|---|
| मत्प्रसादश्च तेजोरूपस्य त्वयि प्रकाशनात्।<br>इतः परं तु किं वक्ष्ये वक्ष्ये परमपूरुषम्॥52॥ |
| शक्ष्ये च वैष्णवद्रोहं न शक्ष्ये चान्यतः कृतम्।<br>हरिर्वेत्ति गुरुर्वेत्ति हरो वेत्ति गिरेः सुता॥53॥ |
| धरा वेत्त्यमराः सर्वे नरो वेत्ति नवाऽधुना।<br>मनुष्यः पुष्यनक्षत्रेजातः कश्चन तुष्यति॥ 54॥ |
| इषुयोगे प्रेष्यभावं स करिष्यति मे सदा।<br>हरिः सर्वोत्तमो नित्यं गरुद्वारा प्रसादकृत्॥55॥ |
| शिरसा धार्यतेऽस्याज्ञा विरिञ्चहरपूर्वकैः।<br>करोति सृष्टिं खलु लीलयैवहरत्यजस्रं सलिले स शेते॥56॥ |
| धरत्यमोघं खलु पालयस्तत्सरत्यजस्रं खलु भक्तपालः॥57॥ |
| ब्रह्मन् ब्रह्मणि सन्तिष्टन् सृष्टिं चास्य करोत्यहो।<br>दध्रे स रुद्र देहस्थः कोपं तापहराय च॥58॥ |
| जडाज्जडमिदं चक्रे दृढाद्दृढमसौ हरिः।<br>निबिडान्निबिडं भस्म वडवाद्वडवाग्निना॥59॥ |
| विष्णुर्जिष्णुः स्वयं चास्य करोति जगतां स्थितिम्।<br>पूष्णोऽन्तस्थः स्वयं कृष्णः स्वतेजोऽभिप्रकाशिकाः॥60॥ |
| एवं मोक्षं स्वपक्षस्य मुमुक्षो कुक्षिगस्य च।<br>सपक्षिवाहनः कर्तुं दक्षः त्र्यक्षोपि न क्षमः॥61॥ |

तत्पादं क्षालयित्वादौ स्वपदं प्राप्तवान् विधिः।
तत्तीर्थं शिरसा धृत्वा शूली कैलासमाप च॥62॥

शेशस्तच्छयनं भूत्वा ह्यशेषां वहते भुवम्।
स्वशेषपदवीं याति स रूषं च जहाविह॥63॥

वाहनो वैनतेयोऽभूत्तेन पुण्येन मानव।
दानवान्तकनेत्राग्रे सर्वत्र वसतेऽनिशम्॥64॥

कृष्णः कण्ठमणिं कृत्वा ब्रह्माणं च गुणार्णवः।
तत्पदं पारमेष्ठ्यं च प्रददौ प्रभुरव्ययः॥65॥

एवं देवाधिदेवश्च देवानां स्वस्य सेवया।
ददाति पदवीं योग्यां माधवः स दयानिधिः॥66॥

ममापि पादसेवया ददाति योग्यवैभवम्।
रमापतिः श्रियान्वितो दयान्वितः पदे पदे॥67॥

क्रियापदप्रयोगेऽपि न धातूनां विरोधिता।
दैवेति छान्दसे वाक्ये न दोषायेति सन्मतम्॥68॥

तन्मतं मन्मतं चैकं विचिन्म तव सन्मतिम्।
चिन्मात्रं तन्मते ब्रह्मास्मिन्मते तदनन्तकम्॥69॥

मतद्वये कथं भाति तव तत्त्वं सुताहितम्।
हितं वा वद तत्वेन हृदि गूहितमेव ते॥70॥

| |
|---|
| ब्रूमो वयं तु भद्रं ते श्रुणु पुत्रान्यदुर्मतम्।<br>व्यर्थं गतं बृहद्बीजबलीवर्दवदेव तत्॥71॥ |
| अथो मया कृतो योगो रूढिर्वा रूढमत्पद्।<br>विद्वद्रूढात्मके यद्वत्समहारूढमार्यज॥72॥ |
| तस्मात्कवे प्रयोगे मे त्वप्रयोग इति प्रियः।<br>मा प्रतीक्षां प्रभुत्वेन प्रकुरु प्रार्थये हरिम्॥ 73॥ |
| ब्रूमो वयं तु भद्रं ते श्रुणु पुत्रान्यदुर्मतम्।<br>व्यर्थं गतं बृहद्बीज बलीवर्दवदेव तत्॥74॥ |
| इत्येकं श्लोकमुख्यं मे त्यक्तवानसि विप्रक।<br>आकरस्थं लेखनं च कारय प्राड्मयेरितम्॥75॥ |
| वाणी वालीय रामश्च मम लीलास्पदे द्विजे।<br>कालकालगतां ज्ञात्वा गालीं तां दाम्बलाधमात्॥ 76॥ |
| निवारयामास तदाप्रतिगाली प्रदानतः।<br>स वरं वरयामास मत्प्रसादेन पालितम्॥77॥ |
| द्विजगालीत्याजनेन भजतो भुजगेश्वरम्।<br>सुजनस्यात्मजस्येह सौजन्यं जनयत्यहो॥78॥ |
| वादिराजाख्य भट्टाद्या मत्कृतेर्लेखनादपि।<br>मन्नन्दनाग्रे वक्तृत्वादच्युतस्यार्कमण्डले॥79॥ |

ध्यानाद्यत्पुण्यमाप्नोषि तद्द्वयं न त्यज द्विज।

पश्यामि त्वयि विश्वास संस्थितिं च सुते यथा॥80॥

अन्यथा त्वं गृहं चापि कथं विप्रस्य दत्तवान्।

त्वत्प्रीत्यापि प्रतापं च तस्मान्मत्प्रीतिमान् भव॥81॥

अहमाध्याय पर्यन्तं मध्यन्दिनरवे रहः।

गृध्रवच्चाग्रतस्तप्ये दुग्धवरादिघं स्मरन्॥82॥

उपलक्षणमेतच्चाप्युपलक्षितमेव च।

अनेन चोपलक्ष्यस्व ह्युपलस्थलगां कृतिम्॥83॥

यथा दधिच काकेभ्यो रक्ष्यतामितिवाक्यतः।

दध्युपघातका ग्राह्या ह्याखुभुग्व्यादयस्तथा॥84॥

तस्मान्मत्तपसा वापि स्वस्य विश्वासितोऽपि वा।

भविष्यति सुषेणाग्र्यमत्कार्यं शेषितं त्रयम्॥85॥

एतत्सर्वं स्वाप्नपद्येन गर्वं  हित्वा सर्वे विप्रवर्यास्त्यजेन।

श्रुत्वा चोर्व्यां शर्वगुर्वादिदेवान् दृष्ट्वोर्वशीं यान्तु मां मानवेन्द्राः॥86॥

इदं वृन्दावनाख्यानं ये पठन्ति मनीषिणः।

मुकुन्दावनमेवास्तु तेषां कन्दाशनाज्ञया॥87॥

इदमर्पितमेवास्तु हयशीर्षस्य पार्षदात्।

समं सहस्र शीर्षस्य सूक्तस्य पुरुषात्कृतम्॥88॥

यच्छृण्वतां भक्तिरुदारसद्गुणे हरौ हरेर्लोकगते तथा मयि।
भवत्यहो सर्वशुभाप्ति सन्मतीः ददात्यजस्त्रं सुत सत्यमेव तत्॥

**इति श्रीमत्कविकुलतिलकवागीशतीर्थकरकमलसञ्जातश्रीमद्वादिराजपूज्य चरणोदित श्रीमत्स्वाप्नवृन्दावनाख्याने चरम प्राणावधौ द्वाविंशोऽध्यायः समाप्तः॥22॥**

